श्रीवेङ्कटाध्वरिविरचितम्

# प्रद्युम्नानन्दीयनाटकम्


**सम्पादकौ**

**डा. के. राजगोपालन्**
उपाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**डा. पठान् वलि साहेब्**
संस्कृतातिथ्यध्यापकः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः



प्रकाशकः

**श्रीवनमाली प्रकाशनम्**

**तिरुपति – ५१७ ५०१**

**आन्ध्रप्रदेशः**

२०१५

श्रीवेङ्कटाध्वरिविरचितम् **प्रद्युम्नानन्दीयनाटकम्**

सम्पादकौ : **डा. के. राजगोपालन्**
उपाचार्यः, साहित्यविभागः
**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति**

**डा. पठान् वलि साहेब्**
संस्कृतातिथ्यध्यापकः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः



प्रथममुद्रणम् : २०१५
प्रतिलिपयः : ५००
मूल्यम् : रू.२२५/-
**ISBN : 978-93-5281-319-3**
Barcode :

प्रकाशकः : **श्रीवनमाली प्रकाशनम्**
तिरुपति - ५१७ ५०१, आन्ध्रप्रदेशः। भारतदेशः।

**प्राप्तिसङ्केतः : डा. पठान् महम्मद् वलि खान्**
गृहसङ्ख्या - ४-४-५४२, रामकृष्णडीलक्स् समीपे,
नेहूनगर्, तिरुपति - ५१७ ५०७, आन्ध्रप्रदेशः।
दूरवाणी - ८८८५१६१८५०
Email: mahammadvalipathan@gmail.com

**टङ्कणं पुटनिर्माणञ्च : पठान् महम्मद् वलि,** वैदनग्रामः, बल्लिकुरवमण्डलम्, प्रकाशम् जिल्ला, आन्ध्रप्रदेशः - ५२३ ३०३

**मुद्रणालयः** : प्रजाशक्तिदैनिकमुद्रणालयः, रेणिगुण्टमार्गः, तिरुपति।
दूरवाणी - ०८७७-२२१९९७, १९९८

Śrī Veṅkaṭādhvari Viracitaṃ

# PRADYUMNĀNANDĪYANĀṬAKAM

Editors

**Dr. K. Rajagopalan**
Associate Professor, Dept. of Sahitya
Rashtriya Sanskrit Vidyapeetha, Tirupati

**Dr. Pathan Vali Saheb**
Guest Lecturer in Sanskrit
Sri Venkateswara Vedic University, Tirupati

Publisher

**SRI VANAMALI PUBLICATIONS**

**TIRUPATI - 517 501**

Andhra Pradesh

**2015**

Śrī Veṅkaṭādhvari Viracitaṃ
PRADYUMNĀNANDĪYANĀṬAKAM


Editors : **Dr. K. Rajagopalan**
Associate Professor
Dept. of Sahitya
Rashtriya Sanskrit Vidyapeetha, Tirupati

**Dr. Pathan Vali Saheb**
Guest Lecturer in Sanskrit
Sri Venkateswara Vedic University, Tirupati





First Edition : **2015**
Total Pages : **xii + 256 = 268**
Copies : **500**
Price : **Rs.225/-**
**ISBN** : **978-93-5281-319-3**
Barcode :

Published by : **Sri Vanamali Publications**
Tirupati - 517 501 A.P. INDIA

Available Address : **Pathan Mahammad Vali Khan**
Door No. 4-4-542/H4,
Near Ramakrishna Delux Circle,
Nehru Nagar, Tirupati - 517 501 A.P.
Email: mahammadvalipathan@gmail.com
Mobile: **8885161850**

**DTP & Page Setting :**
Pathan Mahammad Vali, Vaidana Post, Ballikurava Mandal,
Prakasam District, Pin - 523303

**Printed at** : Praja Sakti Daily Printing Press, Tirupati. PH: 0877-2271997, 1998

# सम्पादकनिवेदनम्

**दिव्यां भव्यां सुबोधां च शुद्धामर्थप्रदायिनीम्।**
**जननीं बहुभाषाणां वन्दे गीर्वाणभारतीम्।।**

संस्कृतभाषा प्रपञ्चभाषासु पुरातना। संस्कृतसाहित्यम् अतिविस्तृतम्। संस्कृत-साहित्यं स्थूलतः वैदिकं लौकिकमिति द्विधा भवति। वेदसम्बद्धं साहित्यं वैदिकम्। लोकसम्बद्धं च साहित्यं लौकिकम्। लौकिकं साहित्यम् अपि पुराणानि, काव्यानि, रूपकाणि, शास्त्राणि, दर्शनानि, स्तोत्राणि एवंरूपेण बहुधा विद्यते। तत्र काव्यं कलात्मकं सरसतापादकं कान्तासम्मितं च भवति। अनन्यसामान्यविधानेन अनेन लक्षणेन काव्यं ग्राह्यं सम्पन्नम्। तत्रापि दृश्यकाव्यं सुलभतया श्रेयस्साधकम्। तत्र च **सन्दर्भेषु दशरूपकं श्रेयः, नाटकान्तं हि साहित्यम्, काव्येषु नाटकं रम्यम्** इत्यादीनि सहृदयवचनानि दृश्यकाव्यस्य महत्तां प्रकटयन्ति।

**ग्रन्थस्वरूपनिवेदनम्** :-

'**श्रीवेङ्कटाध्वरिविरचितं प्रद्युम्नानन्दीयनाटकम्** इति शीर्षकोपेतेऽस्मिन् साहित्यग्रन्थरत्ने एते विषयाः परिशीलिताः।

तत्र भूमिकायां **काव्यवैशिष्ट्यम्** इति प्रथमांशे - वेदवाङ्मयम्, पुराणवाङ्मयम्, काव्यस्वरूपम्, काव्यवैशिष्ट्यम्, नाटकस्य रम्यत्वम् इत्येते विषयाः बहुभिः उपशीर्षकैः प्रतिपादिताः।

अथ **ग्रन्थकर्तुः परिचयः** इत्यङ्किते द्वितीयांशे - नाटककर्तुः परिचयः - तस्य देशकालादीनि, रचनाः तासां परिचयः इत्येते विषयाः निरूपिताः।

**पाठभेदानां परिशीलनम्** इति प्रदर्शिते तृतीयांशे अधिकपाठ-नष्टपाठ-अन्यादृशपाठानां क्रोडीकरणम्, शुद्धपाठनिर्णयोपायाः प्रस्तुताः।

एतादृशं महत्त्वपूर्णं षडङ्कोपेतं **प्रद्युम्नानन्दीयनाटकम्** सपाठपरिष्करणं सम्प्रकाश्यते।

**परिशिष्टम्** इत्यभिधानात्मके – ग्रन्थाध्ययनाय उपयोगिनः १. नाटककथामूलम्, २. अकारादिक्रमेण श्लोकसूची ३. अनुशीलितग्रन्थसूची इत्येतादृशाः विषयाः समुपस्थापिताः।

**कार्तज्ञ्याविष्कारः**

महानयं प्रमोदावसरः यत्– भगवतः अनुग्रहेण **श्रीवेङ्कटाध्वरिविरचितं प्रद्युम्नानन्दीयनाटकम्** विदुषां पुरतः समर्प्यत इति।

प्रबन्धास्यास्य पाठपरिष्करणे निर्माणे प्रकाशने च सहकृतवताम् **आचार्य सन्निधानं सुदर्शनशर्मणां, श्रिष्टि लक्ष्मीधरशर्मणां** साञ्जलिं कार्तज्ञ्यं प्रकटीकुर्वः।

प्रबन्धममुं सान्तमनुशील्य स्वीयमभिप्रायं प्रकटितवतां **श्रिष्टि लक्ष्मीप्रसन्नाञ्जनेय–शर्ममहोदयानां, डा. श्रिष्टि लक्ष्मीकुमारशर्ममहोदायानां** च कार्तज्ञ्यं व्याहरावः।

अथ श्रीवेङ्कटेश्वरप्राच्यपरिशोधनासंस्थायाः निदेशकेभ्यः **डा. वि. वेङ्कटरमणरेड्डि–**महाभागेभ्यः, मैसूर्प्राच्यमातृकाग्रन्थालयाधिकारिभ्यः, डा. एस्. जगन्नाथमहोदयप्रभृतिभ्यः, एवं मद्रास्नगरस्थप्रभुत्वप्राच्यपरिशोधनामातृकालयाधिकारिभ्यः तत्रस्थकर्मचारिभ्यः धन्यवादान् प्रकटयावः।

अपि च प्रकाशनकार्यसम्पूर्तौ बहवः विद्वांसः श्रेयोऽभिलाषिणः सहकृतवन्तः उपकृतवन्तश्च तानत्र संस्मृत्य तेभ्यः कार्तज्ञ्यमाविष्कुर्वः।

एवमस्मिन् प्रबन्धनिर्माणे प्रत्यक्षतया उत परोक्षतया उपकृतवद्भ्यः गुरुभ्यः हितैषिणेभ्यः मित्रेभ्यः बन्धुभ्यश्च मम हार्दान् धन्यवादान् वितरावः।।

इत्थम्

विनीतौ

**– डा. के. राजगोपालन्**

**– पठान् वलि साहेब्**

# विषयसूची

### ४. पाठभेदानां परिशीलनम्



### प्रद्युम्नानन्दीयनाटकम्



### अनुबन्धाः

# सङ्केताक्षरसूची

| | | |
|---|---|---|
| **का.प्र.** | – | काव्यप्रकाशः, मम्मटाचार्यः । |
| **काव्यालं.** | – | काव्यालङ्कारः, रुद्रटः । |
| **कु.आ.** | – | कुवलयानन्दः, अप्पय्यदीक्षितः । |
| **चं.आ.** | – | चन्द्रालोकः, जयदेवः । |
| **ज.सि.प.** | – | जगन्नाथसिद्धान्तपरिशीलनम्, डा. श्रिष्टि लक्ष्मीकुमारशर्मा । |
| **द.रू.** | – | दशरूपकम्, धनञ्जयः । |
| **ध्व.आ.** | – | ध्वन्यालोकः, आनन्दवर्धनः । |
| **नार.** | – | नारदीयपुराणम्, भगवान् वेदव्यासः । |
| **नाट्य. प्र.** | – | नाट्यशास्त्रम्, भरतमुनिः (प्र.-प्रथमोऽध्यायः) । |
| **भाग.** | – | भागवतपुराणम्, भगवान् वेदव्यासः । |
| **प्र.रु. रत्ना.** | – | प्रतापरुद्रीयम् – विद्यानाथः।<br>रत्नापणव्याख्यासहितम् – श्रीकुमारस्वामी । |
| **पृ.** | – | पृष्ठसंख्या । |
| **मनु.** | – | मनुस्मृतिः। |
| **महा.प.आ.** | – | महाभाष्यम्, पश्पशाह्निकम्, महर्षिपतञ्जलिः । |
| **रस. प्र.आ.** | – | रसगङ्गाधरः, प्रथमाननम्, पण्डितराजजगन्नाथः । |
| **लक्ष्मी.रत्न.** | – | लक्ष्मीसहस्रम् – रत्नाप्रकाशिकाव्याख्यासहितम्,<br>वेङ्कटाध्वरिः – श्रीकृष्णब्रह्मतन्त्रपरकालमुनीन्द्रः । |
| **व.जी.** | – | वक्रोक्तिजीवितम्, राजानककुन्तकः । |
| **वायु.** | – | वायुपुराणम्, भगवान् वेदव्यासः । |

| | | |
|---|---|---|
| **वि.गु.पदार्थ.** | – | विश्वगुणादर्शचम्पूः वेङ्कटाध्वरिः,<br>पदार्थचन्द्रिकाटीकासहिता – बालकृष्णशास्त्री |
| **वि.गु.भाव.** | – | विश्वगुणादर्शचम्पूः – वेङ्कटाध्वरिः,<br>भावदर्पणाटीकासमेता मधुरासुब्बाशास्त्री<br>सम्पादकः – श्यामरायशर्मा विठ्ठलः |
| **वृ.र.** | – | वृत्तरत्नाकरः, केदारभट्टः । |
| **शिशु.** | – | शिशुपालवधम्, महाकविमाघः । |
| **सं.सा.च.** | – | संस्कृतसाहित्यचरितत्रमु,<br>मुदिगण्टि गोपालरेड्डी – सुजातारेड्डी च । |
| **सा.द.** | – | साहित्यदर्पणम्, विश्वनाथः । |
| **G.O.M.L.** | = | Government Oriental Manuscripts Library, Madras. |
| **H.C.S.L.** | = | History of Classical Sanskrit Literature,<br>M. Krishnamachariar |
| **M. Gr. 1** | = | Madras Grantha Manuscript - 1,<br>from G.O.M.L., Madras. |
| **My. Tel. Print.** | = | Mysore Telugu Script Print.<br>from O.R.I., Mysore. Printed in 1886. |
| **N.C.C.** | = | The New Catalogus Catalogorum |
| **O.R.I.** | = | Oriental Research Institute, Mysore. |
| **S.V.O.R.I.** | = | Sri Venkateswara Oriental Research Institute, Tirupati. |
| **T. Gr. 1** | = | Tirupati Grantha Manuscript - 1,<br>from S.V.O.R.I., Tirupati. |

# भूमिका

**दैवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति**[1] इति ऋग्वेदमन्त्रात् संस्कृतं दैवीवागिति ज्ञायते। इयमेव भाषा विश्वभाषासमुदायस्य मूलमिति भाषाविचक्षणाः कथयन्ति। अस्यामेव भाषायां भारतीयसंस्कृतेः मौलिकरूपम् उपलभ्यते। दैवीवाक् एव देववाणी, गीर्वाणभाषा, सुरभाषा, अमरवाणी इत्यादिपर्यायवाचिशब्दैः व्यपदिश्यते। अपि च व्याकरणेन संस्कृतत्वात् इयमेव संस्कृतमिति व्यवह्रियते। संस्कृतवाङ्मयं च वैदिकम्, लौकिकञ्चेति द्विविधम्। इदं हि संस्कृतवाङ्मयं धर्मार्थकाममोक्षाख्यपुरुषार्थप्रदायकत्वेन विराजते।

**पुरुषार्थाः :-**

लोकेस्मिन् मानवः निरन्तरं धर्मादिपुरुषार्थलाभाय यतते[2]। नो चेत् तस्य जीवितं निरर्थकम् एव भवति। एतदेव कथयति नारायणपण्डितः हितोपदेशे पाटलीपुत्रस्य राज्ञः सुदर्शनस्य मुखेन। तद्यथा -

**धर्मार्थकाममोक्षाणां, यस्यैकोऽपि न विद्यते।**
**अजागलस्तनस्येव तस्य जन्म निरर्थकम्।।**[3] इति।

प्राणभूतान्[4] **(**= जन्मनःसार्थकतासम्पादकान्) धर्मार्थकाममोक्षरूपपुरुषार्थान्[5] उद्दिश्य प्रयतमानः मानवः लौकिकं पारमार्थिकञ्च लक्ष्यं साधयन्नेव औन्नत्यं लभते। तादृशपुरुषार्थेषु धर्मः चरमपुरुषार्थसाधकतया मुख्यः पुरुषार्थः। स च वेदप्रतिपादित एव।

---

1. ऋग्वेदः ८.१००.११
2. **पूर्वजन्मकृतं कर्म तद् दैवमिति कथ्यते।**
   **तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः।।** हि.उ. श्लोकः - ३१. पृ. १६.।।
   **आहारनिद्राभयमैथुनञ्च, समानमेतत् पशुभिर्नराणाम्।**
   **धर्मो हि तेषामधिको विशेषो, धर्मेण हीनाः पशुभिः समानाः।।** हि.उ. श्लोकः - २५. पृ. १४.
3. हि.उ. श्लोकः - २६. पृ. १४.
4. **धर्मार्थकाममोक्षाणां, प्राणाः संस्थितिहेतवः।**
   **तान् निघ्नता किन्न हतं, रक्षता किं न रक्षितम्।।** हि.उ. श्लोकः. ४३. पृ. ५४.

तथा चोक्तं मुनिना मनुना -

**वेदोऽखिलो धर्ममूलम् स्मृतिशीले च तद्विदाम्।**
**आचारश्च साधूनामात्मनस्तुष्टिरेव च।। ६।।**[1]

इत्यनेन च वचनेन वेदाः धर्मामूलाः इति ज्ञातं भवति। धर्मार्थकाममोक्षेषु अन्तिमः पुरुषार्थः अत्यन्तप्रधानभूतः। अवशिष्टं त्रयं परम्परया मोक्षसाधनाय अङ्गभूतम् -

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।**[2]

इति ईशावास्योपनिद्वाक्यात्, अविद्यया - यज्ञादिना मृत्युम् - तीर्त्वा - स्वाभाविककर्माचरणलक्षणं मृत्युं संतीर्य, विद्यया - शास्त्राध्ययनाविष्कृतेन ज्ञानेन **मोक्षम् आनन्दं** प्राप्नुवन्ति इति, मुक्तिश्च अमृतत्वस्वरूपा विद्यैकलभ्या - इति च ज्ञायते। अत एव श्रुत्या जोघुष्यते यत् **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च**[3]- इति। अपि च "वेदाध्ययनम् परमं तपः इति, तच्च एकनिष्ठया सम्पाद्यम्"[4] इति च मनुस्मृतिकाराः, याज्ञवल्क्यादयश्च भावयन्ति। एवं मुक्तेः वैदिकवाङ्मयस्य च अविनाभावसम्बन्धः विद्यते इति, वेदविद्या मोक्षदायिनी इति च ज्ञायते।

यदा वेदप्रतिपादिताः अर्थाः अवगन्तुं क्लिष्टाः सञ्जाताः तदा वेदोक्तस्य ज्ञानं सुलभं कर्तुं पुराणवाङ्मयरचनं प्रवृत्तम्। स्मृतिवत् चतुर्दशविद्यासु पुराणस्यापि गणना दृश्यते।

***पुराण*-न्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।**[5]

इत्येवमादिमनुस्मृतिश्लोकाः प्रमाणम्।

---

5. **वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः।।** (अर्थसंग्रहः, लौगाक्षिभास्करः)
**ब्रह्मभावश्च मोक्षः।।** (ब्रह्मसूत्रशांकरभाष्यम्, १.१.४.४)

1. मनु. द्वितीयाध्यायः श्लोकः ६.
2. ईशावास्योपनिषद्, ११.
3. महाभाष्यपस्पशाह्निकम्
4. **वेदमेव सदाभ्यस्येत् तपस्तप्येत् द्विजोत्तमः।**
***वेदाभ्यासो हि विप्रस्य तपः वरमिहोच्यते।।*** मनु. द्वितीयाध्यायः श्लोकः १६६.
5. मनु. प्रथमाध्यायः श्लोकः ३.

तत्र पुरुषार्थसिद्ध्यै, आनन्दावाप्त्यै च वेदान्तिनः वेदवाङ्मयम्, पौराणिकाः पुराणवाङ्मयम्, काव्यज्ञाः काव्यवाङ्मयञ्च आश्रयन्ति। एतेषु उत्तरोत्तरं वाङ्मयं सहृदयस्य आनन्दकारि भवति। तदेतत् संक्षेपतः अत्र प्रस्तूयते –

## १. वेदवाङ्मयम्

विद-ज्ञाने इत्यस्मात् धातोः निष्पन्नं वेद इति पदं हितप्रापकम्, कर्तव्यबोधकं राशीभूत-ज्ञाननिधिं बोधयति। एतत् बोधकं च वाङ्मयं वेदवाङ्मयम्। तच्च ऋग्यजुस्सामाथर्वणभेदेन चतुर्विधम्। एतच्चतुर्विधमपि संहिता-आरण्यक-ब्राह्मण-उपनिषद्भागेषु उपलभ्यते। तत्र उपनिषद्भागस्य वेदानामन्तभागत्वेन वेदान्त इति आगतः।

### १.१. वेदानां महत्त्वम् :-

**सा विद्या या विमुक्तये** इति सूक्तिः संसारदावानलस्य परा विद्या एव मोक्षदायिनी अस्ति। अतः सा विद्या एव विद्या पदेन व्यवह्रियते। अत एव भर्तृहरिः **विद्याविहीनः पशुः** इति निगदति। **वेदोऽखिलो धर्ममूलम्** इति समुद्घोषयता मनुना समग्रस्यापि वेदनिधेः धर्माधाररूपेण प्रतिष्ठा विहिता। मानवस्य अखिलं कृत्यजातं, कर्तव्य-अकर्तव्यं वा वेदेषु विशदतया निरूप्यते। अत एव वेदाः आचारसंहितारूपेण प्रमाणं भवन्ति। सर्वेऽपि विद्वत्तल्लजाः, भारतीयाः दार्शनिकाः, स्मृतिकाराः, शब्दतत्त्वमीमांसादक्षाः वैयाकरणाः, अन्ये च शास्त्रकाराः वेदानां परमप्रामाण्यं प्रतिपदम् उद्घोषयन्ति। धर्मचिन्तायां, कर्तव्यविचारणे च वेदाः परमप्रमाणभूताः सन्ति।

### १.२. वेदाः शब्दप्रधानाः प्रभुसम्मिताः :-

एवं बहुधा महत्त्वाधायकमपि वेदानामध्ययनं समग्रतया सम्पूर्णतया सन्देशस्य अवगमने आचरणात्मकसम्पादने च सहृदयं नाकर्षति। यतो हि वेदाः शब्द(स्वर)प्रधानाः, उदात्त-अनुदात्त-स्वरितादि विशेषोच्चारणमपेक्षन्ते। वाचने अनुवाचने लेखने वा समुत्पन्नाः दोषाः वेदार्थावगमने क्लेशं जनयन्ति। स्वरस्य अन्यथोच्चारणेन **इन्द्रशत्रुर्वर्धस्व**[1] इति वृत्रासुरविजयार्थं पठितोऽपि मन्त्रः षष्ठीतत्पुरुषे "इन्द्रस्य शत्रुः (वृत्रासुरः) वर्धस्व" इति अन्तोदात्तस्वरे प्रयोक्तव्ये, अशुद्धोच्चारणेन प्रयुक्तस्सन् अर्थविपर्यासात् महाननर्थः सञ्जातः।

---

1. **मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्या प्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोपराधात्।।**
इति महाभाष्यम् आह्निक-१. पाणिनीयशिक्षा।

किञ्च वेदाः प्रभुसम्मिताः। मनसः इष्टम् अनिष्टं वा भवतु प्रभुणा उक्तं यथा आचरणीयमेव भवति, तथा वेदोक्तं सन्देशम् इष्टानिष्टनिमित्तं विना अवश्यं समाजसंरक्षणाय पालनीयमेव भवति। एवंसति दण्डनभीत्या प्रवृत्तिरिव वेदोक्तानुष्ठाने पापभीत्या एव प्रवर्तनमेव दृश्यते न तु इष्टपूर्त्या। इष्टं विना प्रचलितमध्ययनं न तथा त्वरया सन्देशं ग्रहीतुं प्रभवति इति वेदानामध्ययनं दूरतो गतम्।

अनन्तरं पुराणवाङ्मयस्य स्वरूप-स्वभावौ आदरणीयता च विचार्यन्ते।

## २. पुराणवाङ्मयम्

किं तावत् पुराणम् इति जिज्ञासायां पुराणशब्दार्थः बहुधा निरुच्यते। तत्र **पुरातनम् आख्यानम् - पुराणम्** इति अन्यतमं निर्वचनम्। अर्थात् प्राचीनानि आख्यानानि (कथाः) - पुराणानि इति तस्यार्थः।

पुराणानि च अष्टादश सन्ति। एवम् अष्टादश उपपुराणानि च सन्ति। एतेषां सर्वेषाम् अपि कर्ता **वेदव्यासः** एव इति साहित्यचरित्रकाराणाम् अभिप्रायः।

### २.१. पुराणस्वरूपम् :-

विष्णुपुराणादिषु प्रतिपाद्यविषयम् आश्रित्य पुराणानां लक्षणं निरूप्यते यत् -

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्च लक्षणम्।।**[1]

पुराणेषु प्रधानतः पञ्चानां सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितानां समावेशः वर्ण्यते। लक्षणेषु एतेषु कस्यचनांशस्य कस्मिंश्चित् पुराणे प्राधान्यं निरूप्यते। अन्यस्मिंश्च अन्यस्यांशस्य। एवं प्रतिपुराणं लक्षणानाम् एषां न्यूनाधिक्यम् अवलोक्यते। एवं क्वचित् पञ्चानाम् अपि लक्षणानां समावेश उपलभ्यते, अन्यत्र कस्यचित् एकस्य द्वयस्य वा तत्त्वस्य समुपलब्धिः भवति।

श्रीमद्भागवतपुराणानुसारं पुराणानां दश लक्षणानि सन्ति। क्वचित् पञ्चलक्षणानि, क्वचित् दश लक्षणानि इति मतभेदस्य किं कारणम् इति जिज्ञासायां तदुत्तरं भागवतकृता

1. विष्णुपुराणम् / संस्कृतसाहित्येतिहासः रामचन्द्रमिश्रः पृ. २२

स्वयमेव उच्यते, यत् महापुराणेषु दश लक्षणानि प्राप्यन्ते, लघुषु च पुराणेषु केवलं पञ्चानाम् एव लक्षणानां प्राप्तिः भवति। एवं महद्-लघुभेदेन दशानां[1] वा पञ्चलक्षणानां वा सङ्गतिः व्यवस्थाप्या। सामान्यतः स्वीकृतानां पञ्चानां लक्षणानां विवरणं प्रस्तूयते।

**१). सर्गः :-** **अव्याकृतगुणक्षोभात् महतः त्रिवृतोऽन्वहम्।**
**भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।**[2]

अत्र सर्गशब्देन सृष्ट्युत्पत्तेः वर्णनम् उद्दिष्टम्। भागवतोक्तप्रकारेण सर्गशब्देन सांख्याभिमता सृष्टिप्रक्रिया अभिप्रेता।

**२). प्रतिसर्गः :-** प्रतिसर्गशब्देन प्रलयस्य, सृष्टेः पुनरुत्पत्तेश्च वर्णनम् इष्यते।

**पुरुषानुगृहीतानाम् एतेषां वासनामयः।**
**विसर्गोऽयं समाहारः बीजात् बीजं चराचरम्।।**[3]

इदं सकलं चराचरात्मकं जगत्, स्ववासनामयैः संस्कारैः पुनः पुनः सृष्टिरचनायां जनिम् आपद्यते। यथा बीजानि वृक्षादिरूपेण समुद्भूतानि प्रलये बीजरूपं प्राप्तान्यपि पुनः वृक्षादिरूपेण आविर्भवन्ति, तथैव स्थावरजङ्गमं च जगत् स्वसंस्कारवशात् पुनः जायते। एतस्यैव वर्णनं प्रतिसर्गशब्देन व्यवह्रियते।

**३). वंशः :-** वंशशब्देन राज्ञाम् ऋषीणां च वंशावलीनां वर्णनम् उद्दिष्टमस्ति।

**राज्ञां ब्रह्मप्रसूतानां वंशः त्रैकालिकोऽन्वयः।**[4]

ब्रह्मणः समुद्भूतानां नृपाणां त्रिकालम् आश्रित्य वंशावलयः निरूपिताः। वंशशब्देन न केवलं राज्ञाम् अपि तु ऋषीणां देवादीनां चापि वंशावलिः संग्राह्या। रामायण-महाभारतादिषु कस्यचित् एकस्य वंशस्य वर्णनम् उपलभ्यते। परं पुराणेषु सामान्यरूपेण विद्यमानैः साकम् अतीतानाम् अनागतानां च नृपादीनां वंशावलिः वर्ण्यते।

---

1. **दशभिः लक्षणैः युक्तं पुराणं तद्विदो विदुः।**
**केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया।।** भाग. १२ स्कन्धः ७ अध्यायः २० श्लोकः
2. भाग. १२ स्कन्धः ७ अध्यायः ११ श्लोकः
3. भाग. १२ स्कन्धः ७ अध्यायः १२ श्लोकः
4. भाग. १२ स्कन्धः ७ अध्यायः १६ श्लोकः

**४). मन्वन्तरम् :-**

मन्वन्तरशब्देन प्रत्येकस्य मनोः कालः, तदानीन्तनानां विविधानां संघटनानां सुव्यवस्थितः उल्लेखः मन्वन्तरशब्देन स्वीक्रियते।

**मन्वन्तरं मनुः देवा मनुपुत्राः सुरेश्वराः।**
**ऋषयोऽशावताराश्च हरेः षड्विधम् उच्यते।।**[1]

मन्वन्तरशब्देन मनोः, देवानां, मनुपुत्राणाम्, इन्द्रस्य, सप्तर्षीणां, विष्णोः, तदंशावताराणां च वर्णनं तत्सम्बद्धं च विविधं वृत्तं संगृह्यते। एकैकस्मिन् कल्पे चतुर्दश मनवः भवन्ति। प्रतिमन्वन्तरं के राजानः भवन्ति ? तदा के ऋषयः महर्षयश्च भवन्ति ? तस्मिन् काले किं किं विशिष्टं प्रचलितम् ? इत्यादिसर्वम् अपि मन्वन्तरवर्णने विद्यते।

**५). वंशानुचरितम् :-**

वंशानुचरिते विशिष्टवंशोत्पन्नानां नृपादीनां चरितं विशदतया वर्ण्यते।

**वंशानुचरितं तेषां वृत्तं वंशधराश्च ये।।**[2]

अत्र सूर्यवंशीयानां चन्द्रवंशीयानां च नृपाणां जीवनचरितं सविस्तरं प्रतिपाद्यते। वंशानुचरितस्य पुराणेषु महती आवश्यकता वर्तते। ये केचन तत्र राजर्षयः महात्मानः पुण्यात्मानश्च अभवन्, तेषां सविशदं चरितम् अनुसृत्य एव परवर्तिनः सामान्याः नराः स्वजीवनं पावयन्ति। तथाविधकर्मानुष्ठानेन विपत्पारावारं समुत्तितीर्षन्ति। स्वजन्म सफलं चिकीर्षन्ति। लौकिकं पारलौकिकं च पुण्यं चेतुमिच्छन्ति। यद्येवं विचार्यते चेत् तर्हि वंशानुचरितवर्णनस्यापि महती आवश्यकता, उपयोगिता च वरीवर्ति।

एवं पञ्चलक्षणेन पुराणानां स्वरूपं प्रतिपादितम्।

**२.२. पुराणानां महत्त्वम् :-**

एतादृशलक्षणशोभितानि पुराणानि भारतीयसंस्कृतेः सनातनं स्वरूपं प्रकाशयन्ति। वेदार्थं च कथा-आख्यानादिरूपेण वर्णयन्ति। अज्ञातं चरितमपि प्रकाशताम् नयति।

1. भाग. १२ स्कन्धः ७ अध्यायः १५ श्लोकः
2. भाग. १२ स्कन्धः ७ अध्यायः १६ श्लोकः

एवं पुराणानि भारतीयानां ऐतिह्यज्ञानाय उपकुर्वन्ति। भारतीयसंस्कृतेः अवगमनाय आधारभूतानि भवन्ति। पुराणानि विहाय न क्वचित् अन्यत्र विपुले अपि वाङ्मये प्राचीनसंस्कृतेः सविस्तरं वर्णनम् उपलभ्यते। अत एव वायुपुराणे तन्महत्त्वम् -

**यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।**
**न चेत् पुराणं स विद्यात् नैव स स्यात् विचक्षणः।।**[1]

इत्यादिना चतुर्वेदविदपि पुराणज्ञानहीनः न विचक्षणपदवीम् आरोढुं शक्नोति इति प्रतिपाद्यते।

धर्म-अर्थ-काम-मोक्षात्मकचतुर्वर्गसाधनत्वात् पुराणानि पुरुषार्थसाधकानि भवन्ति। किञ्च पुराणानां तादृशं महत्त्वं यथा **'भिन्नरुचिर्हि लोकः'** स्वरुचिम् अनुसृत्य प्रवृत्तोऽपि स्वेष्टं प्रतिगृह्णाति। विदुषे तत्त्वज्ञानविषयाः, बालिशाय शृङ्गाररसरुचिराणि आख्यानानि, नीतिज्ञाय नीतितत्त्वानि, राज्ञे राजकर्माणि, व्यवहारिणे अर्थागमसाधनानि, अध्यात्मदृशे ब्रह्मतत्त्वमीमांसा, वनिताभ्यः पातिव्रत्यमहिमा, जिज्ञासवे भूगोल-ऐतिह्यादिसम्बद्धाः विषयाः, यथातथं तच्चित्तावर्जकत्वेन प्रवर्तन्ते।

वेदेषु यानि तत्त्वानि यत्र यत्र वर्ण्यन्ते तेषां विशदीकरणं पुराणेषु आख्यानरूपेण प्राप्यते। वेदार्थविशदीकरणेन पुराणानि वेदार्थावगमे साहाय्यम् आचरन्ति। तथा च व्यासः -

**वेदार्थादधिकं मन्ये पुराणार्थं वरानने!।**
**वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः।।**[2] इत्युक्तम्।

### **२.३. पुराणानि अर्थप्रधानानि मित्रसम्मितानि :-**

एवं गुणविशेषणविशिष्टमपि पुराणवाङ्मयं स्वीयार्थस्य आचरणीयतासम्पादने पाक्षिकसफलतामेव प्राप्तम्। यतो हि पुराणानि हि **अर्थप्रधानानि** मित्रसम्मितानि च। पुराणेषु अर्थगौरवं विद्यते। निगूढाः अर्थाः प्रतिपाद्यन्ते। गभीराः भवनाः वर्ण्यन्ते। सूक्ष्माः अपि अंशाः सूच्यन्ते। वेदप्रतिपादितान् सर्वानप्यंशान् अवगमनाय आख्यानात्मकतया विस्तृतरूपेण प्रतिपादयन्ति। एवं गूढं गभीरं सूक्ष्मं च पुराणसन्देशमवगन्तुं पाठकः समर्थः वा सन्नद्धो वा एव भवेत्। अन्यथा तेषामर्थम् अन्ततः न सम्यक् ग्रहीष्यति। उद्दिष्टार्थस्य अनवगमने हि अध्ययनं व्यर्थमेव भविष्यति।

---

1. वायुपुराणम्
2. नारदीयपुराणम् २.२४.१७

किञ्च पुराणानि मित्रसम्मितानि। स्वभावतः मित्रस्य काचन परिमितिः भवति। मित्रं प्रति व्यवहारणीयतां साधुताम् असाधुतामेव वर्णयति। तस्य स्वीकरणे ग्रहणे वा श्रोतुः मित्रस्य एव अधिकारः अथवा विवेकः। तत्र मित्रं, श्रोतारं न निर्बध्नाति। विषयग्रहणे वा आचरणे वा श्रोतुः स्वेच्छां नैवापहरति। पुराणान्यपि साधून् वर्णयन्ति। असाधून् च वर्णयन्ति। अध्येता साधूनामसाधूनां च वर्णनमधिगत्य स्वयमेव विवेकेन निर्णयं स्वीकुर्यात्। नाम पुराणानां सन्देशस्य सम्पूर्णतया अवगमनाय पाठकः समर्थः भवेत्, विवेकी च भवेत्। तादृशस्यैव पुराणार्थसन्देशः अवगतः भवति, तादृशेभ्यः एव उपयोगाय भवति पुराणवाङ्मयम्।

एवं पुराणानि मित्रवत् परिमितपद्धत्या एव विषयान् उपस्थापयन्ति, नैव सर्वेषां पाठकानाम् आचरणीयतासम्पादनपर्यन्तम्। एवं पाठकजनान् सर्वान् आचरणाय प्रभावयितुम् असमर्थं पुराणवाङ्मयमपि न तथा पाठकजनादरणं प्राप्तम्।

अथ काव्यस्य स्वरूपं स्वभावं वैशिष्ट्यं च प्रतिपाद्यते।।

## ३. काव्यवाङ्मयम्

### ३.१. काव्यवैशिष्ट्यम् :-

काव्यं कान्तासम्मितत्वात् सहजतया आकर्षकं भवति। तत् आकर्षणं पाठकम् अनिष्टात् अविवेकात् मोहात् च दूरमपनीय इष्टपूर्त्या विवेकेन अवगाहनपुरस्सरम् आचरणाय प्रेरयति, पुरुषार्थान् साधयति च। अत एव काव्यस्य वैशिष्ट्यं प्रतिपादयन्तः काव्यशास्त्रकाराः **काव्यं कान्तासम्मितम्** इति वदन्ति।

तस्य अयमर्थः। कान्ता नाम प्रेयसी। प्रेयसी इत्युक्तावेव सा मनोहारिणी इति सिद्ध्यति। सा प्रियम् आकर्षति। करं गृहीत्वा समवधाने स्थापयति। भुजयोः हस्तं निक्षिप्य उन्मुखीकरोति। वचांसि मधुराणि कृत्वा श्रावयति। स्वाभिप्रायं मनः प्रापयति। प्रियं सङ्कल्पयति। आनन्दयति आचरणोन्मुखं करोति। तथैव शब्दप्रधानेभ्यः प्रभुसम्मितेभ्यः वेदेभ्यः, अर्थप्रधानेभ्यः मित्रसम्मितेभ्यः पुराणेभ्यश्च विलक्षणतया कान्तासम्मितं सत् काव्यं पाठकजनान् आकर्षति।

यथा कान्ता (प्रेयसी) स्वकटाक्षभ्रू-विक्षेपादिभिः सरसतया प्रियमाकृष्य मधुरया वाचा स्वाभिलषितम् अर्थं निगद्य प्रेम्णा अर्थसाधनाय उद्युक्तं करोति तथैव काव्यमपि रमणीयार्थप्रतिपादकैः ललितपदैः सरसतया पाठकमाकृष्य मधुरेण व्यक्तीकरणेन स्वाभिलषितं सन्देशं पाठकजनाय निगद्य बाधां वा कष्टं वा विना इष्टपूर्वकं सन्देशाचरणाय उद्युक्तं करोति इति वेद-पुराणेभ्यश्च काव्यस्य वैशिष्ट्यं सिद्ध्यत्येव। अयमेवांशः प्रतापरुद्रिय-काव्यप्रकाशयोः स्पष्टं निरूपितवतः विद्यानाथ-मम्मटाचार्याभ्याम्। तद्यथा -

**यद्वेदात् प्रभुसम्मितादधिगतं शब्दप्रधानाच्चिरम्,**
**यच्चार्थप्रवणात् पुराणवचनादिष्टं सुहृत्सम्मितात्।**
**कान्तासम्मितया यया सरसतामापाद्य काव्यश्रिया,**
**कर्तव्ये कुतुकी बुधो विरचितः तस्यै स्पृहां कुर्महे।।**[1]

“प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः, सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म

1. प्र.रु. रत्ना. पृ. ४.

तत् कान्तेव सरसतापादनेन अभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवत् इत्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।"[1]

**काव्यं ग्राह्यम् अलङ्कारात्, सौन्दर्यमलङ्कारः।।**[2]

काव्यं सुललितभाषानिबन्धन-कल्पनाचातुर्येण अलङ्कार-प्रसादमाधुर्यादिगुण-समन्वयानाम् रसादीनां च काव्यसामाग्रीभिः सहृदयमनोभावाभिव्यञ्जनेन सर्वेषाम् अपि सुधियां चेतांसि आवर्जयति। विविधकला-प्रख्यापनात् विद्वन्मनोमोहनत्वाच्च **कलासीमा काव्यम्** इति सादरम् उद्घोष्यते। काव्ये यादृशी कल्पना रुचिरा मनोहारिणी विद्यते तादृशी कल्पना चेतः प्रसादिनी रुचिरा भावाभिव्यक्तिः वैदिक-पुराणवाङ्मयादिषु न विद्यते। अत एव सहृदयतल्लजैः माघकविविरचितशिशुपालवधमहाकाव्यपठनेन **माघे मेघे गतं वयः** इति सादरमुद्घोषितम्।

एतादृशं वैशिष्ट्यं वहतः काव्यस्य स्वरूपस्वभावयोः विचारणम् अत्र किञ्चित् क्रियते।

**३.२. काव्यस्य स्वरूपम् :-**

बहवः आलङ्कारिकाः काव्यस्वरूपं बहुधा निरूपयन्ति। प्रमुखानां केषाञ्चित् लक्षणकाराणां काव्यलक्षणानि अत्र प्रस्तूयन्ते।

**शब्दार्थौ सहितौ काव्यम्।**[3]
**शरीरं तावदिष्टार्थव्यवच्छिन्नापदावली।**[4]

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।**[5]

**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।**[6]

इति दत्तकाव्यलक्षणानुसारं दोषरहितौ गुणालङ्कारसहितौ शब्दार्थौ काव्यम् इति। क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्वस्य हानिः भवति। अर्थात् रसादिः अलङ्कारश्च चमत्कारस्य हेतुः। अतः यत्र रसादीनां संस्थितिः तत्र स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः इति मन्तव्यम्।

---

1. का.प्र. प्रथमोल्लासः पृ. ६, ७.
2. काव्यालङ्कारसूत्रवृत्तिः
3. काव्यालं १.१६
4. का.आ. १.१०
5. व.जी. १.७.१६.
6. का.प्र. प्रथमोल्लासः पृ. ४

**वाक्यं रसात्मकं काव्यम्।**[1]

एतेषु केचन शब्दं प्रधानं कृत्वा काव्यस्य लक्षणं कथयन्ति। यथा दण्डि-पण्डितजगन्नाथादयः। अपरे केचन अर्थं प्रधानं सम्भाव्य काव्यस्य स्वरूपं निरूपयन्ति। यथा साहित्यदर्पणकारादयः। अन्ये केचन शब्दम् अर्थञ्च प्रधानं कृत्वा काव्यस्य स्वरूपं प्रतिपादयन्ति। एवमेतानि सर्वाण्यपि सर्वैर्बहुधा विमृष्टानि इति कृत्वा काव्यगतां गुणात्मकतामाधारीकृत्य काव्यस्य स्वरूपं निरूपयितुं किञ्चित् प्रयतिष्ये।

**३.२.१. पण्डितराजमते काव्यलक्षणम् :-**

वेदप्रतिपादितमेवार्थं सरसतया स्वकल्पनाचातुर्येण स्वकाव्ये कविः यदा प्रतिबिम्बयति तदा सः कविः लोके कीर्तिं लभते। तादृशमेव काव्यं जगति आदरणीयतां वहति। सहृदयस्य हृदङ्गमतया यदि काव्यं निबध्यते तर्हि तत् काव्यं पाठक/प्रेक्षकजनग्राह्यं भवति। सहृदयं पुनःपुनः आलोचयति तदेव उत्तमोत्तमं काव्यं भवति। अत एव जगन्नाथपण्डितराजः काव्यं लक्षयन् -

**रमणीयार्थप्रतिपादकशब्दः काव्यम्।**[2]

इति निष्कृष्टं काव्यलक्षणं प्राचीनसकलालङ्कारिकविलक्षणतया प्रकटितवान्। काव्यस्य रमणीयता सम्पादने शब्दस्य अर्थस्य च परस्परस्पर्धायां सत्यामपि, पाठकदृष्ट्या तु शब्दस्यैव प्रथमोपस्थितत्वात् शब्दस्यैव प्राधान्यं स्वीकृत्य इदं लक्षणं प्रवृत्तम्। काव्ये अर्थचमत्कारस्यैव प्राधान्यात् तज्जनक-गुणालङ्कारप्रसक्तिं विना अर्थरमणीयतयैव काव्यं लक्षितम्।

तत्र च लक्षणघटितरमणीयार्थप्रतिपादकत्वं शब्दस्य स्वाभिविकम् उत प्रयत्नान्तरसाध्यम् इत्याकांक्षायां प्रयत्नान्तरसाध्यम् इति समाधनम्। कुत इति चेत् यदि शब्दस्य रमणीयार्थप्रतिपादकत्वं स्वाभाविकम् इति ब्रूमः चेत् तर्हि सर्वस्यापि शब्दस्य रमणीयार्थप्रतिपादकत्वं स्वभावतः सिद्धमिति, वाक्यसामान्ये काव्यलक्षणस्य अतिप्रसङ्गः स्यात्। अतः रमणीयता प्रयत्नान्तरसाध्या इत्येव वक्तव्यम्। तर्हि कोऽसौ प्रयत्नः इत्युक्ते पण्डितराजेन **भावना**[3] इत्युक्तम्।

---

1. सा.द. १.३.
2. र.गं. प्रथमाननम् पृ. १३
3. र.गं. प्रथमाननम्, पृ. १५, **कारणं च तदवच्छिन्ने भावनाविशेषः पुनःपुनरनुसन्धात्मा।** **यत्किञ्चित् चमत्कारजनकज्ञाने समूहालम्बनविधया भासमानान्यार्थप्रतिपादकशब्दे काव्यत्ववारणाय ज्ञानेत्यपहाय भावना इत्युक्तम्।** र.गं. प्रथमाननम् मर्मप्रकाशः पृ. १७

लौकिकशब्दप्रतिपादितस्य काव्यशब्द इव भवनावकाशः न भवति। काव्यशब्देन प्रतिपादितार्थस्तु चमत्कारं जनयति। काव्ये भावनाविशेषमहिम्ना लोकोत्तरापरपर्यायः रमणीयार्थः (चमत्कारः) जायते[1]।

ततश्च रससामग्रीघटितं वाक्यम्, चमत्कार्यर्थप्रतिपादकः शब्दः, सचमत्कारौ शब्दार्थौ वा काव्यमिति निष्कर्षः। प्रकृते प्रद्युम्नानन्दीयनाटके श्लेष-यमकादिचमत्काराणाम् अग्रे निरूपयिष्यमाणविधया अङ्गाङ्गिभावेन अवस्थितानां नवरसानां वा सद्भावात् काव्यलक्षण-समन्वयः।

**३.३. काव्यप्रयोजनम् :-**

लोकोत्तरवर्णननिपुणस्वरूपस्य काव्यस्य किं प्रयोजनम् इत्युक्तौ काव्यप्रकाशे मम्मटोक्तौ-

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।। २।।**[2] इति।

तत्र महाकविकालिदासादीनामिव **यशः** एकं प्रयोजनम्। धावकनामकः कविः श्रीहर्षनाम्ना रत्नावलीनाटकं विलिख्य बहुधनं प्राप्तवान्। अतः काव्यप्रणयनात् **धनं** द्वितीयं प्रयोजनम्। मयूरशर्मा च सूर्यशतकं विलिख्य कुष्ठुरोगात् विमुक्तः इति काव्यात् **शिवेतरक्षतिः** (अमङ्गलनाशः) तृतीयं प्रयोजनम्। एते च त्रयः काव्यप्रणेतुः कवेः प्रयोजनानि। एवं च काव्यपठितुः अपि यशः प्रसरति, द्रव्यं लभते स्तोत्रपठनेन अनर्थनाशः च भवति।

सहृदयस्तु काव्यश्रवणानन्तरं सकलप्रयोजनेषु उत्तमं स्थायिभावास्वादनसमुद्भूतं रसास्वादरूप-मानन्दम् अनुभवति। अपि च तस्य राजादिगतपृथिवीपालनादिसमुचिताचारपरिज्ञानं जायते। रामादिवत् वर्तितव्यम्, न तु रावणादिवत् इति उपदेशं च ददाति काव्यास्वादनकाले कविः अपि सहृदयो भूत्वा रसास्वादमनुभवति। अयि राजादिगतोचिताचारोपदेशाय नीतिशास्त्राणि सन्ति किल इति चेत् कान्तासम्मिततया सरसतामापाद्य उपदिशति इत्यत्र विशेषः।

एवं काव्यप्रयोजने ज्ञाते काव्यभेदाः प्रकृतनाटकस्थानं निरूपणायोच्यन्ते।

---

1. जगन्नाथसिद्धान्तपरिशीलनम् पृ. 68-69.
2. का.प्र. प्रथमोल्लासः पृ. ५

**३.४. काव्यभेदाः :-**

**३.४.१. मम्मटोक्तकाव्यविभागः :-**

मम्मटः काव्यप्रकाशे काव्यगतव्यङ्ग्यार्थमाधारीकृत्य उत्तम-मध्यम-अधमम् इति त्रिधा विभक्तवान्।

**१. उत्तमम् :-** तद्यथा- **इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्यात् ध्वनिः बुधैः कथितः**[1] इति। यस्मिन् काव्ये वाच्यार्थात् व्यञ्जनाव्यापारगम्यः व्यङ्ग्यार्थः अधिकचमत्कारकारि तद्ध्वनिः इति तत् काव्यञ्च उत्तमम् इति पण्डितैः संज्ञा कृता इति।

**२. मध्यमम् :- अताद‍ृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्**[2] इति। यस्मिन् काव्ये वाच्यार्थात् व्यङ्ग्यार्थः (चमत्कारार्थः) अतिशायी न भवति तत् गुणीभूतव्यङ्ग्यम् इति, तत् काव्यं च मध्यमम् इति ज्ञायते।

**३. अधमम् :-** द्विविधम्। **शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्**[3]**।** अवरं नाम अधमम् इति। चित्रं नाम गुणालङ्कारयुक्तम्। अव्यङ्ग्यञ्च स्फुटप्रतीयमानार्थरहितमिति ज्ञेयम्। गुणालङ्कारसहितं स्फुटप्रतीयमानार्थरहितं शब्दगतं काव्यं शब्दचित्रम् इति, अर्थगतं च अर्थचित्रम् इति ताद‍ृशं काव्यञ्च अवरम् इति व्यवह्रियते।

प्रायशः ध्वनिवादिनः अमुमेव विभागम् अभ्युपगच्छन्ति। पण्डितराजस्तु चमत्कारं काव्यविभाजकोपाधित्वेन स्वीकृत्य, काव्यचातुर्विध्यं मेने।

**३.४.२. प्रकारान्तरेण काव्यद्वैविध्यम् :-**

तच्च काव्यं स्वरूपस्वभावात् द्विधा विभज्यते - द‍ृश्यं श्रव्यं च। श्रव्यं काव्यम् - काव्य-महाकाव्य-खण्डकाव्य-चम्पूकाव्य-गद्यकाव्य-स्तोत्रकाव्य-गीतिकाव्यादिभेदेन बहुविधम्।

**३.५. द‍ृश्यकाव्यम् :-**

अभिनेयं भवति। तत्र च नटादौ रामादिस्वरूपारोपः भवति। अतः द‍ृश्यं काव्यं **रूपकम्** इति उच्यते। उक्तं च साहित्यदर्पणे विश्वनाथेन-

1. का.प्र. प्रथमोल्लासः पृ. १५
2. का.प्र. प्रथमोल्लासः पृ. १८
3. का.प्र. प्रथमोल्लासः पृ. १९

**दृश्य-श्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।**
**दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्।।**[1] इति।

एवं दशरूपके च धनञ्जयेन - **अवस्थानुकृतिः नाट्यम्...। रूपकं तत्समारोपात्...।**[2] **वस्तु-नेता-रसस्तेषां भेदकः।**[3] इत्यादिना नाटकस्य स्वरूपम् उक्तम्। काव्योपनिबद्धधीरोदात्त-धीरोद्धत-धीरशान्त-धीरललितनायकानाम् तत्तन्नायिकानां तथान्येषां पात्राणां च अवस्थानुकारः आङ्गिक–वाचिक-आहार्य-सात्त्विकरूपचतुर्विधाभिनयेन तादात्म्यापत्तिः नाट्यम्। तदेव नाट्यं दृश्यमानतया रूपम् इति व्यवह्रियते, नीलादिरूपवत्। तत्तत्पात्रावस्थानुकरणेन नटेषु अनुकरणशीलेषु तादात्म्यापत्तिः सम्भवति।

यथा नटः दुष्यन्तपात्रम् अभिनयन् तस्य प्रत्येकप्रवृत्तिं (वेष-भूषादिभिः) लभते। सामाजिकः तं नटं दुष्यन्त एवायम् इति मन्यते। नाटे दुष्यन्ते च अभेदं पश्यति। अतः धनञ्जयेन सूक्तम् **अवस्थानुकृतिः नाट्यम्** इति। तादृशं नाट्यं न केवलं श्रव्यं भवति अपि तु रङ्गमञ्चे अभिनेयमानस्सन् चक्षुरिन्द्रियग्राह्यत्वात् रूपम् इति, दृश्यमानत्वात् दृश्यम् इति च व्यवह्रियते। नाट्यमेव रूपकम् इत्यपि अभिधीयते। यथा - रूपकालङ्कारे **मुखं चन्द्रः** इत्यत्र मुखे चन्द्रस्य आरोपः क्रियते तथा नाट्ये नटेषु तत्तद्रामादिपात्राणाम् अवस्थायाः आरोपः क्रियते इत्यतः रूपकम् इति।

एवं च इन्द्रः पुरन्दरः शक्रः इतिवत् नाट्यम्, रूपम्, रूपकम् इति शब्दत्रयस्य प्रयोगः।

धनञ्जयानुसारं रूपके तत्त्वत्रयं प्रमुखम् **वस्तु-नेता-रसः** इति। तदाश्रित्य च रूपकस्य विभाजनम्। अत्र रूपके रसस्य महत्त्वम्[4] उररीक्रियते। रसनिष्पत्त्यै आनन्दोपलब्ध्यै च नाट्यस्य रचना। रूपकं तत्त्वत्रितयमाधारीकृत्य च दशधा भवति। तद्यथा -

**३.६. रूपकभेदाः :- नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति।। ८।।**[5]

1. सा.द. ६.१
2. द.रू. प्रथमप्रकाशः श्लो. ७. पृ. ४.
3. द.रू. प्रथमप्रकाशः श्लो. ९. पृ. ६.
4. द.रू. प्रथमप्रकाशः पृ. ४. रसानाश्रित्य वर्तमानं दशप्रकारकम्।
5. द.रू. प्रथमप्रकाशः श्लो. ९. पृ. ६.

इति रूपकाणि दश। तत्र - **१. नाटकम्**[1] **:-** इतिवृत्तं प्रसिद्धम्। नायकः धीरोदात्तः। अङ्गिरसः शृङ्गारो वीरो वा। अङ्काः पञ्चतः (५) - दशपर्यन्तम् (१०) भवेयुः।

अथ नाटकस्य वेदसम्मतत्वप्रकाशनाय नाटकोत्पत्तिप्रकारो निरूप्यते।

**३.७. नाटकोत्पत्तिः :-**

भारतीयनाटकोत्पत्तिविषये नानावादाः भारतीयैः पाश्चात्त्यैश्च विमर्शकैः कृताः। तत्र भारतीयपरम्परा इत्थं वर्तते। तत्र भरतमुनिः स्वनाट्यशास्त्रे नाटकोत्पत्तिं वर्णयन् देवानां प्रार्थनामङ्गीकृत्य चतुर्वेदेभ्यः अर्थात् ऋग्वेदात् **पाठ्यम्,** समावेदात् गीतम्, यजुर्वेदात् अभिनयम्, अथर्ववेदात् च रससामग्रीञ्च आदाय पण्डितपामरजनरञ्जकं पञ्चमवेदं नाट्यवेदम् अजृसत् इत्यकथयत्। इदं वृत्तमेव भारतीयनाटकानां मूलमिति भारतीयैः मन्यते। तद्यथा -

**तस्मात् सृजापरं पञ्चमं सार्ववर्णिकम्।**[2]

**एवं संकल्प्य भगवान् सर्ववेदाननुस्मरन्।**
**नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्।।**[3]

**जग्राह वेदम् ऋग्वेदात्, सामभ्यो गीतम् एव च।**
**यजुर्वेदात् अभिनयान्, रसान् आथर्वणादपि।।**[4] इति।

धनञ्जयोऽपि स्वदशरूपके नाट्योत्पत्तिः वेदमूला इति निगदति तद्यथा -

**उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरिञ्चि-**
**श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।**
**शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे**
**नाट्यानां किन्तु किञ्चित्प्रगुणरचनया लक्षणं संक्षिपामि।।४।।**[5] इति।

---

1. एवं नाटकस्य लक्षणानां ज्ञानाय अनुबन्धः - ४ द्वितीयांशः "दशरूपकस्थनाटकलक्षणानि" द्रष्टव्यः। अन्येषां रूपकभेदविवरणज्ञानाय अनुबन्धः - ३ प्रथमपुटः द्रष्टव्यः।
2. नाट्य. प्रथमाध्यायः श्लो.१२ पृ. १०
3. नाट्य. प्रथमाध्यायः श्लो.१६ पृ. ११
4. नाट्य. प्रथमाध्यायः श्लो.१७ पृ. १३
5. द.रू. श्लो.४ पृ. २

अर्थात् ब्रह्मा नाट्यनाम्ना पञ्चमवेदं कृतवान्। तस्मिन् अभिनयप्रयोगं हस्त-पादादि-समायोगेन भरतमुनिः अकरोत्। परमेश्वरः उद्धतं ताण्डवं कृतवान्। सुकुमारं नृत्यं च पार्वती कृतवती। तादृशनाट्यवेदस्य सम्पूर्णं लक्षणं कर्तुं कः समर्थः। नाम अस्मादृशलौकिकप्राणिभिः देवता-महापुरुषादिभिः निबद्धस्य नाट्यशास्त्रस्य लक्षणकरणम् यद्यपि असम्भवग्रस्तमेव तथापि तस्य नाट्यैकदेशस्य दशरूपस्य संक्षेपेण लक्षणं क्रियते।

इत्थं भारतीयनाट्यशास्त्रं वेदमूलम्।

**३.८. नाटकानां महत्त्वम् :-**

नाट्ये न कोऽपि भावः विषयः वा अवशिष्यते। सर्वे अपि रसाः अत्र निबद्धाः। यथास्थानं पुरुषार्थचतुष्टयं चतुर्वर्गो वा अत्र संगृह्यते।

**क्वचिद्धर्मः, क्वचित् क्रीडा, क्वचिदर्थः, क्वचिच्छमः।**
**क्वचिद्धास्यं, क्वचिद्युद्धं, क्वचित् कामः, क्वचिद्वधः।।**[1]

अत्र लोकवृत्तम् अनुसृत्य नानाभावाः विषयाश्च उपस्थाप्यन्ते। तच्च अनेन भरतश्लोकेन ज्ञायते तद्यथा-

**नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।**
**लोकवृत्तानुकरणं नाट्यमेतत् मया कृतम्।।**[2] इति।

अत्र क्वचित् वैदिकी शिक्षा, क्वचित् ऐतिह्यम्, क्वचित् आख्यानम्, क्वचित् आचार-विचारशिक्षा, क्वचित् कर्तव्यबोधनं च समाविश्यते।

**वेदविद्येतिहासानाम् आख्यानपरिकल्पनम्।**
**विनोदकरणं लोके नाट्यमेतत् भविष्यति।।**[3]

**श्रुति-स्मृति-सदाचार-परिशेषार्थ-कल्पनम्।**
**विनोदजननं लोके नाट्यमेतत् भविष्यति।।**[4]

---

1. नाट्य. प्र. १०८. पृ. ३४.
2. नाट्य. प्र. ११२. पृ. ३८.
3. नाट्य. प्र. ११९ (अस्यानन्तरं वर्तते) पृ. ४२.
4. नाट्य. प्र. ११९ (अस्यानन्तरं वर्तते) पृ. ४२.

न केवलम् एतदेव, अपि तु नाट्यं सर्वेषाम् अपि अभीष्टं साधयति। यस्य यदेव अभीष्टं तस्य तदेव प्रापयति। यस्य यद्विषयकाभिरुचिः सः तत्र तद्विषयिणीं सामग्रीम् उपलभते। तद्यथा - धर्मनिष्ठानां कृते धर्मचर्चा, विषयिणां कृते विषयोपभोगः, अज्ञानां कृते ज्ञानोपदेशः, सुधियां ज्ञानवर्धनम्, धनिनां विलासः, अर्थार्थिनाम् अर्थोपार्जनसाधनम्। एतदेवोक्तं भरतेन-

**धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम्।**
**निग्रहो दुर्विनीतानां मत्तानां दमनक्रिया।।**[1]

**क्लीबानां धाष्ट्र्यजननम् उत्साहः शूरमानिनाम्।**
**अबुधानां विबोधश्च वैदुष्यं विदुषाम् अपि।।**[2]

**ईश्वराणां विलासश्च स्थैर्यं दुःखार्दितस्य च।**
**अर्थोपजीविनाम् अर्थो धृतिः उद्विग्नचेतसाम्।।**[3]

एतदेवाश्रित्य महाकविना कालिदासेन उच्यते मालविकाग्निमित्रे—

**देवानाम् इदम् आमनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्।**
**रुद्रेणेदम् उमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।।**[4]

**त्रैगुण्योद्भवम् अत्र लोकचरितम् नानारसं दृश्यते।**
**नाट्यं भिन्नरुचेः जनस्य बहुधाऽप्येकं समाराधनम्।।**[5]

सहृदयैरेव रत्यादिवासनाम् आश्रित्य रसास्वादः अनुभूयते। स्वचेतोगतवासनाश्रयेणैव प्रेक्षकैरपि रसास्वादनं क्रियते। न स्यात् चेत् वासना प्रेक्षकेषु तर्हि ते जीवन्तोऽपि मृतोपमाः काष्ठपाषाणादिसंकाशाश्च। उच्यते विश्वनाथेन च-

**न जायते तदास्वादः विना रत्यादिवासनाम्।**
**सवासनानां सभ्यानां रसस्य आस्वादनं भवेत्।।**

**निर्वासनास्तु रङ्गान्तः काष्ट-कुड्य-अश्मसन्निभाः।**[6]

---

1. नाट्य. प्र. १०९. पृ. ३७. 2. नाट्य. प्र. ११०. पृ. ३७. 3. नाट्य. प्र. १११. पृ. ३८.
4. मालविकाग्निमित्रम्, १.४ 5. नाट्य. प्र. १७. पृ. १३. 6. सा.द. विश्वनाथः

जीवितम् इदं सम-विषमम्, सुख-दुःखाद्यनुभूतिप्रधानम्। खिन्नचेतोविनोदाय नाट्यं प्रेष्टं साधनम्। नाट्यं विषण्णस्य विषादापहम्। खिन्नस्य खेदापनोदनम्, आर्तस्य आर्तिहरम्, आदिपीडितस्य मानसिकोपचारसदृशम्, उत्पीडितस्य मार्गप्रदर्शकम्, यथायथं सर्वेषाम् उपकारि च। श्रान्तचित्तविनोदनस्य नान्यसाधीयान् पन्थाः। कानिचित् नाटकानि उपदेशप्रदानि। कानिचित् शिक्षाप्रदानि। कानिचित् देशभक्ति-भगवद्भक्ति-समाजसेवा-परोपकारादिभावसमन्वितानि च प्राप्यन्ते।

एवं नाटकानि सर्वजनहृद्यानि सर्वविधज्ञानप्रदायकानि सर्वमनस्तोषकाणि इति उत्प्रेक्ष्य एव उपगीयते **काव्येषु नाटकं रम्यम्** इति।।

**३.९. काव्येषु नाटकं रम्यम् :-**

**काव्येषु नाटकं रम्यम्** इति प्रथिता सूक्तिः। नाटकानां रम्यत्वं जिज्ञासितं चेत् स्वानुभूत्यैव तेषां महत्त्वं स्फुटीभवति। काव्यं श्रव्यम्। तत्र अध्ययन-अध्यापनादिद्वारा तत्त्वार्थबोधः। नाटकेषु तु श्रवणदर्शनादिद्वारा रसानुभूतिः। वेष-भूषाद्यलङ्करणात्, प्राकृतिकदृश्यसंयोजनात्, आङ्गिक-वाचिकाद्य-भिनयसम्मिश्रणात्, नृत्यगीतलास्यविलासात् न केवलं सचेतसाम् एव रसास्वादः मनस्तोषश्च, अपि तु आबालवृद्धं शिक्षितानाम्, अशिक्षितानाम्, नाराणां नारीणां च आनन्दावाप्तिः मनोरञ्जनं च भवति। सकलेऽपि भुवने नाट्यानां प्रसिद्धेः एतदेव मूलम्। उक्तं भरतेन-

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगः, न तत् कर्म, नाट्येऽस्मिन् यन्न दृश्यते।।**[1]

नाट्यस्य महत्त्वं नाट्यशास्त्रे भरतेन सविस्तरं व्याख्यायते। तद्यथा-

**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।**
**लोकोपदेशजननं नाट्यमेतत् भविष्यति।।**[2]

**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतत् भविष्यति।।**[3]

1. नाट्य. प्रथमाध्यायः श्लो. ११६. पृ. ३९.
2. नाट्य. प्रथमाध्यायः श्लो. ११५. पृ. ३९.
3. नाट्य. प्रथमाध्यायः श्लो. ११४. पृ. ३८.

उत्तम-अधम-मध्यमानां सर्वेषाम् अपि नृणां हितोपदेशकारि धृतिदं विनोदजनकम् आनन्दप्रदं चैतत् भविष्यति। तद्यथा महर्षिभरतोक्तावेव—

**उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।**
**हितोपदेशजननं धृति-क्रीडा-सुखादिकम्।।**[1]

उदाहरणार्थम् अभिज्ञानशाकुन्तलं महाकवेः कालिदासस्य प्रतिभायाः परिपाकेन, रचनाकौशलेन, भावसौष्ठवेन, भाषामाधुर्येण, सरसाभिव्यक्त्या, सालंकृतपदावल्या प्रकृतिचित्रण-पाटवेन, रसपरिपाकेन[2]नीरसकथानके सरसतासम्पादनेन, मूलकथापरिवर्तने नैपुण्येन च काव्येषु नाटकस्य अभिज्ञानशाकुन्तलस्य सर्वोत्कृष्टत्वं सर्वैः साहित्यसहृदयतल्लजाः मन्वते। अत एव अभिज्ञैः कथ्यते - **काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला** इति।

एतादृशं संस्कृतरूपकसाहित्यं पुरातनम् अतिविस्तृतम्। संस्कृते बहवो रूपककर्तारः सन्ति। सन्दर्भेऽस्मिन् तादृशरूपकर्तृणां रूपकाणां च केषाञ्चित् नामतःकीर्तनं विधास्यते।

### ३.१०. प्रसिद्धरूपककाराः तेषां रूपकाणि च :-

संस्कृतनाटकसाहित्ये भास-कालिदास-अश्वघोष-शूद्रक-विशाखदत्त-भट्टनारायण-भवभूति-मुरारि-राजशेखर-क्षेमेन्द्र-वामनभट्टबाण-जयदेव-रामचन्द्र-श्रीकृष्णदेवराय-अप्पय्यदीक्षित-वेङ्कटाध्वरिप्रमुखाः विलसन्ति प्रसिद्धनाटककाराः। तेषां दार्शनिकग्रन्थप्रणयने इव अत्रापि आदरः वरीवर्ति। महाकविकालिदासस्य अभिज्ञानशाकुन्तलम्, महाकविभवभूतेः मालतीमाधवम्, शूद्रकस्य मृच्छकटिकम् इत्यादिषु एतादृशरूपकेषु श्रीवेङ्कटाध्वरिविरचितं **प्रद्युम्नानन्दीयनाटकम्** अपि अन्यतमम्।

4. नाट्य. प्रथमाध्यायः श्लो. ११३. पृ. ३८.
5. अभिज्ञानशाकुन्तलम् प्रथमसर्गः।

**सरसिजमनुविद्धं शैवलेनापि रम्यं**
**मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा शैवलेनापि तन्वी,**
**किमिव हि मधुराणां मण्डनं नाकृतीनाम्।। २०।।**

### ३.११. प्रद्युम्नानन्दीयनाटकम् - तद्वैशिष्ट्यञ्च :-

षोडशशताब्दप्रभवीयेन श्रीमद्वेङ्कटाध्वरिणा शताधिकग्रन्थकर्त्रा रचितेषु ग्रन्थेषु **प्रद्युम्नानन्दीयनाटकम्** अन्यतमम् अस्ति। श्रीकृष्णपुत्रस्य प्रद्युम्नस्य रतेः च प्रणयवृत्तान्तः अत्र वर्णितः विषयः अस्ति। नाटकमिदम् उदारवीरशृङ्गारोपेतं नव्यं श्लेषयमकचमत्कारविचित्रितं, सुरुचिरं, सुमनोहरम् अनितरसाधारणरीत्या कविना निर्मितम्। अत्रत्य शैली गम्भीरा, उत्कृष्टा च।

नाटकमिदं धर्मार्थकाममोक्षाणां सरसशैल्या सन्धायकं विद्योतते। अत एव एतन्नाटकं भगवतः तिरुपतिवेङ्कटेशस्य उत्सवेषु प्रदर्शनायोग्यतां समपद्यत इति N.C.C[1] मध्ये मातृकासु[2] च उट्टङ्कितम्। सामान्यतः नाटकेषु शृङ्गाररसप्रधानेषु नायिका-नायकयोः प्रथमाङ्के समागमः अनन्तरं कारणान्तरवशात् द्वितीयाङ्के विरहवेदनानुभवः इत्यादिसरणिः प्रक्रियामाणा सन्दृश्यते। परं नाटकेऽस्मिन् प्रथमाङ्के सुन्दर्याः नायिकायाः न केवलं सन्दर्शनम्, किन्तु प्रथममेव तत्सखीभ्यां नायकस्य प्रत्यभिज्ञाने क्रियमाणेऽपि प्रत्यभिज्ञानाभावः परदारत्वेन तस्याः निराकरणम्, निराकरणेऽपि तस्यां नायकस्य सहजानुरागबन्धः इत्यादिमनस्तत्त्वगाम्भीर्यसम्बन्धिनः बहवो विषयाः कविना सहृदयहृदयनिखातं यथा भवन्ति तथा निरूपिताः। भारतीयात्युत्कृष्टव्यक्तिधर्माणां नाटकमिदं दर्पणायते। समाजेऽस्मिन् माता-पितृसम्बन्धः इदानीमत्यन्तदुर्बलः दरीदृश्यते, नाटकदर्शनेन सामाजिके तादृशीसत्सम्बन्धः जागरितो भवति।

किन्तु नाटकेऽस्मिन् न केवलं नायिकासमागमः कवेः अभिप्रेतः अपि तु भगवत्स्वरूपयोः रुक्मिणी-कृष्णयोः मातृ-पित्रोः समवधाने तत्सरूपयोः रति-मन्मथभावेन अवस्थितयोः मायावती-प्रद्युम्नयोः निष्प्रत्यूहं समागमः कवेः तात्पर्यविषयीभूतः, येन मानवजीवने मानवीयसफलजीवनप्रदात्रोः माता-पित्रोः महत्त्वं व्यक्तीभवति। तादृशस्यास्य भारतीयसंस्कृतिरीत्या आलंकारिकदृष्ट्या मनोवैज्ञानिकदृष्ट्या च विशिष्टस्यास्य नाटकस्य सम्पादनम् अध्ययनञ्च आत्मनः समाजस्य च जीवनसफलतायै हेतुः भवतीति तत्सम्पादने यत्नः क्रियते।

---

1. N.C.C. "Staged at the festival of lord Śrīnivāsa of Tirupati."
2. GOMIL Descriptive Catalogue P. 8422 MS. No. 12545

   The drama is said to have been staged on the occasion of the festival celebrated in honour of God Śrīnivāsa of Tirupati.

नाटकादौ नायकस्य प्रत्यभिज्ञानाभावेन प्रत्यभिज्ञानोपायसम्पादनं सर्वमपि नायिकया मायावत्या क्रियते। ततः लब्धप्रत्यभिज्ञेन नायकेन नायिकायाः विपन्निवारणे शम्बरवधद्वारेण महान् यत्नः क्रियते। येन नायिका-नायकयोः उभयोरपि विलक्षणं समप्राधान्यं नाटकेऽस्मिन् व्यक्तीभवति। एवं नायकयोः द्वयोरपि समुचितक्रियाशीलतानिरूपकमिदं नाटकं नाटकान्तरेभ्यः अत्यन्तविलक्षणम्। ततः स्वयं कामितेन निराकृतायाः अपि नायिकायाः प्रत्यभिज्ञानशून्ये नायके कोपाभावः नायिकायाः उदात्ततां प्रौढिमाणं च द्योतयति।

एवम् अत्यन्तसुन्दरस्य नाटकस्यास्य सम्पादनम् अवश्यकर्तव्यमिति तत्प्रयत्नो विधीयते। एवं महोत्कृष्टतमम् इदं नाटकं विद्वज्जनपरितोषाय समर्पणीयमिति धिया अनुसन्धात्रा स्वीकृतम्।

**४. काव्यवैशिष्ट्योपसंहारः :-**

एवमत्र वेदवाङ्मयस्य पुराणवाङ्मयस्य च परिचयः कृतः। तयोः महत्त्वं च निरूपितम्। तयोः उत्तरोत्तरं पाक्षिकमादरणञ्च सूचितम्। तद्विलक्षणतया काव्यस्य सर्वपाठकजनग्राह्यत्वेन वैशिष्ट्यं निरूपितम्। काव्यस्य स्वरूपं वर्णितम्, काव्यप्रयोजनानि च प्ररूपितानि। काव्यस्य सामान्यभेदाः, रूपकस्य प्रकाराश्च प्रदर्शिताः। नाटकोत्पत्तिः, नाटकानां महत्त्वं, रमणीयता च प्रतिपादिता। अन्ते प्रद्युम्नानन्दीयनाटकस्य वैशिष्ट्यं च न्यरूपि।

अथ नाटककर्तुः परिचयः, तस्य कृतयः, मातृकासम्पादनम् इत्यादिविषयाः प्रतिपाद्यन्ते।।

# ४. ग्रन्थकर्तुः परिचयः

**१. श्रीमद्वेङ्कटाध्वरिः**

संस्कृतवाङ्मये रामानुजानुयायिसम्प्रदायीयः काञ्चीपुरवासी अरशाणफालैग्रामीयः शताधिकग्रन्थकर्ता महाकविः श्रीमद्वेङ्कटाध्वरिः श्रेष्ठतमः। अस्य मातुः नाम सीताम्बा। पिता च ख्यातः श्लेषयमकचक्रवर्ती श्रीरघुनाथदीक्षितः। **अप्पयाचार्यः, अप्पयगुरुः** इत्युपाह्वयस्य श्रीनिवासमखिनः पौत्रः आसीत्। एतत् सर्वं स्पष्टतया प्रद्युम्नानन्दनाटकपुष्पिकातः[1] किञ्चिज्ज्ञातुं शक्यते।

कवयः त्रिप्रकाराः - १. स्पर्धया महाकवित्वयशोलिप्सया विषयेषु विरक्तिं वहन्तः प्रथमश्रेण्यामायन्ति, स्तोत्रकाव्ये वेदान्तदेशिकादयः। यथा - **पादुकासहस्रम्**[2]।

२. ये च वैषयिकीं भोगतृष्णाम् अजहतः शब्दार्थयोरुपरि स्वाधिकारमिव प्रज्ञामपि नवनवोन्मेषां विचित्रार्थविष्फारणपटीयसीं प्रदर्शयन्तः, ते द्वितीयश्रेण्यामायान्ति मयूरादयः। यथा- **सूर्यशतकम्**।

---

1. अत्रैवानुसन्धानग्रन्थस्य तृतीयाध्याये प्रद्युम्नानन्दीयनाटकस्य प्रथमाङ्कस्य पुष्पिकायाम् - पृ. 82

***।। इति श्रीवाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवप्पयाचार्यतनूभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथार्ययज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन सीताम्बागर्भसम्भवेन काञ्चीनगरवास्तव्येन वेङ्कटाचार्ययज्वना विरचिते प्रद्युम्नानन्दनाम्नि नाटके प्रथमोऽङ्कः।।***

**H.C.S.L.** P. 513-514. **Veṅkaṭādhvarin** or **Veṅkaṭācārya** was the son of Raghunātha and Sītāmbā of the Ātreyagotra. His grand father Śrīnivāsa known as Appayaguru was the nephew of the great Tātācārya (Pañcamatabhañjana Tātācārya)

2. लक्ष्मी. रत्न. पृ. ३

३. ये तु मुग्धकवयः प्रभवन्तोऽपि सरसकाव्यनिर्माणे विविधराजसभासु प्रविष्टाः सम्माननाम् आकांक्षन्तः वानरीमिव वाग्देवीं नर्तयन्ति गृहे गृहे इत्युक्तरीत्या नृप-तत्पत्नी-पुत्रादिमिथ्यास्तवेन अमलामपि स्ववाणीं कलुषयन्ति उदरम्भरयः - ते एते तृतीयायां श्रेण्याम् आतिष्ठन्ते, ईदृशास्तु विद्यानाथादयः। यथा - **प्रतापरुद्रयशोभूषणम्, प्रतापरुद्रकल्याणम्।**

तेषु तत्रभवान् सकल-कविकुलमूर्धन्यस्सर्वतन्त्रप्रतिभाविशेषश्श्रीमदात्रेयवेङ्कटाध्वरिकविः द्वितीयश्रेण्यां निवेशनमर्हति। एष हि महाकविः अधिगतशास्त्रसारोऽपि काव्यपथे -

१. विश्वगुणादर्शचम्पू-वरदाभ्युदयचम्प्वादि - प्रबन्धानाम्,
२. प्रद्युम्नानन्दीय-शृङ्गारदीपादि - रूपकाणाम्
३. सुभाषितकौस्तुभादि - चाटुकाव्यानां

इत्यादिप्रबन्धानां निर्माणेन लोके स्वकीर्तिं प्रतिष्ठापयामास।

शास्त्रेषु वैदुष्यम्, पटीयसी काव्यनिर्माणप्रतिभा च **वरदाभ्युदयचम्पूप्रबन्धे** कविरसौ स्वस्य चतुश्शास्त्रपारावारपारीणतां रसालङ्कारसरणिमादृत्य विविधकाव्यनिर्माणधुरीणतां च स्वयमित्थं प्रकटयामास।

**व्यायामं गमिता त्वलङ्कृतिपथे व्यापारिता व्याकृतौ**
**तर्कारण्यगतागतैः श्रमवती तन्त्राङ्गणे नर्तिता।**
**त्रय्यद्रेरधिरोपिता च शिखरं तर्षादियं भारती**
**गम्भीरं गजभूधरेश्वरकथागङ्गाझरं गाहते।।** इति।।

अनल्पकल्पनाभरिते काव्यपथे इव **व्याकरणे-** महाभाष्यस्फूर्तिं, **तर्कशास्त्रे-** मणिसारखण्डनं, **मीमांसायाम्-** विधित्रयपरित्राणं, **विशिष्टाद्वैतवेदान्ते-** नयद्युमणिदीपिकां च प्रणीतवानेषः स्वीयां चतुश्शास्त्रपारीणतां प्राचीकशत्। चम्पूग्रन्थानेकान्, नाटकानि च त्रि-चतुराणि, लक्ष्मीसहस्र-श्रवणानन्द-प्रभृतीनि च विविधस्तोत्राणि एतत्कर्तृकाणि पठतामस्य श्लेषयमकचक्रवर्तिबिरुदम् अन्वर्थमेवेति सहृदयानां चेतसि प्रतिभायात्। कल्पनाप्रवाहकरम्बितां विसृत्वरीं प्रतिभाम् अस्य साक्षात् अध्यक्षयद्भिः समकालिकैः पण्डितप्रवरैः अयमपि कविः सबुहमानम् उपश्लोकित इति कञ्चित् मुक्तकश्लोकं श्लेषचमत्कृतं रसिका उदाहरन्ति।

यथा - **वेङ्कटाध्वरिणाऽनेन जितौ गुरुफणीश्वरौ।**
**धिषणाहीनतां प्राप्तौ जग्मतुर्जीवशेषताम्।।**[1] इति।

प्रद्युम्नानन्दीयनाटके प्रस्तावनायां सूत्रधार-नटयोः सम्भाषणमुखेन नाटककर्त्रा वेङ्कटाध्वरिणैव स्ववंशावलीम्, जीवनगताः विशेषाश्च इत्थं व्यजिज्ञपत्।

**सूत्रधारः** :- ... मारिष! तदेतदवधार्यताम् —

**आविर्भावमुपेयिवान् शुभयश*स्यत्रेः पवित्रे कुले***
***श्रीमानप्पयदेशिकाध्वरिमणि*-जार्गर्ति कीर्त्या भुवि।**
**अस्तोकैर्यदनुष्ठितैर्मखवरैर्हस्तिक्ष्माभृत्पतिः**
**तां वैतानवपाहविः कबळनक्रीडां पुनस्स्मारितः।। १.५।।**

अपि च स एव संस्कृतनाम्ना—

**अत्रेरत्रपवित्रयन्नभिजनं जागर्ति बोधाम्बुधिः**
**श्रीमानाश्रयतां भवार्णवतरिश्-*श्रीश्रीनिवासाभिधः*।**
**यूपो यत्कृतवाजपेयमखभूवेदिप्रतिष्ठो वह-**
**त्याशामण्डनकीर्तिपाण्डरजयच्छत्रैकदण्डश्रियम्।। १.६।।**

किञ्च— **यतिपतिमतधुर्यो यस्य सिंहासनस्थ**
**क्षितिपतिगुरुरुच्चैरद्भुतौदार्यधैर्यः।**
**अजनि विमलशीलो मातुलो भूतलोद्यत्**
**कुमततिमिरसूर्य-*स्तातयाचार्यवर्यः*।। १.७।।**

तस्य किल तनूभवः -

**आत्रेयान्वयजृम्भितस्सततमप्यन्तर्मुकुन्दं वहन्**
**सारज्ञै *रघुनाथदीक्षित*-कविक्षीराब्धिराराध्यते।**
**प्रौढालङ्करणा पवित्रपदविन्यासा गभीरध्वनिः**
**यस्यास्यादुदिता ददाति कवितास्वर्धेनुरर्थान् बहून्।। १.८।।**

---

**1.** लक्ष्मी. रत्न. पृ. ३

किञ्च— **परमप्रभयाऽतुलो कलङ्कः कृतदानश्च महाच्छविः प्रहस्ते।**
**भुवि भाति विधूतदूषण-*श्रीरघुनाथार्यमखी* यथार्थनामा।। १.९।।**

**तस्यैतस्य तनूभवः कविरयं त्र्यच्छलव्याक्रिया**
**तर्कप्रौढचमत्क्रियासु निपुणो मीमांसकोत्तंसकः।**
**तत्तादृक्कविता सरोजसविता दत्ताशयश्श्रीपतेः**
**शेषक्ष्माधरवासिनश्चरणयो-*श्श्रीवेङ्कटार्याध्वरी*।। १.१०।।**

तेन किल निबद्धं प्रद्युम्नानन्दाभिधानमभिनवम् नाटकमभिनयद्भिरस्माभिरानन्दयितव्या परिषदेषा।

**नटः** :- हृदयङ्गमोऽयं परिषदभितोषणोपायः। सारग्राही खल्वसि। तथा हि—

**कल्पन्ते विदुषां मुदे स्मरवधूकर्णावतंसोत्पल-**
**स्वैरोदञ्चितशीधुपूरसुहृद-*श्श्रीवेङ्कटार्योक्तयः*।**
**श्रोत्रैर्या सुचिरं निपीय दधते शृङ्गारपारङ्गताः**
***श्रीमत्तिर्मलरायपण्डितमुखा*-श्श्लाघाविलोलं शिरः।। १.११।।**

किं बहुना— ***एकेनैव दिनेन काव्यरचनामीष्टे* विधातुं तथा**
**शास्त्राणामपि शक्नुयात् कलयितुं टीकामनायासतः।**
**शक्तो युक्तिमहोर्मिभिश्शमयितुं दुर्वादिगर्वानलं**
**दासश्श्रीसखसेविनां स जयति *श्रीवेङ्कटार्याध्वरी*।। १.१२।।**

अपि च— **अच्छलवादरणेच्छो रक्षोपायक्षमात् स *रघुनाथात्*।**
**अतिथिजनकोमलमना जातश्श्रयते पराङ्कुशस्य स्मृतिम्।। १.१३।।**

**सूत्रधारः :-** साधु मारिष! सर्वमपि दैवानुग्रहात् साम्प्रतमुपपन्नमिति नाट्यसामग्रीः पश्य।

***आत्रेयस्य कवेरुदारफणिति*-श्श्रोत्रेषु हर्षं सतां**
**दुग्धे मुग्धवधूजनाधरसुधाऽहङ्कारहुङ्कारिणी।**
**सारङ्गाश्च सभासदो वयममी सर्वोत्तरानर्तने**
**प्रायः किं बहुना चिरात्फलति नः प्राचीनभाग्यागमः।। १.१४।।** इति।

अथ अत्रिमहर्षि-गोत्रापत्यानां पट्टिका अनन्तरपुटे दीयते, तदनन्तरं तद्वंशावलिः कथ्यते।

## २. वंशावलिः :-

### २.१. अत्रिमहर्षि-गोत्रापत्यानि

↓

**प्रणतार्तिहराचार्यः**

(भाष्यकारैः - वेदान्तोदयन इति बिरुदम्, किडाम्बि आच्चान्- इति सम्प्रदायनाम, मडप्पलनि आच्चान् इति महानसिकतया द्राविडभाषास्थ नाम।)

↓

**रामानुजाचार्यः**

↓

**श्रीरङ्गाचार्यः (पद्मनाभाचार्यः)**

↓

**रामानुजाचार्यः (कीर्तिचन्द्रिकां व्यतनोत्)**

(वादिहंसाम्बुदाचार्य इति बिरुदं, किडाम्बि अप्पुल्लार् - इति सम्प्रादय नाम, कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य वेदान्तदेशिकस्य मातुलः आचार्यश्च - न्यायकुलिशादिप्रबन्धकर्ता, अस्य गुरुः - **वात्स्य वरदाचार्यः** "नडादूर अम्माळ्" इति तमिळग्रन्थं व्यरचयत् अयं गुरुः।)

↓

→ **वरदाचार्यः** → **वेङ्कटाचार्यः** → **रामानुजाचार्यः** → **रङ्गनाथाचार्यः** → **रामचन्द्राचार्यः** → **प्रणतार्तिहराचार्यः** → **लक्ष्मणाचार्यः** → **वेङ्कटाचार्यः** → **श्रीरङ्गाचार्यः** → **नरसिंहाचार्यः** →

↓

**पद्मनाभाचार्यः**

↓

**सुन्दराचार्यः**
(पेरम्बै ग्रामवासी)

**वरदाचार्यः**
↓
**श्रीनिवासाध्वरिः**
(महादेशिकन् कूटस्थर्)
(बहवोऽग्रहाराः बहवः क्रतवश्चानुष्ठिताः। **अप्पयगुरु** इति प्रसिद्धः। अस्य तिस्रः पत्न्यः आसन्।)

**इष्टिगोपालाचार्यः**
(कावेरीरङ्ग इति नामान्तरेण प्रसिद्धेन भगवता श्रीरङ्गनाथेन विराजमानम् उत्तरनेल्लूरु नगरं स्ववासमकरोत्)

↓

1. प्रथमपत्न्याम्
**१. सुन्दराचार्यः**

2. द्वितीयपत्न्याम्
**१. अन्नावरदाचार्यः**
**२. श्रीनिवासाचार्यः**
**३. वेदान्ताचार्यः** (ताम्रपर्णीवासी)
**४. निर्मङ्गलं ताताचार्यः**

3. तृतीयपत्न्याम्
**१. रघुनाथदीक्षितः**
**(वेङ्कटाध्वरिणः पिता)**
**२. ताताचार्यः** (सन्तानरहितः)
**३. वेङ्कटनाथाचार्यः** (,,)

---

१. **श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी-तत्कृतीनाम् अध्ययनम्** इति ग्रन्थे **जीवनवृत्तम् तत्कृतयः** इति शीर्षके वंशवलीव्यासमधारीकृत्य निर्मिता इयं पट्टिका। पृ. 4-6.

**श्रीनिवासाध्वरिणः तृतीयपत्न्याम् उत्पन्नस्य रघुनाथदीक्षितस्य पुत्रः**

↓

**वेङ्कटाध्वरिः** ***(आत्रेयवंशतिलकः)***

↓

**आत्रेयश्रीनिवासाचार्यः**
(अरशाणिफालै ग्रामवासी)

↓

**१. कृष्णमाचार्यः**
**२. गोपालाचार्य** (आदिकाः)

**२.२. स्वरचितेतरग्रन्थेषु वंशावलिक्रमः :-**

**विश्वगुणादर्शचम्प्वाम्** अयं महाकविः स्वपरिचयम् इत्थं वक्ति-

**काञ्चीमण्डलमण्डनस्य मखिनः कर्नाटभूभृद्गुरोः**
**तातार्यस्य दिगन्तकान्तयशसो यं भागिनेयं विदुः।**
**अस्तोकाध्वरकर्तुरप्ययगुरोरस्यैव विद्वन्मणेः**
**पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते।। २।।**[1]

काञ्चीमण्डलभूषणस्य प्रशस्तयागकर्तुः कर्नाटभूभृतः श्रीकृष्णदेवरायस्य गुरोः पञ्चसंस्कारकर्तुः दिगन्तेषु कान्तयशसः **ताताचार्यस्य,** भागिनेयः श्रीनिवासः **अप्पयगुरुः** इति ख्यातः। वाजपेय-पौण्डरीकादीनां कर्तुः विद्वन्मणेः अस्य अप्पयगुरोः पुत्रः **श्रीरघुनाथदीक्षितो** नाम कविः गुणैः वर्धते - इति श्लोकसारः।

**तत्सुतस्तर्क-वेदान्त-तन्त्र-व्याकृतिचिन्तकः।**
**व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी।। ३।।**[2]

तस्य रघुनाथदीक्षितस्य सुतः तर्क-वेदान्त-मीमांसा-व्याकरणेषु पण्डितः वेङ्कटाध्वरिनामा कविः विश्वस्य गुणानाम् आदर्शमिव (प्रतिपादकमिव) चम्पूप्रबन्धं करोति इति अस्य श्लोकस्य भावः।

1. वि.गु. श्लोकः - २.
2. वि.गु. श्लोकः -३.

विश्वगुणादर्शे विद्यमानयोः द्वितीय-तृतीयश्लोकयोः संक्षेपेण स्वकीयवृत्तं निवेदितं कविना। तस्मादयं श्रीमदप्पयगुरोः नप्ता, श्रीरघुनाथदीक्षितस्य च पुत्र इति ज्ञायते। अयम् ***अप्पयगुरुः,*** "**कुवलयानन्द-चित्रमीमांसा**दिग्रन्थकर्तुः तत्रभवतः **अप्पयदीक्षितेन्द्रात्** भिन्नः"[1] - इत्यवगम्यते।

अत्रत्योऽयम् अप्पयगुरुस्तु ताताचार्यस्य भागिनेयः परोपकाररतश्चासीत् इति निश्चीयते। अनेन ताताचार्येण **सात्त्विकब्रह्मविद्याविलासः** इति प्रसिद्धो वेदान्तशास्त्रग्रन्थो व्यरचि इत्यपि श्रूयते। अयमेवाभिप्रायः विश्वगुणादर्शचम्प्वाः प्रकाशकः श्यामरायविट्ठलमहोदयः विस्तृताङ्ग्ल-भूमिकायाम् इत्थमभाणीत् -

The name of its author is *Veṅkaṭādhvari*, or, as some of our copies read it, *Veṅkaṭācārya*. In the short account of his origin contained in the second and third verses of the work, the author gives his father's name as *Rāghunāthadīkṣita* : the son of *Appaya Guru*. It is also mentioned therein that this Appaya Guru was the nephew (sister's son) of *Tātārya*, the spiritual preceptor of *Kṛṣṇarāya*, king of the *Karnāṭak.*[2]

अयं प्रलयकावेरी नाम्नः कस्यचिद्राज्ञः सभायां प्रमुखः पण्डित आसीत्। अन्याप्येतत्स-म्बन्धिनी लोकवार्ता श्रूयते यत् - अनेन विश्वगुणादर्शकाव्यं स्तुतिनिन्दात्मकं विरचितमिति तस्य देवताप्रकोपात् काणत्वं प्राप्तं, ततश्च स लक्ष्मीसहस्रं विरचय्य जगज्जननीं महालक्ष्मीमस्तौषीत्। तदनु तत्प्रसादात् पुनः पूर्ववद्दृष्टिः सम्प्राप्ता इति।[3]

---

1. वि.गु. बालकृष्णशर्मा, भूमिका, पृ. ९
   यतः स अप्पयदीक्षितो द्रविडजातीयः, भगवतः श्रीशिवस्य परमो भक्तः, अद्वैतमतपक्षपाती, वैष्णवमत-खण्डकश्चासीत् इति तु तद्वृत्ततः ज्ञायते। किञ्च - "वेङ्कटपतिनामधेयस्य कस्यचिद्राज्ञः सभायां वेदान्त-धर्मशास्त्रादिविषये ताताचार्यमतमनेन अप्पयदीक्षितेन खण्डितम्। ततः प्रभृति ताताचार्यः अप्पयदीक्षितेन दृढतरबद्धवैर आसीत्। नैतावदेव, केनापि प्रकारेणायं हन्तव्यः इत्यपि निश्चिकाय। ततश्चैकस्मिन् समये ताताचार्येण तत्रभवन्तं दीक्षितं विपिनमार्गेण गच्छन्तं ज्ञात्वा तद्वधाय चण्डालाः प्रेषिताः। परन्तु शिवभक्तिपरायणः दीक्षितेन्द्रः तस्मिन्नरण्ये सहसाऽऽविर्भूतेन केनचिद्वीरपुरुषेण रक्षितः" - इति तयोः वैरवृत्तान्तः।
2. वि.गु. आङ्ग्लभूमिका (Introduction), श्यामरायशर्मा विठ्ठलः। पृ. १
3. वि.गु. बालकृष्णशर्मा, भूमिका, पृ. ९

### ३. वेङ्कटाध्वरिः - तस्य कालः

काञ्चीमण्डले अरशाणिफालाग्रहारे लब्धजनुषोऽस्य तत्रैव विद्या ग्रहणादिना बाल्य-कौमारवयसी यापितवतः प्रौढां दशामारभ्य आदेहपातं काञ्च्यामेव अस्य अवस्थानमिति विमर्शकजनवचनादवगम्यते। अस्य आवासकालश्च प्रायः **क्री.श. 1550-1650** मध्ये भवतीति विमर्शकाः अभ्यूहन्ते।

१. वेङ्कटाध्वरिः नीलकण्ठदीक्षितस्य सहपाठी आसीत्। नीलकण्ठदीक्षितः अप्पय्य-दीक्षितसहोदरस्य पौत्रः आसीत्। अतः एतस्य कालः क्रीस्तोः परं १६३७ वत्सरः इति वक्तुं शक्यते।[1]एषः रामानुजस्य विशिष्टाद्वैतमतानुयायी वर्तते। वडगलै सम्प्रदायसम्बद्धः। ततश्चैवं प्रतीयते - **नीलकण्ठदीक्षितः,** अप्पयदीक्षितस्य पौत्रः, नारायणदीक्षितस्य च पुत्रः आसीदिति **काव्यमाला**ख्यमासिकपुस्तकस्य प्रथमगुच्छान्तर्गतश्रीमदप्पयदीक्षितप्रणीत**वैराग्यशतका**ख्यग्रन्थस्य प्रथमश्लोकटिप्पण्यां दृश्यते। अनेन नीलकण्ठचम्पूरचयिता, तत्प्रारम्भे स्वकीयग्रन्थनिर्माण-कालश्चापि निर्दिष्टः -

**अष्टात्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्त्रेषु। (४७३८)**
**कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम्।।** इति।

तस्मादेवं निश्चीयते ४७३८ तमे वर्षे नाम ख्रिस्ताब्दं १६३७ तमं तस्मिन्नेव वर्षे नीलकण्ठचम्पूः विरचिता, तत्समकालीनश्चायं वेङ्कटाध्वरिनामा कविरासीत्, ततश्च २६२ वत्सरेभ्यः प्राक् अयं विश्वगुणादर्शकर्ता कविः सुप्रसिद्धः आसीत् इति। परं च तेनायं ग्रन्थः कस्मिन् वर्षे निर्मित इति तु न याथार्थ्येन निश्चेतुं शक्यते, केवलं २६२ वर्षेभ्यः प्राक्तनकालीनोऽयं ग्रन्थ इत्यनुमीयते[2]।

---

1. सं.सा.च. पृ. ४८४. एषः क्रीस्तोः परं १६३७ वत्सरसम्बद्धः।
2. वि.गु. आङ्ग्लभूमिका (Introduction), श्यामरायशर्मा विठ्ठलः।
"The author of the work in question ***(Viśvaguṇādarśa)*** was a contemporary and school-mate of ***Nīlakaṇṭhadīkṣita,*** who wrote a work called ***Nīlakaṇṭhacampū*** in 4738 of the ***Kali*** era and therefore flourished 251 years ago. The exact date when the ***Viśvaguṇādarśa*** was written cannot be given. We can only say that the author lived about 250 years ago. He lived at an ***Agrahāra*** called ***Arśanaphāl*** in the town of ***Kāñcīpura*** and was a descendant of the renowned family of ***Tātācāri,*** a ***Vaḍaghalai Vaiṣṇava,*** whose family has borne the title of ***Tātācāri*** considered to be a corruption of ***Dāsa,*** the ancestor being a great devotee of ***Tirupati Veṅkaṭaramaṇa.*** But tradition says that the name ***Tātācāri*** was given, because the Tirupati God being pleased with the devotion of the man called him ***Tātā*** (Grandfather) when he addressed him."

अन्यदप्यत्रत्यमुद्रितपुस्तकप्रस्तावनायां किञ्चिद्वृत्तमुपलभ्यते - अयं वेङ्कटाध्वरी काञ्चीपुरसमीपे अर्शनफलनाम्नि अग्रहारे प्रतिवसति स्म। **वडघले** इत्याख्यवैष्णवसम्प्रदाय-पक्षपातितातार्यान्वयोत्पन्नश्चासीत् इति।

२. अथास्य विश्वगुणादर्शग्रन्थस्य कालनिर्णायकं लिङ्गम् तस्मिन्नेव ग्रन्थे दृश्यते तत्-

**हूणाः करुणाहीनास्तृणवत् ब्राह्मणगणं न गणयन्ति।**
**तेषां दोषाः पारेवाचां ये नाचरन्ति शौचमपि।।**

इत्यादि यत् हूणानां (गौरकायाङ्ग्लदेशीयानां) वर्णनम्। तस्मादनुमीयते- ख्रिस्तशकस्य १६४० तमे वर्षेऽयं ग्रन्थो विरचित इति।

**३.१. प्रद्युम्नानन्दीयनाटकरचनाकालः :-**

**१. सर्वासु मातृकासु उपलभ्यमानः ग्रन्थगतश्लोकः :-**

**नवसन्दर्भमात्रेयो नाटकं *वेङ्कटाध्वरी*।**
**प्रजोत्पत्तौ प्रौष्ठपद्यां पूर्णिमायामपूरयत्।। ६.३५।।** इति।

अयं भावः। आत्रेयगोत्रोत्पन्नः श्रीमद्वेङ्कटाध्वरी प्रजोत्पत्तिवर्षायाः प्रौष्ठपदी(भाद्रपद)-मासस्य पूर्णिमातिथौ प्रद्युम्नानन्दीयाभिधानं नव्यं नाटकम् अपूरयत् - इति स्वयं कविः वदति। अमुमेव विषयं प्रतिपादयति G.O.M.L. **(No. 12545)** Descriptive Catalogue —

"The work is said to have been completed by the author on the full moon day of the Prauṣṭhapada month in the year Prajotpatti." इति।

**२. मद्रास्मातृकायां राघवनामकः लेखकः :-**

अपि च तत्रैव मातृकालेखकः स्वपरिचयादिभिः सह मातृकारचनाकालं ख्यापयति। तद्यथा–

**वत्सकुलाम्बुधिपूर्णसुधांशुः श्रीपतिराघवदेशिकपुत्रः।**
**राघव एष इहाण्णयसुरेर्दास इमं व्यलिखत् स्वयमेव।।**

**अयं भावः।** इमं मातृकाग्रन्थं वत्सकुलाम्बुधिपूर्णसुधांशुः श्रीपतिराघवदेशिकस्य पुत्रः अण्णयसूरेः दासः **राघवः** स्वयमेव व्यलिखत् - इति। तत्रैव मद्रासमातृकायां —

**पराभवसंवत्सरम् आपुणिमासं २२ ०उउंते दिशति।**

**ककश्चिमै पौर्णमि यिन्द दिनत्तिर्व प्रद्युम्नानन्दीयं मुहिजुदु।** इति।

एतदेव स्पष्टयति G.O.M.L. **(No. 12545)** Descriptive Catalogue —

"Date of transcription - Saturday, the full moon day and the 22nd of the Āvaṇi month in the year Parābhava" इति।

**३. तिरुपतिमातृकायां यज्ञवराहाभिधः लेखकः :-**

अथ तिरुपतिमातृकायां लेखकः स्वमातृकालेखनसमयम् इत्थं व्यजिज्ञपत् —

**मुनिनिधिविध्यब्धिमिते मन्मथवर्षे कुलीरगे भानौ।**

**अलिखद्यज्ञवराहो नाटकमेतद्धि कृष्णसप्तम्याम्।।**

मन्मथवर्षे कर्कटराशौ कृष्णसप्तम्याम् भानुवासरे अर्थात् क्रीस्तोः परं 1571 संवत्सरे यज्ञवराहनामकः लेखकः नाटकं प्रद्युम्नानन्दीयाभिधम् अलिखत्।

इत्थं ग्रन्थरचनाकालः निश्चयेन ज्ञातुं प्रभवामः। किन्तु कवेः कालविषयेऽपि इतोऽपि विचारः प्रवर्तनीयः अस्ति इति विज्ञाप्यते।

## ४. वेङ्कटाध्वरिः - तस्य कृतयः

तत्रभवतो अष्टभाषाचक्रवर्तिनो वेङ्कटाध्वरिणो ग्रन्थाः अष्टोत्तरशताधिका सन्ति। एतच्च तद्वंशीयैरुक्तम् इति **श्लेष-यमकचक्रवर्ती वेङ्कटाध्वरी - तत्कृतीनामध्ययनम्** इति ग्रन्थात् ज्ञायते।

### ४.१. मुद्रितग्रन्थाः

१. **आचार्यपञ्चाशत् :-** वेदान्तदेशिकविषयकः स्तोत्रग्रन्थः।

२. **प्रद्युम्नानन्दीयम् :-** प्रद्युम्नरत्योः परिणयप्रतिपादकम् षडङ्कसहितम्। प्रस्तुतानुसन्धात्रा परिशोधनाय स्वीकृतः ग्रन्थः[1]। वेङ्कटाध्विरिणा तु प्रद्युम्नानन्दम् विरचितम् अज्ञात-कर्तृकविरचितम् - अर्थपञ्चकम् इत्यभिधानम् इमामेव कथामाश्रित्य प्रणीतम् अपरं नाटकम् साहित्यचरित्रे दष्टिपथमायाति[2]।

३. **राघवयादवीयम् :-** इदं त्रिंशच्छ्लोकात्मकं काव्यम्। ग्रन्थेऽस्मिन् आनुलोम्येन वाचने रामचरितं प्रातिलोम्येन कृष्णचरितञ्च उपवर्ण्यते[3]।

---

1. सं.सा.च. पृ. 484. एषः क्रीस्तोः परं १३५० वत्सरसम्बद्धः। **प्रद्युम्नानन्दनाटकम्** अस्य कृतिः अस्ति। एतच्च नाटकं षडङ्कोपेतमस्ति। प्रद्युम्नः वज्रनाभं हत्वा, रतिं विवाहयति। इति मुदिगोण्डगोपालरेड्डिमहाभागैः आन्ध्रभाषायां सूचितम्।
2. **H.C.S.L.** Dṛsya kāvya, P. 665.
   **Arthapañcaka nāṭaka :-** In five acts of unknown authorship describes how Manmatha was reborn as the son of Śaurirājā, the deity that is worshipped at Kṛṣṇapuram (Tirukkannapuram), Tanjore District, how as an infant he was cast into the sea by Śambarāsura, how the servants of Śambara found the infant in the belly of a fish and how Rati, the daughter of Śambara, enamoured of him, had him tended well, and in the end he married her after killing Śambara.
3. "कञ्चीनिवासिना वेङ्कटाध्वरिणा रामानुजमतानुयायिना १७०७ मितवैक्रमाब्दमभितः स्थितिमता यादवराघवीयसंज्ञकं द्विसन्धानकाव्यं प्रणीतम्। यस्य सम्प्रति त्रिंशदेव श्लोका लभ्यन्ते। तस्य ह्यनुप्रासच्छटा निभालनीया।" इति **श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी तत्कृतीनाम् अध्ययनम्** इति ग्रन्थात् अवगम्यते।

४. **लक्ष्मीसहस्रम्** :- क्री.प. १६५० (१७०७ मितवैक्रमाब्दः) वत्सरीयः वेङ्कटाध्वरिः **लक्ष्मीसहस्रम्** इति नाम्ना (१०००) सहस्रश्लोकमितकृतिमरचयत्। अस्यां कृतौ लक्ष्मी-विष्ण्वोः स्तुतिर्वर्णिता। कवेः कल्पना अत्यन्तोत्कृष्टा भक्तिभावपूर्णा च। अतीव कठिनमिदं काव्यम्, प्रयत्नसाध्यमपि सरसमेव। लक्ष्मीस्तुतिपरं सहस्रशलोकात्मकं बृहत्काव्यम्। साक्षाल्लक्ष्म्याः रक्षितृत्वमोक्षप्रदातृत्वादिधर्माः तत्तत्स्तबकेषु निरूपिताः।

५. **विश्वगुणादर्शचम्पूः** :- चम्पूकाव्यजगति वेङ्कटाध्वरिणः स्थानमतीव मत्त्वपूर्णं वर्तते। अस्य कवेः काव्येषु प्रसिद्धं काव्यम् **विश्वगुणादर्शचम्पूः** इति। तत्र चम्पूप्रबन्धस्य लक्षणं वक्ति -

**पद्यं यद्यपि विद्यते बहु सतां हृद्यं विगद्यं न तत्**
**गद्यं च प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम्।**
**आधत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयम्**
**सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः।। ४।।**

यद्यपि लोके बहु पद्यकाव्यानि विद्यन्ते। तथापि विगद्यं (चूर्णिकारहितं) तत्पद्यं सतां न मनोहरम्। विजहत् पद्यकाव्यम् अर्थात् केवलगद्यकाव्यं साहितीकुशलानाम् आस्वाद्यतां न प्रतिपद्यते, नापि केवलं पद्यम्। सतां चम्पूप्रबन्धे गद्यं पद्यं च प्रकर्षेण प्रयुक्तं सन्तोषातिशयं जनयति। माक्षिका-द्राक्षयोः सङ्गः कस्य मनसे न रुच्यते ? सर्वस्मै अपि रुच्यत एवेति भावः। आलङ्कारिकाः इदमेव लक्षणं चम्प्वाः लक्षणत्वेन अभिप्रयन्ति।

ग्रन्थस्य कथावस्तु पृष्ठभूमिश्चेत्थम् -

**विश्वावलोकस्पृहया कदाचिद्विमानमारुह्य समानवेषम्।**
**कृशानु-विश्वावसुनामधेयं गन्धर्वयुग्मं गगने चचार।। ५।।** इति।

कृशानु-विश्वावसू गन्धर्वौ विश्वभ्रमणाय प्रस्थितौ। तयोः संवादाः अस्मिन् काव्ये सन्ति। अपि च सामाजिकदुराचाराः, तीर्थक्षेत्रमाहात्म्यञ्च कविना वर्णिताः। शैली अनुप्रासमयतया धारालतया अस्ति। समीचीनाः प्रकृतिवर्णना अपि विद्यन्ते। कृशानुविश्वासुनामकयोर्गन्धर्वयोः विमानमधिरुह्य बहुप्रदेशसञ्चारः क्रमशः— सूर्यलोक-भूलोके, भूलोके - अयोध्या-गङ्गानदी-काशी-समुद्र-जगन्नाथक्षेत्र-गुर्जरदेश-यमुनानदी-महाराष्ट्र-आन्ध्रप्रदेश-कर्णाटकदेश-वेङ्कटगिरि-वन-घटिकाचल-दीक्षारण्य-रामानुज-चन्नपट्टण-काञ्ची-श्रीमद्वेदान्तदेशिकाचार्य-कामासिका-

नगरवासिनृसिह-त्रिविक्रम-कामाक्षीदेवी-एकाम्रेश्वर-क्षीरनदी-वाहानदी-तुण्डीरमण्डल-चञ्जीपुरी-यज्ञवाराह-कावेरी-रङ्गनगरी-जम्बूकेश्वर-चोलदेश-शार्ङ्गपाणि-राजगोपाल-सेतु-ताम्रपर्णी-शठकोपमुनि-वेदान्त-ज्यौतिषिक-भिषक्कवि-तार्किक-मीमांसक-वैयाकरण-वैदिक-राजसेवक-दिव्यक्षेत्रप्रभृतीनां वर्णनं सुनिपुणं कृतमस्ति। कविवर्णनं यथा -

**माघश्चौरो मयूरो मुररिपुरपरो भारविः सारविद्यः**
**श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः।**
**श्रीदण्डी डिण्डिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः**
**ख्याताश्चान्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति।।**[1]

संवादरूपेण प्रणीतोऽयं ग्रन्थः गुणदोषविवेचनपरः।

अस्मिन् रसालङ्कारादीनि काव्यलक्षणानि सर्वत्र परिपूर्णतया दृश्यन्ते, तथापि अर्थालङ्कारापेक्षया शब्दालंकारेष्वेव (अनुप्रास-यमकादिषु) कवेरतीवादरो दृश्यते, तदनुसन्धानादेव क्वचित् क्लिष्टत्वाप्रसिद्ध-शब्दप्रयोगादयो दोषाः प्रादुर्भवन्ति। एवमपि काव्यस्य सहजमाधुर्य-प्रौढत्वादयो गुणा न विलीयन्ते, तत एवास्य वश्यवचस्त्वं स्फुटीभवति। तथा चास्मिन् विश्वगुणादर्शे तदभिधानानुरूपाः सर्वेऽपि विषया न विद्यन्ते, सतामपि विषयाणाम् आमूलात् समाप्तिपर्यन्तम् एकैव पद्धतिर्नावलोक्यते। अस्य हि प्रथमत एवंरीतिः विश्वावलोककुतूहलौ कृशानु-विश्वावसू द्वौ गन्धर्वौ कल्पितौ। तन्मध्ये एकः (कृशानुः) दोषैकदृक्, अपरो (विश्वावसुः) दृश्यवस्तुनो गुणग्रहणकौतुकी चासीत्।

ततः दृष्टिपथं प्राप्तस्य वस्तुनः प्रथमं विश्वावसुः सानन्दं करोति, ततस्तस्मिन्नेव कृशानुर्दोषारोपं करोति, पुनश्च तदारोपितं दूषणं विश्वावसुर्निराकरोति। परन्तु इयं पद्धतिः स्पर्धाधीनचित्तत्वात् स्वाङ्गीकृतमतसमर्थननिघ्नत्वाद्वा भिन्ना। एतत् सर्वमपि मार्मिकवाचक-जनैर्वाचनसमयेऽवगन्तुं शक्यमिति न तत्राधिकं लिख्यते। अयं कविर्यद्यपि श्रीरामानुजप्रवर्तित-वैष्णवपथानुगस्तथाप्यन्यसम्प्रदायानामपि याथार्थ्यवेत्ता आसीदिति तु निर्बाधमेव। किञ्चास्य काव्यस्य व्युत्पत्तावतीवोपयुक्ततया काव्यरसिकेषु बहुषु पण्डितेषु महाकवेरस्य ग्रन्थानां च प्रख्यातिर्विद्यते।

1. सं.सा.च. पृ. ५४९ इति ग्रन्थगतविषयस्य अनुवादात्मको भागः अत्र उपस्थापितः।

६. **वरदाभ्युदयचम्पूः :-** वेङ्कटाध्वरिः **चत्वारि चम्पूकाव्यानि** व्यरचयत्। **वरदाभ्युदय**चम्प्वाम् अनेन काञ्चीस्थदेवतानां महत्त्वं वर्णितम्। ब्रह्मकृतहयमेधाग्नौ प्रादुर्भूतस्य वरदराजस्य वैभव-प्रतिपादकपरं काव्यम्। पञ्चमविलासेनैव काव्यं समाप्यते।

६. **श्रीनिवासविलासचम्पूः :-** ग्रन्थेऽस्मिन् दशाध्यायाः सन्ति। अत्र च तिरुमलस्थितदेवतानां वर्णनं दृश्यते। ***पद्मावतीपरिणयचम्पूः*** इति द्वितीयं नामस्या इति कविसम्प्रदायवर्ती कश्चन स्वामी वक्ति। (चेट्लूर् श्रीवत्साङ्काचार्यः) **श्रीनिवासचम्पूः** इत्यपि अस्य नामान्तरम्। अस्मिन् वेङ्कटेश्वरप्रशस्तिः वर्तते।

७. **उत्तरचम्पूः :-** ग्रन्थेऽस्मिन् गद्यपद्ययोः समप्राधान्यं दत्वा रामायण-उत्तरकाण्डकथां स्वीकृत्य स्वतन्त्रतया भोजरामायणमपूरयत्। भोजरामायणे युद्धकाण्डं लक्ष्मणसूरिः वाल्मीकिमनुकुर्वन् अरचयत् (अपूरयत्)।

८. **विधित्रयपरित्राणम् :-** मीमांसाग्रन्थः। प्रसिद्धाप्पयदीक्षितकृतविधिरसायनाभिधस्य मीमांसा-ग्रन्थस्य खण्डनरूपं पुस्तकम्।

९. **श्रवणानन्दः :-** श्रीनिवास-वरदराज-सुन्दरबाह्वादीनां श्रीमन्नारायणमूर्तीनां स्तोत्रकाव्यम्। अत्र प्रपत्तिरूपापन्ना भक्तिः समर्पिता कविना। सहस्रशलोकात्मकमिदं काव्यमिति कवेर्वंशीयस्य सत्सम्प्रदाये निष्णातस्य कस्यचन विदुषश्चोक्तिः[1]। शतकद्वयमेवाधुना लभ्यते।

१०. **सुभाषितकौस्तुभः :-** विवेकपद्धतिः, सज्जनपद्धतिः, दुर्जनपद्धतिः, वदान्यपद्धतिः पिशुन-पद्धतिश्चेति पद्धतिपञ्चकेन विलसतीदं लघुनीतिकाव्यम्।

## ४.२. अमुद्रितग्रन्थाः

१. **न्यायपद्मम् :-** मीमांसाशास्त्रम् शबरस्वामिनां भाष्यं यथा स्वतन्त्रव्याख्यानम्। सोमेन यजेतेति विधिवाक्स्वरूपविवेचनेन प्रारब्धो ग्रन्थः। हस्तलिखितप्रतिर्लभ्यतेऽसम्पूर्णा।

२. **मीमांसामकरन्दः :-** अयमपिमीमांसाशास्त्रग्रन्थः। न्यायसूत्राणां भाट्टदीपिकावत् स्वतन्त्र-व्याख्यारूपो विस्तृतग्रन्थः। हस्तलिखितप्रतिरूपेण लभ्यते। तत्र तत्र भाट्टदीपिकाऽपि खण्डिता दृश्यते।

1. आत्रेयश्रीनिवासराघवाचार्यः। सेवास्वामी मणिमण्टपः विल्लिवांक, मद्रपुरी ४९.

३. **यतिप्रतिवन्दनखण्डनम् :-** धर्मशास्त्रग्रन्थः। वेदविद्गृहस्थस्यापि यतिना प्रतिवन्दनीयत्वं न शास्त्रसम्मतमित्यत्र निषिध्यते।

४. **शृङ्गारदीपभाणः :-** दशरूपकेषु भाणग्रन्थोऽयमन्यतमः। नागरलिप्यां लिखितप्रतिर्लभ्यते।

## ४.३. अनुपलभ्यमानग्रन्थाः

१. **आचार्यचम्पूः :-** वेदान्तदेशिकविजयसूचिकाचम्पूः।

२. **रामायणव्याख्या वाल्मीकिहृदयम् :-** इतिहासः।

३. **श्रीकामाशिकानरसिंहस्तोत्रम् :-** विश्वगुणादर्शस्थं कामाशिकानृसिंहवर्णनमेव पार्थक्येनैतन्नाम्ना व्यवह्रियत इति आत्रेयवंशलब्धजन्मा कश्चन श्रीवैष्णवोऽभिप्रैति।

४. **नयद्युमणिदीपिका :-** नयद्युमणेः मेघनादारिसूरिकृतस्य सिद्धान्तसमर्थनरूपो व्याख्यानग्रन्थः। अयं वेदान्तग्रन्थः।

५. **महाभाष्यस्फूर्तिः :-** पतञ्जलिकर्तृकमहाभाष्यस्य कैयटव्याख्यानवत् स्वतन्त्रं स्फूर्तिरिति देशिक-सम्प्रदायवर्तिन एकत्र लेखनम्।

६. **मणिसारखण्डनम् :-** अयं तर्कग्रन्थः। गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिग्रन्थस्य तार्किक-गोष्ठ्यां मणिसार इति टिप्पणी लिखितेति तस्य मणिसारस्येदं खण्डनरूपमिति तत्त्वचिन्तामणिं गौतमस्य न्यायशास्त्रं, कणादस्य वैशेषिकंच परिशील्य कृतमिति वडकलै स्वामी।

७. **मुकुन्दविलासः :-** भाणग्रन्थः।

८. **यथोक्तकारिभाणः :-** अस्यैव काञ्चीभाण इत्यपरं नाम। यथोक्तकारिस्वामिनमुद्दिश्य रचितो भाण इति एतद्वंशीयाः प्रणतार्तिहरादयोऽत्र सन्निधौ कैङ्कर्यं कुर्वन्त आसन्निति श्रीवत्साङ्काचार्याभिधः स्वामी लिखितवानेकत्र निबन्धे।

९. **यङ्लुक् प्रकाशिका :-** व्याकरणम्। यङ्लुगन्तप्रयोगः वेदे एव क्रियते इति केचन वैयाकरणाः। अपरे केचन लौकिकेऽपि वाङ्मये कर्तुं शक्यते इति मन्वते। मतद्वयमाश्रित्य रचितं क्रोडपत्रमित्येकत्र दृष्टम्।

१०. **व्युत्पित्सुबाधः :-** व्याकरणग्रन्थः। गदाधरभट्टाचार्यस्य व्युत्पत्तिवादं जगदीशशब्दालङ्कार-शब्दशक्तिप्रकाशिकां, वेदान्तिनां मतं, स्वामिदेशिकस्य (वेदान्तदेशिकस्य) न्यायपरिशुद्धिम्, अपरांश्च बहून् ग्रन्थान् परिशील्य रचितः स्वतन्त्रग्रन्थः। शाब्दबोधप्रकारपरः।

११. **श्रीनिवाससहस्रम् :-** स्तोत्रग्रन्थः।

१२. **श्रीविभुत्वसमर्थनम् :-** लक्ष्मीसहस्रे श्रीविभुत्वादिधर्माः लक्ष्म्याः प्रतिपादिताः। तदुपरि आक्षेपाणां खण्डनरूपमिदमिति वेङ्कटाध्वरिविषयनिबन्धे तत्सम्प्रदायस्थः प्रसिद्धविद्वान् लिखति। एतन्नाम्नाऽधुनोपलभ्यमानहस्तलिखितग्रन्थः श्लोकस्थपरिचयेन शैल्या च भिन्नकर्तृकत्वं सूचयति। अपरो ग्रन्थः कश्चनैतदीयो लुप्तः स्यात्।

१३. **सुभद्रापरिणयः :-** अङ्कद्वमुपलभ्यते इति के. शठकोपाचार्यः। कुत्र लभ्यत इति न तत्र सूचितम्। परन्तु नल्लाकविकर्तृनाम्ना मद्रपुर्यां नाटकमिदमधुना दृष्टिगोचरो वर्तते।

एवमत्र वेङ्कटाध्वरिः तस्य कृतयः उपलभ्यमानाधारैः निरूपिताः। अथ मातृका-सम्पादनविधानं वर्ण्यते।।

# ५. मातृकासम्पादनम्

## १. सम्पादनीयमातृकाया अन्वेषणं मातृकाचयनं च :-

काव्येषु नाटकं रम्यम् इत्यतः किञ्चिन नाटकमेव सम्पादनीयम् इति निर्णयम् अकरवम्। मार्गदर्शकानां सूचनानुसारं मातृकाग्रन्थालये उपविश्य मातृकासूच्यः परिशीलिताः। मातृकासम्पादनाय प्रथमं New Catalogues Catalogorum (NCC) अपश्यम्। तत्र पकारः आदिवर्णतया कानि मातृकानाटकानि उपलभ्यन्ते इति अन्विष्टम्। तथा मम दृष्टिः प्रद्युम्न इति वर्णसमुदायपर्यन्तं गता। प्रद्युम्न इति नाम्ना उपलभ्यमानमातृकासु एकस्य शीर्षकस्य उपरि मम दृष्टिः स्थिरा जाता, यत्र तस्य वर्णनम् एवं दृश्यते-

**प्रद्युम्नानन्द** Nāṭaka. in 6 acts; plot same as that of Arthapañcaka; by Veṅkaṭādhvarin; staged at the festival of lord Śrīnivāsa of Tirupati.

Adyar II. p. 28a. Adyar D.V. 1383 (inc.) Gov. Or. Libr. Madras 53. MD. 12545-47. Mysore N.D. VIII. 27588. Dxtr. p. ३२०. 275589 (inc.). 27590 (inc.). Oppert I. 84. 6385. Rice 258. Ptd. in Telugu script. Vidyātaraṅgiṇī Press. Mysore, 1886.

तिरुपतिनगरे **भगवतः श्रीवेङ्कटेशस्य ब्रह्मोत्सवेषु एतन्नाटकं प्रदर्शितम्** इति पठनेन अवश्यमेतादृशं महत्त्वपूर्णं नाटकं सम्पादनीयम् अनन्तरं लोकार्पणं च करणीयम् इति सङ्कल्पो मे जातः। तत् मार्गदर्शकवर्याय डा के. राजगोपालन् महोदयाय न्यवेदयम्। तैः अङ्गीकृत्य अवश्यं भवान् सम्पादयतु इति प्रेरणा प्रादायि।

## २. चितमातृकायाः अन्वेषणक्रमः :-

एवं चितायाः मातृकायाः अन्वेषणाय NCC मध्ये दत्ताधारेणैव मद्रपुरीस्थ-अड्यार्-मातृकालय-(Adyar Library Catalogue)-मद्रास्नगरस्थप्रभुत्वमातृकाग्रन्थालय (Madras GOML Catalogue)-महीशूरपुरीस्थमातृकाग्रन्थालयानां मातृकासूच्यः (Mysore ORI Catalogue); तेषां वर्णनात्मकसूचीभिस्सह (Descriptive Catalogues) अनुशीलिताः।

NCC मध्ये दत्ताधारातिरिक्ततया विद्यापीठे उपलभ्यमानसर्वाः मातृकासूच्यः दृष्टाः। तासु एतासु मातृकासूचीषु विशिष्य परिशीलनं कृतम्। तस्य फलमिव तिरुपतिश्रीवेङ्कटेश्वर-प्राच्यमातृकाग्रन्थालयमातृकासूच्यां (SVORI Catalogue) ग्रन्थलिपिस्थामातृकाद्वयं नयनपथमागतम्।

## ३. मातृकागारेषु समुपलभ्यमानानां मातृकानां पट्टिका :-

| 1 Sl. No. | 2 Accession No. | 3 Title of the work | 4 Author | 5 Material | 6. Script | 8 Folios | 11 Extent | 12 Condition | 13 Additional Particulars |
|---|---|---|---|---|---|---|---|---|---|
| | | | | **1. GOML, Madras** | | | | | |
| 1. | 12210 | प्रद्युम्नानन्दीयम् - | वेङ्कटाध्वरिन् | Palm | Grantha | --- | Com. | Good | SD. 3498, D. 12545 |
| 2. | 12211 | प्रद्युम्नानन्दीयम् - | वेङ्कटाध्वरिन् | Paper | Devnagari | --- | Com. | Good | SD. 1025, D. 12546 |
| 3. | 12212 | प्रद्युम्नानन्दीयम् - | वेङ्कटाध्वरिन् | Palm | Telugu | --- | Com. | Good | SD. 3499, D. 12547 |
| | | | | **2. ORI, Mysore** | | | | | |
| 4. | E27588 | Pradyumnānandam - | Veṅkaṭādhvari | Palm | Grantha | 41-94 | Com. | Good | P. 7133/2 |
| 5. | 27589 | Pradyumnānandam - | Veṅkaṭādhvari | Paper | Nan. | 1-52 | Incom. | Damaged | C. 262 I-IV Aṅkas |
| 6. | 27590 | Pradyumnānandam - | Veṅkaṭādhvari | Paper | Nan. | 1-18 | Incom. | Damaged | C. 263 I-V Aṅkas |
| | | | | **3. SVORI, Tirupati** | | | | | |
| 7. | 3679 | Pradyumnānandaḥ - | Veṅkaṭādhvarin | Palm | Grantha | 74 | Com. | Good | Scribe : Yajñavarāha, |
| | | | | | | | **Dated 1571 A.D.**, M., | | A., My. 1641 |
| 8. | 3680 | Pradyumnānandaḥ - | Veṅkaṭādhvarin | Palm | Grantha | 65 | Incom. | Damaged | Scribe : Rāmānuja, |
| | | | | | | | 2139-B | Other work : Kṛṣṇābhyudaya | |
| | | | | **4. Adyar Library, Madras** | | | | | |
| 9. | ----- | Pradyumnānandam - | Veṅkaṭādhvari | Palm | Grantha | **69** | 8 Incom. | Old, Worm Eaten | |

**४. उपलभ्यमानमातृकाः :-**

गवेषितमातृकासूचीषु तत्र मद्रास्प्रभुत्वप्राच्यमातृकाग्रन्थालये (GOML, Madras) तिस्रः मातृकाः विलसन्ति। महीशूरमातृकागारेऽपि (ORI, Mysore) मातृकात्रयं दृक्पथमायाति। अपि च 1886 तमे वत्सरे मुद्रितं प्रद्युम्नानन्दनाटकाख्यं पुस्तकं विद्यातरङ्गिण्याख्यायां मुद्रणालये मुद्रितं वर्तते इत्यवगतम्। तिरुपतिस्थश्रीवेङ्कटेश्वरप्राच्यपाण्डुलिपिग्रन्थालये (SVORI, Tirupati) तु द्वे मातृके विद्येते। किञ्च अड्यार्मातृकालये (Adyar Library, Madras) एका मातृका वर्तते।

**५. मातृकासंकलनम् :-**

मातृकाणां संकलनाय प्रथमं मार्गदर्शकानां सूचनानुगुणं विद्यापीठानुसन्धानविभागाधिकारिणाम् अनुमतिपत्रं स्वीकृत्य तत्तन्मातृकालयं प्राप्तवान्।

**५.१. प्राच्यसंशोधनामातृकालयः, महीशूरः** (Oriental Research Institute, Mysore)

तत्र प्रथमं महीशूरपुरं गत्वा, तत्रोपलभ्यमानमातृकात्रयस्य संदर्शने समुत्सुकाय अनुसन्धात्रे समीचनायाः (P. 7133/2) एकस्याः एव मातृकायाः दर्शनं सञ्जातम्। यतः नष्टमातृकास्वीकारे दर्शने च ते अधिकारिणः किञ्चित् अभ्यन्तरं प्राकटयन्।

अथ बहुत्र ग्रन्थालयेषु प्रद्युम्नानन्दमुद्रितपुस्तकान्वेषणे न्यस्तमत्या अनुसन्धात्रा अलाभहेतोः किञ्चित् नैराश्य मतिना, इत एव विद्यातरङ्गिण्याख्यां मुद्रणालये मुद्रापयित्वा १८८६ वत्सरे प्रकाशितग्रन्थस्य अन्वेषणाय मातृकालयस्थ Printed Books Catalogue परिशीलितम्। पट्टिकायाम् (Catalogue) प्रद्युम्नानन्दनाटकस्य नामावलोक्य मम आनन्दस्य अवधिरेव नास्ति। उत्फुल्लनेत्रः तं सद्य एव प्राप्य दृष्टवान्। तस्य प्रतिलिपिकरणाय सम्प्रार्थितवान्। यदि तस्य पुस्तकस्य प्रतिलिपिं (Xerox) स्वीकर्तुं यतते तदा एव तस्य पत्राणि भग्नानि भवेयुः, इत्यस्मात् कारणात् **छायाचित्राणि** (Digitalization) माध्यमेनैव दातुम् अङ्गीकृतवन्तः। समीचीनमातृकायाः अपि प्रतिलिपिमपि **छायाचित्राणि** (Digitalization) कारयित्वा काम्पाक्टडिस्क् (CD) रूपेण सम्प्रेषितवन्तः।

एवं मैसूरनगरप्राच्यपरिशोधनामातृकालयतः P. 7133/2 संख्याकायाः एकस्याः मातृकायाः महिशूरनगरतः एव प्रकाशितस्य मुद्रितग्रन्थस्य च संकलनम् सम्भूतम्।

**५.२. प्रभुत्वप्राच्यसंशोधनामातृकालयः, मद्रास्**
(Government Oriental Research Institute (GOML), Madras)

अस्माकं प्रार्थनाम् उररीकृत्य छायाग्रहणयन्त्रं (Digital Camera) दत्वा सम्प्रेषितवन्तः तत्र अनुसन्धानविभागाधिकारिणः, विद्यापीठात् अनुमतिपत्रं सन्दर्श्य, मातृकालये प्रविष्टस्य अनुसन्धातुः आसायं मातृकाणां छायाग्रहणे एव समयः व्यतीतः। तत्र मद्रास्प्रभुत्वमातृकालये **प्रद्युम्नानन्दीयम्** इति नाम्ना तिस्रः मातृकाः उपलभ्यन्ते इति पूर्वपट्टिकासन्दर्शनेन एव ज्ञायते।

तत्र प्रथमा SD. 3498/ D. 12545 इति संख्याका ग्रन्थलिपिस्था एका तालपत्रमातृका, अपरा च SD. 3499/ D. 12547 इति संख्याका तेलुगुलिपिस्था मातृका च **छायाचित्र** (Digitalize) माध्यमेन स्वीकृता। अन्या च SD. 1025/ D. 12546 इति संख्याका देवनागरीलिपिस्था कर्गजपत्रात्मिका मातृका स्थानान्तरितकारणेन नाप्राप्नुवम्।

**५.३. श्रीवेङ्कटेश्वरप्राच्यसंशोधनामातृकालयः, तिरुपतिः**
(Sri Venkateswara Oriental Research Institute (SVORI), Tirupati)

पत्रद्वारेण सम्प्रार्थितेन अनुसन्धात्रा श्रीवेङ्कटेश्वरप्राच्यसंशोधनामातृकालयतः उपलभ्यमानयोः ग्रन्थलिपिस्थयोः द्वयोः ताळपत्रमातृकयोः प्रतिलिपयः (Photo Start Copies) अचिरात् प्राप्ताः।

**५.४. अड्यारमातृकालयः, मद्रास् (Adyar Library, Madras)**

अत्र उपलभ्यमाना एका मातृका प्राचीना असमग्रा कीटदग्धा च इत्यतः मातृका एषा न स्वीकृता।

**६. संकलितमातृकापट्टिका :-**

१. SD. 3498/ D. 12545 - ग्रन्थलिपिः - GOML, Madras.
२. SD. 3499/ D. 12547 - तेलुगुलिपिः - GOML, Madras.
३. मुद्रितग्रन्थः - तेलुगुलिपिः - ORI, (Ptd.Vidyātaraṅgiṇī Press in 1886) Mysore.
४. P. 7133/2 - ग्रन्थलिपिः - ORI, Mysore
५. 1641 - ग्रन्थलिपिः - SVORI, Tirupati.
६. 2139-B - ग्रन्थलिपिः - SVORI, Tirupati.

**७. समीक्षणाय स्वीकृताः मातृकाः :-**

श्रीवेङ्कटाध्वरिविरचितस्य **प्रद्युम्नानन्दीयाख्यस्य** नाटकस्य नव मातृकाः उपलभ्यन्ते इति पूर्वपट्टिकादर्शनेन ज्ञायते। एवम् आहत्य उपलभ्यमानासु नव मातृकासु मातृकायाः पाठसमीक्षात्मकसम्पादनाय १. प्राचीनत्वम्, २. समग्रत्वम् ३. शुद्धत्वम् इति त्रिप्रकारकप्रधानहेतून् मनसि निधाय त्रयः एव मातृकाः स्वीकृताः।

तत्र मद्रास्प्रभुत्वप्राच्यमातृकालयलतः (GOML, Madras) D.12545 संख्याका ग्रन्थलिपिस्था एका मातृका, अन्या च मैसूर्ग्रन्थालयतः (ORI, Mysore) विद्यातरङ्गिण्याख्यायां मुद्रणालये क्रीस्तोःपरं 1886 तमे वत्सरे मुद्रिता, अपरा च तिरुपतिस्थ-श्रीवेङ्कटेश्वरप्राच्यविद्या-संशोधनालयतः (SVORI, Tirupati) 1641 इति संख्याका ग्रन्थलिपिस्था एका मातृका स्वीकृता। एवं द्वे मातृके एकं मुद्रितं पुस्तकम् आहत्य त्रयः मातृकाः चिताः। ताः पट्टिकारूपेण अत्र उपस्थाप्यन्ते-

GOML, Madras

1. 12210 प्रद्युम्नानन्दीयम् - वेङ्कटाध्वरिन् - Drama - Palm - Grantha - Com. - D. 12545

SVORI, Tirupati

2. 3679 Pradyumnānanda - Veṅkaṭādhvarin - Drama - Palm - Grantha - Com. - 1641

ORI, Mysore

3. प्रद्युम्नानन्दनाटकम् - श्रीमदरिशाणफालवेङ्कटाचार्यः Drama - Paper - Telugu - Com.
   Printed at Vidyātaraṅgiṇī Press, Mysore in 1886.
   Total Pages = Cover Page + i-vii + 1-130 + ii

परिहृतमातृकाणां प्रधानकारणं भवति भग्नत्वम् असमग्रत्वं च। कासाञ्चन मातृकाणां तु स्वीकारस्य योग्यता सत्यपि प्रस्तुतसमये अलब्धत्वम् कारणं वहति।

**८. मूलमातृकानिर्णयः :-**

मुद्रितपुस्तकम् एव मूलमातृकात्वेन स्वीकृतं यतः प्राचीनत्व-समग्रत्व-शुद्धत्वादिषु गुणाधिक्यात्। अन्ये च मातृके समुचितपाठनिर्णये हेतू भवतः।

**९. मूलपाठनिर्णयः :-**

मूलपाठनिर्णयाय अनुसन्धात्रा केचन मार्गाः अनुसृताः। तेषु विशेषण-विशेष्ययोः १. समानत्वसाधनं२. छन्दः ३. व्याकरणसाधुत्वम् ४. लेखकदोषः ५. सन्दर्भः एतादृशान् विषयान् मनसि निधाय समुचितपाठनिर्णयः कृतः। उदाहरणार्थम् -

| शुद्धपाठः | - | परित्यक्तपाठः | पाठनिर्णये प्रमाणम् |
|---|---|---|---|
| १. स्वपिति | - | स्वपति | (धातुरूपाणि) |
| २. पृच्छ | - | पृच्छस्व | (धातुरूपाणि) |
| ३. अदो वनम् | - | अमुं वनम् | (विशेषण-विशेष्ययोः समानत्वम्) |
| ५. प्रहिताऽस्मि | - | प्रहितोऽस्मि | (विशेषण-विशेष्ययोः समानत्वम्) |
| ४. वार्षिक | - | वार्षुक | (तद्धितप्रक्रिया) |
| ५. मञ्जूद्गतानि | - | मञ्जूत्गतानि | (सन्धिकार्यम्) |
| ६. संस्कारोद्बोधन | - | संस्कारोत्बोधन | (सन्धिकार्यम्) |

**१०. मातृकावंशावलिः :-**

चितासु मातृकासु पाठसमीक्षणानन्तरम् – मद्रास्मातृकालये तालपत्रे उपलभ्यमाना D. 12545 इति संख्याका या मातृका विद्यते सा तिरुपतिस्थश्रीवेङ्कटेश्वरप्राच्यपरिशोधना-मातृकालये उपलभ्यमानायाः 1641 इति संख्याकायाः मातृकायाः भिन्ना वर्तते। यतः तयोः पाठान्तराणि, पाठभेदाः, व्याकरणदोषाः, लेखकदोषाः, अधिकपाठः, लुप्तपाठः इत्यादिबहुभेदाः दृष्टाः। किन्तु तिरुपतिमातृका महीशूरपुरे उपलभ्यमानमुद्रितपुस्तकरूपा मातृका च समाने विद्येते। अतः एतासां माद्मतृकाणां वंशावलिः इत्थं निर्मितम् -

M. Gr. 1 ___________________ T. Gr. 1

|

My. Tel. Print.

**११. मातृकाणां वर्णनम् :-**

तत्तत् मातृकावर्णनात्मकसूचीषु (Descriptive Catalogues) दृश्यमानं प्रद्युम्नानन्दीय-नाटकाख्यस्य मातृकाणां (आदि-अन्त-पुष्पिकाभागानाम्) वर्णनम् एवं वर्तते -

**Governement Oriental Manuscripts Library, Madras**

## No. 12545 - प्रद्युम्नानन्दीयम्
## Pradyumnānandīyam

Substance - palm-leaf. Size - 11 5/3 x 1 3/8 inches. Pages - 218. Lines - 7 on a page. Character - Grantha. Appearance - New. Complete in six acts.

The plot of this drama is the same as that given in the Arthapañcakanāṭaka which is described under No. 12494 ante.

The author is the same as that of Viśvaguṇādarśa, viz., Veṅkaṭācārya of Kāñcī son of Sītāmbā and Raghunātha, son of Appayācārya Ātreyagotra. The drama is said to have been staged on the occasion of the festival celebrated in honour of God Śrīnivāsa of Tirupati. The work is said to have been completed by the author on the full moon day of the Prauṣṭhapada month in the year Prajotpatti.

Date of transcription - Saturday, the full moon day and the 22nd of the Āvaṇi month in the year Parābhava

**Beginning :-**

**श्रीमद्धाम समामनन्ति कमलं तद्बान्धवं वा ययो-**
**रक्षीन्दीवररूपमाहुरथवा तद्बन्धुरूपं बुधाः।**
**सावर्ण्यं तटिता वपुश्शुभतरं धत्तेऽथवा तद्वता**
**भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती सम्पदे।। १।।**

****

(नान्द्यन्ते सूत्रधारः)

(नेपथ्याभिमुखमवलोक्य ) इह खलु निखिलभुवनजननस्थितिसंस्थितिभिरभिक्रीडतो भगवतो वक्षस्स्थलविलग्नलक्ष्मीचरणनलिनलाक्षासाक्षात्कारनिर्धारितपरब्रह्मभावस्य वरेण्यलावण्य-श्रीकेलिगेहेन देहेन वार्षुकवलाहकच्छायाडम्बरविडम्बिनो वेङ्कटेशकुटुम्बिनो देवस्य सेवावसर-समवेतैः हृद्यानवद्यविद्या-निषद्यायमानमानसैः सादरमहमादिश्ये।

****

**आविर्भावमुपेयिवान् शुभयशस्यत्रेः पवित्रे कुले**
**श्रीमानप्पयदेशिकाध्वरिमणिर्जागर्ति कीर्त्या भुवि।**
**अस्तोकैर्यदनुष्ठितैर्मखवरैर्हस्तिक्षमाभृत्पति-**
**स्तां वैतानवपाहविःकबलनक्रीडां पुनः स्मारितः।।**

****

**परमप्रभयाऽतुलोऽकलङ्कः कृतदानश्च महाच्छविप्रहस्ते।**
**भुवि भाति विधूतदूषणश्रीः रघुनाथार्यमखी यथार्थनामा।।**

**तस्यैतस्य तनूभवः कविरयं त्र्यच्ञ्चलव्याक्रिया-**
**तर्कप्रौढचमत्क्रियासु निपुणो मीमांसकोत्तंसकः।**
**तत्तादृक्कवितासरोजसविता दत्ताशयः श्रीपतेः**
**शेषक्ष्माधरवासिनश्चरणयोः श्रीवेङ्कटार्याध्वरी।।**

तेन किल निबद्धं प्रद्युम्नानन्दाभिधानमभिनवं नाटकमभिनयद्भिरस्माभिरानन्दयितव्या परिषदेषा।

**नटी** **:-** हृदयङ्गमोऽयं परिषदभितोषणोपायः। सारग्राही खल्वसि। तथाहि -

**कल्पन्ते विदुषां मुदे स्मरवधूकर्णावतंसोत्पल-**
**स्वैरोदञ्चितशीधुपूरसुहृदः श्रीवेङ्कटार्योक्तयः।**
**श्रोत्रैर्याः सुचिरं निपीय दधते शृङ्गारपारं गताः**
**श्रीमत्तिर्मलरायपण्डितमुखाः श्लाघाविलोलं शिरः।।**

**End :-**

अपि च - **तुण्डीरादिषु मण्डलेषु किल मा भूदेव भूदेवता**
**द्रोहिभ्यः कलिकृत्तुरुष्कयवनादिभ्यो रिपुभ्यो भयम्।**
**विज्ञानं निगमान्तजन्यमिह मा विप्लावि चाल्पश्रुतैः**
**शेषाद्रेः शिखरे चिरेण रमया चक्री स च क्रीडतु।।**

**Colophon :-**

।। इति श्रीवाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवदप्पयाचार्यतनूभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथाचार्ययज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन काञ्चीनगरवास्तव्येन सीताम्बागर्भसम्भवेन वेङ्कटाचार्ययज्वना विरचिते प्रद्युम्नानन्दनाम्नि नाटके षष्ठोऽङ्कः ।।

नवसन्दर्भमात्रेयो नाटकं वेङ्कटाध्वरी।
प्रजोत्पत्तौ प्रौष्ठपद्यां पूर्णिमायामपूरयत्।।

**The scribe adds :-**

श्रीमल्लक्ष्मणयोगिपुङ्गवमताकूपारराकाविधो-
रुर्वीमण्डलमण्डनस्य करुणाम्भोधेः पदाम्भोरुहम्।
ध्यात्वा योऽण्णयदेशिकस्य सततं हर्षाम्बुधौ मज्जनं
कुर्वंस्तिष्ठति राघवेण लिखितं तेन प्रियं नाटकम्।।

श्रीमदण्णयसूरीन्द्रं श्रितवात्सल्यभूषितम्।
कलये मम सर्वस्वं करुणावरुणालयम्।।

श्रीमदण्णयसूरीन्द्रपदपङ्कजतल्लजौ।
भक्तसंसारदावाग्निवारिदौ शरणं भजे।।

वत्सकुलाम्बुधिपूर्णसुधांशुः श्रीपतिराघवदेशिकपुत्रः।
राघव एष इहाण्णयसुरेर्दास इमं व्यलिखत् स्वयमेव।।

## No. 12546. प्रद्युम्नानन्दीयम्
## Pradyumnānandīyam

Substance- Paper. Size - 11 3/4 x 8 5/8 inches. Pages - 192. Lines - 18 on a page. Character - Devanāgarī. Condition - good. Appearace - New. Restore from the MS. described under the previous number.

Complete.

Same work as the above.

## No. 12547. प्रद्युम्नानन्दीयम्
## Pradyumnānandīyam

Substance - Palm-leaf. Size - 19 x 1 1/8 inches. Pages - 80. Lines - 7 on a page. Character - Telugu. Condition - good. Appearace - New.

Begins on fol. 1a. The other works herein are Tarkāmṛta 41a, Tarkāmṛtataraṅgiṇī 42b.

Complete.

Same work as the above.

**The scribe adds :-**

**श्रीवङ्गिवंशरचितोदयराघवार्यः श्रीशैलवंशतिलकैरपि चाण्णयार्यैः।**
**उत्पत्तितः सुततया कलितः कलासु व्युत्पत्तितश्च विलिलेख स देशिकाख्यः।**
**प्रति ते नावल्पाब्के प्रद्युम्नानन्दलेखनानन्दम्।**
**देशिकदासमुखेन प्राप्नोच्छोभकृति कार्तिके रामः।**

****

Mysore Oriental Library

**537**

Sl.No. 27588 **प्रद्युम्नानन्दीयम्** **Ms. No. : P. 7133/2**

**Beginning :**

**श्रीमद्धाम समामनन्ति कमलं तद्टान्धवं वा ययोः**
**अक्षीन्दीवररूपमाहु + भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती सम्पदे।।१।।**

अपि च- **श्रीवेङ्कटाध्वरीरचितेन किल निबद्धं प्रद्युम्नानन्दाभिधानम्-**

**End :**

**तुण्डीरादिषु मण्डलेषु किल मा भूदेवभूदेवता**
**द्रोहिभ्यः कलिकृत्तुरुष्कयवनादिभ्यो रिपुभ्यो भयम्।**
**विज्ञानं निगमान्तजन्यमिह मा विप्लावि चाल्पश्रुतैः**
**शेषाद्रेश्शिखरे चिरेण रमया चक्री स चक्रीडतु।।**

।। इति निष्क्रान्तास्सर्वे।।

Colophon :-

**।। इति वाजपेयसर्वपृष्ठाप्तोर्यामयाज्यात्रेयवंशमौक्तिकीभव XXXXX**
**वेङ्कटाचार्ययज्वना**
**विरचिते प्रद्युम्नानन्दनाम्नि नाटके**
**षष्ठोऽङ्कः।।**

Nāṭaka] DESCRIPTIVE CATALOGUE OF SANSKRIT MSS Page No. 448
Kāvya-Nāṭaka- Alaṅkāra (Volume - V)
Adyar Library, Madras

## Sl.No. 3639 **प्रद्युम्नानन्दम् - वेङ्कटाध्वरिकृतम्**

Palmyra Leaves. Foll. 69. 14 1/2 x 1 1/2" Old. Worm-Eaten and highly damaged. Good meadium Grantha Writing. Lines 8 in a Page. Inked. Wooden board at either end. Incomplete. A Nāṭaka based on the well known Epic Story of Pradyumna.

**Begins :** .... **श्रान्तिहरं तपोवनप्रान्तं पर्वतत्रृषेः प्राप्तवानस्ति।**

यतः - **दृश्यन्ते किल पिप्पलक्षितिरुहा धिष्ण्यन्तरस्थायिनः,**
**प्रागग्रैः प्रचितः कुशैरिह सरः प्रान्तो जपान्तोज्झितैः।**
**विस्त्रम्भाद्दृषिडिम्बकाननसरन्त्येणाश्च कण्डूहरा-**
**न्नैवारै रचयन्ति शाखिषु तृणैः नव्यं कुलायं द्विजाः।।**

**Ends :** एवमेतत्। प्रम।। सविस्मयखेदम्।। कष्टमहो महाराजस्यापि कथमधुना प्रत्यनीकनिबन्धना चिन्ता। अहह गहना खलु दैवीगतिः। शम्।। विहस्य।। शिवस्तावत् विषाक्रान्तगलोरिदरभृत्स्वभूः। ब्रह्मापि वारिजोतनासनवान किमु मादृशाः। ?

The Ms. breaks off towords the end of the play. The play was Printed in Telugu Characters at the Vidyātaraṅgiṇī Press, Mysore in 1886.

# ६. पाठभेदपरिष्करणम्

**१. पाठभेदाः :–**

सम्पादितानां मातृकानां तुलनात्मकाध्ययनस्य प्रसङ्गे मूलपाठनां निर्णयः कर्तव्यः अस्ति। तदर्थं मातृकानां पाठभेदाः सङ्कलिताः अधीताश्च। उद्धृताः पाठभेदाः त्रिधा वर्गीकृताः – १. अधिकपाठाः २. नष्टपाठाः ३. अन्यादृशपाठाः अत्रैतेषां विवरणम् उदाहरणमुखेन प्रदर्श्यते।

**१.१ अधिकपाठाः :–**

व्यवस्थीकृतनियमैः निबन्धैश्च सम्पादितमातृकासु काचन मूलत्वेन स्वीक्रियते। सा मूलमातृका इति कथ्यते। यः पाठः मूलमातृकायां न भवति अभावेऽपि अर्थावगमनाय रसस्फूर्त्यै वा रसभङ्गाय वा काऽपि बाधा न भवति, अर्थावगमनाय असङ्गतिर्वा व्याकरणवैरुद्ध्यं वा न विद्यते, अन्यमातृकासु अन्यतमे क्वचित् दृश्यते सः पाठः अधिकपाठः इति अत्र स्वीक्रियते। अस्य पाठस्य योजनेन मूलग्रन्थस्य न किमपि अपूर्वं प्रयोजनं नूतनतया भवति। यथा –

१. प्रथमाङ्के – **अयि! ... मन्मथ शीघ्रमर्पय** इति श्लोकानन्तरम् **इति पुष्पाञ्जलि–मर्पयति** M.Gr. 1 मातृकास्थः इत्ययम् अधिकः पाठः।

२. द्वितीयाङ्के – **इत्यर्थोक्ते मूर्च्छामभिनयति** M.Gr. 1 मातृकास्थः इत्ययम् अधिकः पाठः ।

**१.२. नष्टपाठाः :–**

मूलमातृकायाः मातृकान्तरैः तुलनात्मकाध्ययनप्रसङ्गे अधिकाधिकः भागः समानमेव भवति। परं कस्याञ्चित् मातृकायां सः पाठः नष्टः भवति। अत एव सः मातृकापाठः मूलत्वेन न परिगण्यते। तथापि औचित्याय तु कदाचित् सः पाठः परिशील्यते। यथा–

१. प्रथमाङ्के – **निर्वर्ण्य** इत्ययं पाठः M.Gr. 1 मातृकायां नष्टः विद्यते।

२. प्रथमाङ्के – **ओ आरा इत्यत्र उ ओ उप इत्यनेन उपेत्यस्य ओकारादेशः** इत्ययं M.Gr. 1 इति मातृकास्थः टीकापाठः नष्टः वर्तते ।

३. प्रथमाङ्के – **इति पुष्पाञ्जलिमर्पयति** M.Gr. 1 मातृकास्थः इत्ययम् नष्टः पाठः विद्यते।

४. प्रथमाङ्के – **विचक्षणे किमस्याः देव्याः मम वयस्ये रागानुबन्धनिमित्तम्** इति छाया M.Gr.1 मातृकायां नष्टः विद्यते।

**१.३. अन्यादृशपाठाः :–**

मूलमातृकायाः सम्पादितमातृकान्तरैः तुलनायां क्वचित् मातृकान्तरेण अन्यादृशतया यथातथं तुलनाम् अवहन्तः केचनपाठाः लभ्यन्ते। तादृशाः पाठाः अन्यादृशपाठाः इति वर्गीकृताः। तेषामुदाहरणानि–

१. **वीरविभावरी** इति स्थाने M.Gr. 1 इति मातृकायां तालपत्रे रिक्तं वर्तते।

२. **।। इति श्रीवेङ्कटाचार्ययज्वनः कृतिषु प्रद्युम्नानन्दनाम्नि नाटके द्वितीयोऽङ्कः।।** इति स्थाने My.Tel. Print. इति मातृकायां **द्वितीयोऽङ्कः** इत्येतावदेव अस्ति।

३. **कन्दलितप्रेमानुबन्धमन्तःकरणम्** इति स्थाने M.Gr. 1 इति मातृकायां **कन्दलिति प्रेमानुबन्धः** इत्येवास्ति।

४. **पुनःपुनः** इति स्थाने M.Gr. 1 इति मातृकायां **फणसि** इति अस्ति।

**२. शुद्धपाठनिर्णयोपायाः :–**

मूलमातृकायाः मातृकान्तरैः तुलनात्मकाध्ययनप्रसङ्गे मातृकान्तरस्थितपाठात् भिन्नतया शुद्धपाठनिर्णयाय केचन मार्गाः अनुसृताः। तत्र क्वचित् व्याकरणप्रक्रियारीत्या, क्वचित् न्यायरीत्या सिद्धं प्रसिद्धरूपमेव शुद्धपाठत्वेन स्वीकृत्य मूलमातृकायां स्थापितम्।

**२.१. व्याकरणप्रक्रियारीत्या तस्य उदाहरणानि :–**

| स्वीकृतः मूलमातृकापाठः (My.Tel.Print./ T. Gr. 1) | | त्यक्तः मातृकान्तरपाठः (M.Gr. 1 ) |
|---|---|---|
| १. स्वपिति | – | स्वपति |
| २. शृणोषि | – | श्रुणोषि |
| ३. पृच्छ | – | पृच्छस्व |

**❊ स्वपिति – स्वपति :–**

स्वप् धातोः वर्तमानकाले लटि प्रथमपुरुषैकवचने स्वप् + ति इति जाते रुद्-स्वप्-श्वस्-अन्-जक्ष् एभ्यः वलादेः सार्वधातुकस्य इट् (इ) स्यात् इत्यर्थकेन रुदादिभ्यः सार्वधातुके (२४७४/७.२.७६) इति सूत्रेण इडागमे इकारे स्वप् + इ + ति = स्वपिति रूपं भवति। अतः तत्स्थाने मातृकान्तरेषु (M.Gr. 1) स्थितम् स्वपति इति रूपं अपपाठः इति कृत्वा परित्यक्तः। स्वपिति इत्येव शुद्धपाठत्वेन निर्णीतः।

**❊ शृणोषि – श्रुणोषि (शृणु – श्रुणु) :–**

शृ–श्रवणे धातुः तस्य सार्वधातुकलकाराणां (लट्, लोट्, लङ्, विधिलिङ्) रूपेषु श्रुवः शृ इत्यादेशः स्यात् श्नु–प्रत्ययश्च भवति, अयं शपः अपवादः – इत्यर्थकेन श्रुवः शृ च (२३७६/३.१.७४) इति सूत्रेण शृ इत्यादेशः श्नु प्रत्ययश्च भवति। शृणोषि – शृणु इति शकार–ऋकारघटातानि रूपाण्येव साधूनि भवन्ति। न तु श्रुणोषि – श्रुणु इति शकार-रकार–उकारघटितानि रूपाणि – इति शृणोषि – शृणु प्रभृतीन्येव शुद्धपाठत्वेन निर्णीतानि।

**❊ पृच्छ – पृच्छस्व :–**

प्रच्छ–ज्ञीप्सायाम् इति तौदादिकः धोतुः परस्मैपदी। तस्य लोट् मध्यमपुरुषैकवचने

| | | |
|---|---|---|
| **भव, भवतात्** | **– भवतम् – भवत** | इति भूधातुरिव |
| **पृच्छ, पृच्छतात्** | **– पृच्छतम् – पृच्छत** | |

इत्येव भवति। न तु **वर्धस्व, लभस्व, सेवस्व, वन्दस्व** इत्यादि आत्मनेपदधातूनां रूपाणि इव पृच्छस्व इति। अतः पृच्छ इत्यस्यैव साधुपाठत्वेन निर्णीतः।

**२.२. सन्धिकार्यनुगुणतया निर्णीतः शुद्धपाठः :–**

**❊ मञ्जूद्गतानि – मञ्जूत्कतानि/ संस्कारोद्बोधकानि – संस्कारोत्बोधकानि :–**

मञ्ज् + उत् + गतानि / संस्कार + उत् + बोधकानि इति दकारघटितान् एव प्रयोगान् साधुत्वेन निर्णीय मूलमातृकायां स्थापिताः। तथा हि – संस्कृतव्याकरणे झलां जशोऽन्ते (८४/८.३.३९) इति सूत्रं विद्यते। तस्य पदान्ते झलां जशः स्युः इत्यर्थः। प्रकृते मञ्ज् + उत् / संस्कार + उत् इत्युभयत्र उत् इत्यत्र तकारस्य तकाररूपस्य झलः अनेन सूत्रेण जश्त्वे दकारे उद् इति भवति। अतः उद् इति दकारघटितप्रयोगः एव साधुः इति

मञ्जूद्गतानि/ संस्कारोद्बोधकानि इत्येतादृशाः प्रयोगाः शुद्धपाठाः कृताः। तकारघटितास्तु असाधवः इति परित्यक्ताः।

**२.३. विशेषण–विशेष्यभावं पुरस्कृत्य शुद्धपाठनिर्णयः :–**

क्वचित् विशेषण–विशेष्ययोः समानत्वमस्ति वा न वा इति आधारीकृत्यापि शुद्धपाठस्य निर्णयः कृतः। तथा हि – संस्कृतव्याकरणे यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य, तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्यापि – इति काचन व्यवस्था अस्ति। तदनुसारेण विशेषण–विशेष्ययोः समानलिङ्गत्वं समानवचनत्वं समानविभक्तित्वं च साध्यते। यदा विशेषण–विशेष्ययोः आनुगुण्यस्य भङ्गकरः प्रयोगः सह अवपाठः। विशेषण–विशेष्ययोः सङ्गतिरक्षकः प्रयोगस्तु शुद्धपाठः इति निर्धार्यते। उदा –

**❋ प्रहिताऽस्मि – प्रहितोऽस्मि :–**


अयं प्रयोगः तृतीयाङ्के मायायाः सम्भाषणे वर्तते। माया इति स्त्रीलिङ्गशब्दः स च विशेष्यवाचकः। तदनुगुण्यसम्पादकतया प्रहिता इति विशेषणवाचकः अपि स्त्रीलिङ्गे एव विद्येत। एवं सति उपर्युक्तव्यवस्थानुसारेण प्रहिताऽस्मि इति प्रयोग एव साधुत्वेन निश्चितः।

**❋ अदः वनम् – अमुं वनम् :–**

अयं प्रयोगः प्रथमाङ्के विदूषकसम्भाषणे अस्ति। अत्र वनशब्दः नपुंसकलिङ्गः विशेष्यवाचकः। तस्य विशेषणभूतः अदस्शब्दोऽपि नपुंसकलिङ्गे एव विद्येत। अदस्शब्दस्य नपुंसकलिङ्गप्रथमैकवचने अदः इति रूपं भवति। तथा सति अदः वनम् इति प्रयोग एव साधुः भवति इति स एव स्वीकृतः। विशेषण–विशेष्ययोः अननुकूलत्वात् अमुं वनम् इति प्रयोगः परित्यक्तः।

एतावता शुद्धपाठानां निर्णयाय अनुसृताः मार्गाः सोदाहरणं प्रदर्शिताः।

एवं सम्पादितमातृकानां तुलनात्मकं पाठभेदाध्ययनं तत्र अधिकपाठ–नष्टपाठ–अन्यादृशपाठानां क्रोडीकरणम्, शुद्धपाठनिर्णयोपायाः प्रस्तुताः।



**Governement Oriental Manuscripts Library (GOML), Madras (=M.Gr. 1)**

**MS.No. 12545 in** Grantha Matruka-1, Leaves Nos. 16, 17, 18, 19 - B





**Governement Oriental Manuscripts Library (GOML), Madras (=M.Gr. 1)**
MS No. 12545 in Grantha Matruka 1 Leaves Nos. 87, 88, 89, 90 - B




**Governement Oriental Manuscripts Library (GOML), Madras.** MS.No. 12547 in Telugu Script. **7, 9, 8, 10, 11, 12 Leaves**

Oriental Research Institute, Mysore (My. Tel. Print.) - Ptd. in Telugu script. Vidyātaraṅgiṇī Press. Mysore, 1886. Pages 14, 15. Total Pages = Cover Page + i-vii + 1-130 + ii





Oriental Research Institute, Mysore (My. Tel. Print.) - Ptd. in Telugu script. Vidyātaraṅgiṇī Press. Mysore,1886.Pages 26, 27



**Sri Venkateswara Oriental Research Institute (SVORI), Tirupati (=T.Gr. 2)** Grantha Matruka 2 Leaves Nos.

**भूमिकोपसंहारः :-**

एवम् अस्यां भूमिकायां काव्यवैशिष्ट्यम्, ग्रन्थकर्तुः वेङ्कटाध्वरिणः जीवनविशेषाः, अत्रिमहर्षिगोत्रापत्यादि, वंशावलिः, कालविचारः, वेङ्कटाध्वरिणः कृतयः समुपस्थापिताः। तदनु मातृकायाः अन्वेषणक्रमः, सङ्कलनम्, मूलमातृकानिर्णयः, मूलपाठनिर्णयः, मातृकावंशावलिः इत्यादि मातृकासम्पादनविधानम् विशदरूपेण प्रोक्तम्। अपि च प्राक्तनपुटेषु काश्चन मातृकाप्रतिकृतयः (Photo Copices) समुपस्थापिताः।

अथ सम्पादितग्रन्थः **प्रद्युम्नानन्दीयनाटकम्** इत्याख्यः पाठसमीक्षात्मकपुरस्सरं समुपस्थाप्यते।।

# प्रद्युम्नानन्दीयनाटकपात्राणि

**पुरुषपात्राणि :–**

**१. सूत्रधारः** – नाटकसञ्चालकः।
**२. नटः** – नाटकेऽस्मिन् पात्रधारी कश्चित् यूनः ।
**३. नारदः** – त्रिलोकसञ्चारी देवर्षिः, पर्वतस्य मातुलः
**४. पर्वतः** – महर्षिः, नारदस्य भागिनेयः
**५. विदूषकः** – मौञ्जायन इति नामधेयः, नायकस्य प्रद्युम्नस्य मित्रम्
**६. प्रद्युम्नः** – **नायकः**, मन्मथावताररूपः, श्रीकृष्णात् रुक्मिण्यां सञ्जातः, शम्बरासुरं हत्वा मायावतीं द्वारकां नयति।
**७. लब्धवर्णः** – ऋक्षवन्तपुरस्य महेन्द्रस्य शम्बरस्य गूढचारः।
**८. सोमश्रवाः** – महायोगी, सुशीलस्य गुरुः।
**९. सुशीलः** – महायोगिनः सोमश्रवसः शिष्यः।
**१०. मुनयः** – आर्ताः, दर्भकमुन्याश्रमवासिनः।
**११. कञ्चुकी–१–** रथाङ्ककः, शम्बरासुरसेवकः अन्तःपुरसञ्चारी, जराभरालसः कृच्छ्रेण वेत्रयष्टिः।
**१२. दुर्धरः** – शम्बरासुरस्य सचिवः, प्रद्युम्नवधोपायं चिन्तयति।
**१३. केतुमाली** – शम्बरासुरस्य सचिवः, प्रद्युम्नवधोपायं चिन्तयति।
**१४. प्रमर्दनः** – चित्रसेन–कुम्भसेनयोः सखा, शम्बरासुरपक्षपाती, प्रद्युम्नवधोपायं चिन्तयति।
**१५. राक्षसः** – शम्बरसेवकः, समराङ्गणवृत्तान्तसमावेदकः।
**१६. शम्बरः** – नायकेऽस्मिन् प्रतिनायकः । ऋक्षवन्नगराधीशः, राक्षसः प्रद्युम्नस्य शत्रुः।
**१७. चित्रसेनः** – शम्बरपुत्रः, कुमार! चित्रसेन! इति आहूयते।
**१८. कुम्भसेनः** – शम्बरपुत्रः ।
**१९. सूतः** – शम्बरस्य रथचालकः।
**२०. शिष्यः** – पुण्डरीकनामधेयः (नारदेन सम्भाषणं करोति।)
**२१. मातलिः** – इन्द्रसारथिः ।
**२२. पुरुषः** – द्वारकावासी, राजसेवकः ।
**२३. कृष्णः** – द्वारकाधीशः, प्रद्युम्नस्य जनकः।

२४. **मुनीन्द्राः** – नारदादिमुनीन्द्राः, द्वारकायां यथोचितासनोपविष्टाः प्रद्युम्नागमनं प्रतीक्षन्ते।

२५. **कञ्चुकी–२**– द्वारकायां राजसेवकः। प्रद्युम्नागमनवार्तां सूचयति ।

२६. **सभ्याः** – द्वारकासभाजनाः।

**स्त्रीपात्राणि :–**

१. **मायावती** – **नायिका,** रतीदेवी, मन्मथस्य पत्नी शिवोपदिष्टमायाविद्यया मायावतीरूपेण शम्बरस्य गृहे पाकशालाधिकारं प्राप्य निजपातिव्रत्यं रक्षन्ती तिष्ठति।

२. **विचक्षणा** – मायावत्याः एका सखी।

३. **मनोरमा** – मायावत्याः द्वितीया सखी।

४. **कलकण्ठी** – मायावत्याः परिचारिका।

५. **माया** – मायावत्या प्रयुक्ता, मायाशार्दूलरूपं धृत्वा दर्भकमहर्षेः आश्रमं प्रविशति ।

६. **रुक्मिणी** – पट्टमहिषी, प्रद्युम्नस्य माता ।

।। श्रीः।।

।। श्रीहयग्रीवाय नमः।।

श्रीवेङ्कटाचार्यविरचितम्

# प्रद्युम्नानन्दीयनाटकम्

## प्रथमोऽङ्कः

**श्रीमद्धामसमामनन्ति कमलं तष्टान्धवं वा ययो-**
**रक्षीन्दीवररूपमाहुरथवा तष्टन्धुरूपं बुधाः।**
**सावर्ण्यं तटितावपुश्शुभतरं धत्तेऽथवा तद्वता**
**भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती सम्पदे।। १।।**

अपि च—— **कृष्णेन स्नानकेळौ वसनमपहृतं याचमानास्सलज्जं**
**कालिन्द्यां गोपकन्याः प्रहसितुमपरास्वागतास्वङ्गनासु।**
**तं दृष्ट्वा लोभनीयं स्मरविवशतया स्रस्तवस्त्रासु तौल्यात्**
**सानन्दाः पश्यतस्ताः कलयतु कुशलं तस्य मन्दस्मितं नः।। २।।**

**।। नान्द्यन्ते।।**

**सूत्रधारः** **:-** (नेपथ्याभिमुखमवलोक्य)——

इह खलु निखिलभुवनजननस्थितिसंस्थितिभिरभिक्रीडतो भगवतो वक्षस्थलविलग्न-लक्ष्मीचरणनळिनलाक्षासाक्षात्कारनिर्धारितपरब्रह्मभावस्य वरेण्यलावण्यश्रीकेळिगेहेन देहेन वार्षिक[1]वलाहकच्छायाडम्बरविडम्बिनो वेङ्कटकुटुम्बिनो[2] देवस्य सेवावसरसमवेतैर्हृद्यानवद्यविद्यानिषद्यायमानमानसैस्सादरमहमादिश्ये मारिषपारिषदैः[3]।।

---

1. M. Gr.1 वार्षुक० 2. M. Gr.1 वेङ्कटेशकुटुम्बिनो 3. M. Gr.1 परिषदादेशः

*।। प्रविश्य नटः।।*

**नटः** :- भाव ! कीदृशः पारिषदादेशः।

**सूत्रधारः** :- **उदारवीरशृङ्गारोद्दीपकं रूपकं त्वया।**
**नव्यमत्र प्रयोक्तव्यमुत्तमश्लोकनायकम्।। ३।।** इति।।

**नटः** :- किं तर्हि रूपकेषु प्रभवति सभास्तारानाराधयितुम्।

**सूत्रधारः** :- किमन्यन्नाटकात्। तथा हि—

**(१) कल्याणनायकगुणे सुदृशां स्तनमण्डले।**
**नाटके हाटके चैव न चेतः कस्य रज्यति।। ४।।**

**नटः** :- एवमेवैतत्।

**सूत्रधारः** :- (**"कस्य कृत्या ? किन्नामकेन नाटकेन परिषदं प्रहर्षयाणी"**ति[1] विमर्शमभिनयन् सस्मरणबहुमानम्।) मारिष! तदेतदवधार्यताम्—

**आविर्भावमुपेयिवान् शुभयशस्यत्रेः पवित्रे कुले**
***श्रीमानप्पयदेशिकाध्वरिमणि*-जागर्ति कीर्त्या भुवि।**
**अस्तोकैर्यदनुष्ठितैर्मखवरैर्हस्तिक्षमाभृत्पतिस्तां**
**वैतानवपाहविः कबळनक्रीडां पुनस्स्मारितः।। ५।।**

अपि च स एव संस्कृतनाम्ना—

**अत्रेरत्रपवित्रयन्नभिजनं जागर्ति बोधाम्बुधि-**
**श्श्रीमानाश्रयतां भवार्णवतरिश्*श्रीश्रीनिवासा*-भिधः।**
**यूपो यत्कृतवाजपेयमखभूवेदिप्रतिष्ठो वह-**
**त्याशामण्डनकीर्तिपाण्डरजयच्छत्रैकदण्डश्रियम्।। ६।।**

---

१. **कल्याणनायकगुणे** - इत्यादि। नायको हारमध्यमणिः गुणस्तत्सूत्रं कल्याणौ मनोहरौ तौ यस्मिन् स्तनमण्डले। कल्याणाः उत्कृष्टाः कथानायकगुणाश्शौर्यौदार्यादयो वर्ण्यत्वेन यस्मिन्नाटके। हाटकपदं धनोपलक्षणम्। नायको धनस्वामी। गुणाः दानभोगादयः कल्याणाश्श्रेष्ठा यस्मिन् हाटके इत्यर्थः दानभोगाद्युपयोगिनि धने इति यावत्।।

---

1. M. Gr.1 प्रहर्षयाणिति

किञ्च— **यतिपतिमतधुर्यो यस्य सिंहासनस्थ-क्षितिपतिगुरुरुच्चैरद्भुतौदार्यधैर्यः।**
**अजनि विमलशीलो मातुलो भूतलोद्य-त्कुमततिमिरसूर्य*स्तातयाचार्यवर्यः*।।७।।**

तस्य किल तनूभवः।

**आत्रेयान्वयजृम्भितस्सततमप्यन्तर्मुकुन्दं वहन्**
**सारज्ञै *रघुनाथदीक्षितकवि*-क्षीराब्धिराराध्यते।**
**प्रौढालङ्करणा पवित्रपदविन्यासा गभीरध्वनि-**
**र्यस्यास्यादुदिता[1] ददाति कवितास्वर्धेनुरर्थान् बहून्।। ८।।**

किञ्च **(२) परमप्रभयाऽतुलोऽकलङ्कः, कृतदानश्च महाच्छविप्रहस्ते।**
**भुवि भाति विधूतदूषण-*श्रीरघुनाथार्यमखी* यथार्थनामा।। ९।।**

**तस्यैतस्य तनूभवः कविरयं त्रय्यञ्चलव्याक्रिया-**
**तर्कप्रौढचमत्क्रियासु निपुणो मीमांसकोत्तंसकः।**
**तत्तादृक्कविता सरोजसविता दत्ताशयश्श्रीपते-**
**श्शेषक्ष्माधरवासिनश्चरणयो-*श्श्रीवेङ्कटार्याध्वरी*।। १०।।**

तेन किल निबद्धं प्रद्युम्नानन्दाभिधानमभिनवम् नाटकमभिनयद्भिरस्माभिरानन्दयितव्या परिषदेषा।

---

२. **परमप्रभयेत्यादि।** परमप्रभया उत्कृष्टकान्त्या। **अतुलः** - असदृशः। **अकलङ्कः** - कलङ्करहितः। **महान्** विद्यागुणादिना। **अच्छः** बाह्याभ्यन्तशुचित्वेन यो विप्रो ब्राह्मणः तस्य हस्ते कृतं दानं वितरणं येन पात्रे त्यागीति यावत्।। दूषणानाम् अन्यकर्मकाणाम् - अन्यकर्तृकाणाम् वा श्रीस्समृद्धिः विधूता वर्जिता येन सः तादृशः रघुनाथार्यमखिकवेः पितेति प्रकृतार्थः।।

परमत्यन्तं श्रीरामविक्रमभीत्या अप्रभाः कान्तिहीनाः यातु लोकाः राक्षसजना यस्यां तादृशी लङ्का यस्येत्यर्थः।। महतीच्छविः कान्तिर्यस्य तादृशे प्रहस्तनामकसेनापतौ कृतं दानं खण्डनं तच्छरीरभेदनं येन सः। **दूषणस्य** दूषणाख्यस्य खरसहचरस्य राक्षसस्य श्रीश्शौर्यादिसमृद्धिः **विधूता** - निरस्ता येन रामेणेत्यप्रकृतार्थः।।

---

1. M. Gr.1 ०ध्वनिर्यस्मादभ्युदिता

**नटः** :- हृदयङ्गमोऽयं परिषदभितोषणोपायः। सारग्राही खल्वसि। तथा हि—

**कल्पन्ते विदुषां मुदे स्मरवधूकर्णावतंसोत्पल-**
**स्वैरोदञ्चितशीधुपूरसुहृदश्श्रीवेङ्कटार्योक्तयः।**
**श्रोत्रैर्या सुचिरं निपीय[1] दधते शृङ्गारपारङ्गताः[2]**
***श्रीमत्तिर्मलरायपण्डितमुखा*-श्श्लाघाविलोलं शिरः।। ११।।**

किं बहुना— **एकेनैव दिनेन काव्यरचनामीष्टे विधातुं तथा**
**शास्त्राणामपि शक्नुयात् कलयितुं टीकामनायासतः।**
**शक्तो युक्तिमहोर्मिभिश्शमयितुं दुर्वादिगर्वानलं**
**दासश्श्रीसखसेविनां स जयति *श्रीवेङ्कटार्याध्वरी*[3] ।। १२।।**

अपि च **(३) अच्छलवादरणेच्छो रक्षोपायक्षमात् स रघुनाथात्।**
**अतिथिजनकोमलमना जातश्श्रयते पराङ्कुशस्य स्मृतिम्।। १३।।**

**सूत्रधारः** :- साधु मारिष! सर्वमपि दैवानुग्रहात्साम्प्रतमुपपन्नमिति नाट्यसामग्रीः पश्य।

**आत्रेयस्य कवेरुदारफणितिश्श्रोत्रेषु हर्षं सतां**
**दुग्धे मुग्धवधूजनाधरसुधाऽहङ्कारहुङ्कारिणी।**
**सारङ्गाश्च सभासदो वयममी सर्वोत्तरानर्तने**
**प्रायः किं बहुना चिरात्फलति नः प्राचीनभाग्यागमः।। १४।।**

---

**३. अच्छलवादेत्यादि।। अच्छलम् -** अवञ्चनं वादात्मकं यद्रणं तदिच्छोः। न्यायमार्गेणैव प्रतिवादिनिग्रहाकाङ्क्षिणः। रक्षोपाये शरणागतरक्षणे स्वयंकृतभगवत्प्रपदनेह **क्षमात् -** समर्थात्। रघुनाथात्तदाख्यात् पितुः जातः अतिथिजनविषये कोमलं मृदुलं मनो यस्य सः तादृशः कविः। अच्छः निर्मलः **लवः** - लवाख्यपुत्रः। तदादरणं तदुपलालनं तदिच्छोः पुत्रलालनाकाङ्क्षिण इत्यर्थः। रक्षसामपाये नाशे क्षमात् - शक्तात् रघुनाथात् - श्रीरामाज्जातः अतिथेः तन्नामकस्य पुत्रस्य जनकः उत्पादकश्च यः कुशः कुशाख्यश्रीरामपुत्रः अतिथिं नामराजेन्द्रात्पुत्रमाप कुमुद्वती। पश्चिमाद्यामिनी यामात्प्रसादमिव चेतनेति रघुवंशचतुर्दश-सर्गस्थप्रथमश्लोकादिना कुशस्य अतिथिनामापुत्र इति प्रसिद्धम्। तस्य कुशस्य पराम् उत्कृष्टां सृतिम् आस्तिक्यपितृभक्त्यादिसन्मार्गम्। पराङ्कुशस्येति समुदायेन श्रीशठकोपार्यस्येत्यपि प्रतीयते तत्सृतिं भगवत्प्रपदनतद्गुणानुसन्धानादिपरमैकान्तिभक्तिमार्गं च श्रयते लभत इत्यर्थः।।

---

1. M. Gr.1 निपीय्य    2. M. Gr.1 ०परङ्गता    3. My. Tel. Print. श्रीवेङ्कटाध्वरी।।

सभाकृतिनायकाभ्यां प्रयोगस्यास्य समुपनता पावनता भोग्यता च।। यतः—

**अन्तर्यामितया चिरन्तनगिरामन्तेषु निर्धारितो**
**दिष्ट्या हन्त स एव वेङ्कटपतिर्देवस्सभानायकः।**
**श्रीकृष्णस्य जगत्प्रभोस्तनुभवश्शृङ्गाररङ्गावनिः**
**प्रख्यातः *कृतिनायकस्तु* भगवान् प्रद्युम्न एव स्वयम्।। १५।।**

तस्मादस्मासु समग्रो दैवानुग्रहः येनाधुना यत्नमनपेक्ष्यैव प्रयोगसामग्री पुष्कला भवति।।

**सूत्रधारः** :- अघटितघटनापटीयसो हि दैवस्य नैतादृशं दुष्करम्। तथा हि—

**(४) पाथोधिं प्राप्य यादो मुखगतमपि वाऽजीवयेद्दैवयोगो**
**मायादक्षं स्वसैन्यैर्वृतमपि दळयेन्मर्त्यमात्रेण दैत्यम्।**
**स्त्रीपुंसौ हन्त! जन्मान्तरकृतविरहौ योजयेदेव कृच्छ्रा-**
**दप्रत्यूहप्रवाहं भुवि नियमयितुं के वयं दैवयत्नम्।। १६।।**

**नटः** :- एवमेवैतत्।[1]

**सूत्रधारः** :- प्रस्तुतं श्रूयताम्— अमुं किल प्रबन्धमारभमाणस्सुकविरञ्जलिबन्धपूर्वकमत्र भवतस्सुधीन्द्रानित्थं व्यजिज्ञपत्।

**समीचीनां वाचां रुचिरमधुवीचीरसमुचां**
**प्रगल्भे सन्दर्भे प्रथितमहिमा वेङ्कटकविः।**
**बुधास्साहित्याम्भोनिधिभवसुधापानरसिकाः**
**समाराद्धुं युष्मांत्सविनयमिदानीं प्रयतते।। १७।।**

**सन्तः प्रगृह्य गुरुणा करुणारसेन**
**वाणीं मम च्युतगुणामभिजातयन्तु।**
**क्षारस्स्वतः परिचयेन महाघनानां**
**सारस्वतः किमु न मुञ्जुरपां[2] प्रपञ्चः।। १८।।** इति।

४. **पाथोधिं प्राप्य यादो मुखे**त्यादिश्लोकेन प्रकृतकथासूचनं कृतम्।।

1. My. Tel. Print. एवमेतत्
2. T. Gr.1 मञ्जुरपां

अलं विलम्बेन प्रयतितव्यं प्रयोगाय (इति नेपथ्याभिमुखमवलोक्य) प्रकृतसमयोचितं प्रगीयताम्।

*।। नेपथ्ये गीयते* ।*

**(५) विरहिजणकदे[1] वणंपिओ विसड[2]सरोवअएंकसूअओ।**
**सुदिसुहसुहगाणदंखिणो पविसदि पंवदकाणणतर[3]।। १९।।**

**(विरहिजनकृते वनप्रियो विषमशरोपचयैकसूचकः[4]।**
**श्रुतिसुखशुभगानदक्षिणः प्रविशति पर्वतकाननान्तरम्।। १९।।)**

**सूत्रधारः** :- हन्त ! प्रक्रान्तमेवास्मदीयैः। यदेषा प्रसूनविशिखावतारस्य प्रद्युम्नस्य प्रादुर्भूतं यौवनं मायावतीं प्रति निवेद्य पुनरमरावतीं प्रस्थातुं पर्वताश्रमप्रान्तपदवीमवतीर्णस्य नारदमुनेः प्रावेशिकी ध्रुवा गीतिः। तदा वामप्यनन्तरकरणीयाय सज्जीभवाव (इति निष्क्रान्तौ)।।

**।। इति प्रस्तावना।।**

---

५. **विरहिजने**त्यादि।

**।। छाया।। विरहिजनकृते वनप्रियो विषमशरोपचयैकसूचकः।**
**श्रुतिसुखशुभगानदक्षिणः प्रविशति पर्वतकाननान्तरम्।।**

**विसडसरेत्यत्र तु डो विषम** - इति सूत्रेण विषमशब्दे मकारस्य वा डः।। -।।

**अत्रोच्यते।** प्राकृतशब्दलेखने तत्तद्वर्णद्वित्वबोधनार्थं तत्तद्वर्णपूर्वपार्श्वे बिन्दुन्यासः। तत्तद्वर्णोत्तरमुच्चार्यमाणबिन्दोः तत्तद्वर्णशिरोभागे न्यास इति प्राचीनपद्धतिरस्ति। एवं लेखने लेखकस्य पठितुश्च महान् क्लेशः परं जायते।

---

1. M. Gr.1 विरहिजनकिए 2. M. Gr.1 विसम
3. M. Gr.1 पविसइ पंवअकाणणंदरं।।, T. Gr.1 पंवदकाणणं तरं।।
4. M. Gr.1 शरोपचारैकसूचकः।

*।। ततः प्रविशति नारदः सहर्षम्।।*

**नारदः** :- हन्त! व्यतिक्रान्तदन्तुरकान्तारः श्रान्तिहरं तपोवनप्रान्तं पर्वतमहर्षेः प्राप्तवानस्मि।

यतः — **दृश्यन्ते किल पिप्पिलक्षितिरुहाधिष्ण्यान्तरस्थायिनः**
**प्रागग्रैः प्रचितः कुशैरिह सरःप्रान्तो जपान्तोज्झितैः।**
**विस्रम्भादृषिडिम्भकाननुसरन्त्येणाश्च कण्डूहरा-**
**न्नैवारै रचयन्ति शाखिषु तृणैर्नव्यं कुलायं द्विजाः।। २०।।**

किञ्च— **अमी तीर्थस्नानप्रयतमुनिहस्ताम्बुजपुट-**
**प्रकीर्णाऽर्घ्यासारप्रसृमरकणाकर्षशिशिराः।**
**विलुम्पन्ति क्लान्तिं मृदुलतुलसीसौरभभर-**
**प्रसन्नास्सञ्छिन्नप्रबलसृजिनामन्दपवनाः।। २१।।**

(पुनस्सविस्मयम्) सञ्चरन्ति चात्र मिथस्सन्त्यक्तवैराणि सत्त्वानि।

---

फलं वा प्रमाणं वा न किञ्चिदप्युपलभ्यते। परन्तु श्रीमद्वाल्मीकिमहर्षिप्रणीतप्राकृत-व्याकरणसूत्रविरुद्धेयम्। तथा हि - तत्तद्वर्ग्यसमवर्णद्वित्वे द्वयोर्मध्ये पूर्वस्य युग्वर्णस्य तत्तत्पूर्ववर्ण आदेशस्स्यादित्यर्थकेन **पूर्वमुपरिवर्ग्यस्य युजः** इति सूत्रेण मुख्यमित्यादौ यलोपे खद्वित्वे खकारद्वयप्राप्तौ प्रथमखकारस्थाने तत्पूर्वः ककारः अर्घ्यमित्यादौ रेफयकारलोपे घकारद्वित्वे घद्वयप्राप्तौ पूर्वघकारस्थाने तदव्यवहितपूर्वो गकारश्च विहितः। अतो मुक्खमित्यादौ ककार-खकारसंयोगः अग्घमित्यादौ गकार-घकारसंयोगश्च प्रतीयते। तथैवोच्चार्यते च।

अत एव प्राकृतसूत्रकृता श्रीकात्यायनमहर्षिणाऽपि द्वित्वप्रकरणपठितेन वर्गे युजः पूर्वमिति सूत्रेणायं क्रमः प्रादर्शि। किञ्च संस्कृतशब्दव्युत्पादकसूत्रकृता श्रीपाणिनिमहर्षिणाऽपि तत्तद्वर्गद्वितीयवर्णयोर्मध्ये पूर्वस्य खरि चेति चर्त्वेन तत्तत्पूर्वस्य ककारादेः चतुर्थवर्णयोर्मध्ये पूर्वस्य झलां जश् झशीति जश्त्वेन तत्तत्पूर्वस्य गकारादेश्च विधानात्संस्कृतशब्देषु सर्वत्र तथैव लिख्यते पठ्यते च।

एवमनेकप्रमाणसत्त्वेऽपि संस्कृतलेखनक्रमं विहाय तत्तद्वर्णद्वित्वबोधनार्थं तत्तत्पूर्वपार्श्वे बिन्दुलेखनं वर्णोत्तरं लेखनीयबिन्दोश्शिरोभागे लेखनं चाफलमप्रमाणं च केवलं लेखकपठितृक्लेश-मात्रकारणमिति मत्वा तत्क्रमं विहाय प्राकृतशब्देषु सर्वत्र संस्कृतवदेव लेखनं कृतम्। परन्तु प्राचीनपद्धतिस्वरूपप्रदर्शनार्थ-मिदमेकं वृत्तं तथालिखितम्। अत्र गुणदोषौ विमृश्य प्रमाणं चान्विष्य दोषज्ञैर्महात्मभिर्बोधनीयमित्यभ्यर्थ्यते।।

तथा हि— **भ्रमद्गरुडपक्षतिप्रविपुलातपत्रच्छटा**
**निराकृतदुरातपस्स्वपिति[1] भोगिसार्थस्सुखम्।**
**गभीरगिरिकाननाक्रमणजं च पञ्चाननाः**
**श्रमं प्रशमयन्त्यमी चटुलदन्तिकर्णानिलैः।। २२।।**

तदद्य तत्र भवता पर्वतेन सह सम्भाष्यैव साधयिष्याम्यमरावतीम् (इति कतिचित्पदानि सत्वरं गत्वा पुरोऽवलोक्य,) अहो योगदृष्ट्यैव मामिहागतमवधार्य प्रत्युद्गच्छति भगवान् पर्वतः।

***।। प्रविश्य पर्वतः।।***

**पर्वतः** :- (सप्रश्रयमञ्जलिं बद्ध्वा।)

**त्रैलोक्यचरितं कृत्स्नमालोक्य मुदमीयुषे।**
**शारदाम्बुदगौराय नारदाय नमोऽस्तु ते।। २३।।**

**नारदः** :- (सबहुमानम्)

**(६) महोन्नतिजुषं भद्रमृगादीनां समाश्रयम्।**
**सद्वंशजातमभ्येतु पर्वतं त्वां मदञ्जलिः।। २४।।**

**पर्वतः** :-
**भगवन् ! सन्दर्शनं तव चिरविरहशोकं दळयति।**
**कन्दळयति च महान्तमानन्दमन्तःकरणस्य।। २५।।**

---

**६. महोन्नतिजुषमि**त्यादि। महोन्नतिः महामहिमा। भद्रं शुभचरित्रम् ऋगादीनाम् ऋग्वेदादीनां, समाश्रयम्। सद्वंशजातम्। सत्कुलोत्पन्नम्। पर्वतम् - पर्वतसंज्ञकमृषिमिति प्रकृतार्थः।। महोन्नतिजुषम् महदुच्चत्वं प्राप्तम्। भद्रामृगाश्च गजविशेषा इति श्रीरामायणव्याख्याने प्रसिद्धाः यद्वा भद्राः मङ्गलाकृतयः मृगाः हरिणादयः तेषां समाश्रयम्। सत् - विद्यमानं वंशानां वेणूणां जातं समूहो यस्मिन् तं पर्वतं गिरिमित्यप्रकृतार्थः।।

---

1. M. Gr.1 स्वपति

**नारदः** :- भवतैव तदुपन्यस्तं यदा वेदनीयमस्माभिः। सखे ! पश्य—

**पटलं क्षणेन तमसां पलायते**
**भजते विकासमपि मानसाम्बुजम्।**
**अतुलं प्रहर्षमकलङ्किताशयो**
**न बिभर्ति को नु सति मित्रदर्शने।। २६।।**

**पर्वतः** :- (सप्रश्रयम्) कुतस्तत्र भवन्तः ?

**नारदः** :- सखे ! शम्बरभुजगुप्ताद्दक्षवन्तनगरात्।

**पर्वतः** :- कस्य चोदनया शम्बरनगरमपि चरणसरोजपरागैः परिशोधितम् ?

**नारदः** :- भगवतः पुरुहूतस्य।

**पर्वतः** :- कस्य हेतोः ?

**नारदः** :- प्रद्युम्नस्य यौवनप्रादुर्भावमावेद्य मायावतीमुद्बोधयितुम्।

**पर्वतः** :- भगवन् ! प्रद्युम्नवृत्तान्तमेनमनुक्रमादवगन्तुमधिगतकुतूहलमास्माकीनं मानसम्।

**नारदः** :- सखे ! सावधानेन मनसा श्रोतव्यम्।

**सुभ्रूभिरिज्यमाने (७) सुरतकीडामहाव्रते होता।**
**इह कश्चिदिष्टसोमो[1] जयति वसन्तप्रियः प्रसवधर्मा।। २७।।**

**पर्वतः** :- स खलु विश्रुतस्सन्तन्यमानमहर्षितपोव्रतविघातपातकबद्धकङ्कणः कुसुम-कार्मुकः। ततः।। २।।

---

**७. सुरतक्रीडैव** महाव्रतं तत्र मन्मथ एव होता होमकर्ता स च इष्टः देवतोद्देशेनाग्नौ क्षिप्तः सोमः लता रसः येन। इष्टः सुहृत् - सोमः - चन्द्रो यस्येति च। वसन्तः वसन्तकालः प्रियः यागार्हत्वादिच्छाविषयो यस्य। वसन्तः - वसन्तर्तुः। प्रियः मित्रं यस्येति च। प्रकृष्टस्सवः - यागः - धर्मः श्रेयस्साधनं यस्य। प्रसवः पुष्पं धर्मः धनुर्यस्येति चार्थः। उभयत्र धर्मादनिच् केवलादिति समासान्तानिच्प्रत्ययेनान्तं रूपम्।।

---

1. M. Gr.1 इष्टसामे

**नारदः** :- तेन किल भगवतः त्रिपुरान्तकस्य तपःप्रत्यूहमावहता तदीयतृतीयलोचनज्वलने शलभभूयमन्वभूयत।।

**पर्वतः** :- हन्त ! निष्करुणमन्तःकरणमुमारमणस्य।

**नारदः** :- सखे! किमुच्यते।

**तृणीकृतवियद्धुनीमदजटाच्छटापाटलः**
**शरीकृतहरीरुषा विरचयन्निरासं पुराम्।**
**विलोचनबिलोज्ज्वलज्ज्वलनहोष्यमाणाखिल-**
**स्सहेत स कथं हरश्शरसमर्पकन्दर्पकम्।। २८।।**

**पर्वतः** :- अस्य खलु विरहिजननिदाघस्मरघस्मरनयनधनञ्जयस्य मृत्युञ्जयस्य चारित्रमाकर्ण्य सञ्जातविस्मयमस्मन्मनः।।

**नारदः** :- स्थाने भवतो विस्मयः।।

**फाले यस्य स्फुरति तिलकः प्रज्वलत्पावकात्मा**
**कण्ठोद्देशे कटुविषमयी भाति कस्तूरिका च।**
**अङ्गे भूषाविषधरपटल्यम्मयी मूर्ध्नि माला**
**तस्मिन् भस्मीकृतमनसिजे विस्मयः कस्य न स्यात्।। २९।।**

**पर्वतः** :- कथं तर्हि कदम्बवनवासिनीपारवश्यमेतस्य कामजितः।।

**नारदः** :- (प्रहस्य)[1]

**अप्रतिहतसङ्कल्पानाम् अनु-**
**पाधिककेवललीलायत्तप्रवृत्तीनाम्।**
**महतामेतादृशां सकलपर्यनुयोग-**
**वर्तनीमतिवर्तमानो जागर्ति महिमा।। ३०।।**

तदस्य तपस्विनां प्रथमस्यापि तत्तादृशं प्रियापारवश्यमुपपद्यते।

**अर्थो हि स्यादात्मनो धर्मपत्नीत्याम्नायार्थं दर्शयल्लीलयैव[2]।**
**चन्द्रापीडः पञ्चबाणस्य जेताऽप्यद्रेः पुत्रीमर्धगात्रीकरोति।। ३१।।**

1. M. Gr.1 विहस्य 2. T. Gr.1 दर्शयन् लीलयैव

**पर्वतः** :- एवमेवैतत्। अलमन्येन प्रतिपित्सितं वस्तु प्रस्तूयताम्।

**नारदः** :- **अतिप्रतिघजृम्भणप्रतिनवाज्ययोगोज्ज्व-**
**ल्ललाटतटलोचनस्फुटकृपीटयोनावहो!।**
**हरेण मदनात्मके हविषि निर्विशंकं हुते**
**भिया जगदशेषमप्यथ बभूव धूमायितम्।। ३२।।**

**पर्वतः** :- शृण्वतोऽपि मम धूमायते हृदयम्।। ततः।। २।।

**नारदः** :- **दग्धे योगानलैश्शम्भोर्विदग्धे प्राणनायके।**
**वियोगानलसन्तप्ता तपस्तेपे रतिस्सती।। ३३।।**

**पर्वतः** :- ततः।। २।।

**नारदः** :- **ततःप्रसन्नस्तपसा गिरीशो दयालुरूचे दयितां स्मरस्य।**
**अह्नाय जन्मान्तरमाश्रितेन प्रियेण योगं पुनरेष्यसीति।। ३४।।**

**पर्वतः** :- हन्त ! रतेरत्यन्तकौशलम्। यतः —

इयमतिरोष[1]कषायितवृषाङ्कहृदयह्रदप्रसादनकर्मणि कतकत्तामुपगता।। ततः।। २।।

**नारदः** :- अथ किं नाम कुलमार्यपुत्रो भूषयिष्यति ? कथं च मया प्रापणीयस्तावान् काल इति पृष्टवतीं रतिमवददेवं महादेवः।।

**जाताद्भूभारहृत्त्यै जगति यदुपतिच्छद्मना पद्मनाभा-**
**द्रुक्मिण्यां वल्लभस्ते भुवि किल भविता शम्बरं सम्प्रहर्तुम्।**
**बाल त्वेतज्जिघांसोरसुरपरिबृथात् पातुमेनं स्थिता तद्-**
**गेहे मायावतीति प्रभजतु भवती पाकशालाधिकृत्त्वम्।। ३५।।** इति।

अथ कथमत्यक्तपातिव्रत्यया मया मायाविनश्शम्बरस्यावसथे वस्तव्यमिति भूयः पृष्टवत्त्यै रत्त्यै मायाविद्याभूयसीरुपदिदेश भूतेशः। सा च भूयांसि मायाकौशलानि सम्यगधिगम्य मायावतीति संज्ञावती रतिश्शम्बरगृहमेव प्राविक्षत्।

---

1. My. Tel. Print. इयमतनुरेष

**पर्वतः** :- अत्यद्भुतमबलानामपि पातिव्रत्यनिबन्धनमात्यन्तिकं वैयात्यम्। ततः।। २।।

**नारदः** :- अथ तु सा मायाप्रभावेन—

**जम्बीरप्रतिबिम्बमेदुरकुचं गम्भीरनाभीबिलं**
**मर्यादाव्यतिलङ्घिलोचनमसत्पर्यायमध्यं वपुः।**
**(८) सौवं रूपमिवापरं सुललितं निर्माय दुर्मायम-**
**प्यस्तोकस्मरविभ्रमैररमयन्मायावती शम्बरम्।। ३६।।**

तस्यां तत्रैव सूदाधिपत्यमाश्रित्य स्थितायाम्—

**मान्यं मुकुन्दगृहिणीमकरध्वजांशं**
**लोकोत्तरं सुतमसूयत रुक्मिणी सा।**

**पर्वतः** :- (स्वगतम्।) फलितमिव मायावतीमनोरथानोकहेन।

**नारदः** :-
**प्रद्युम्नमेनमहरद्भवनादरिष्टात्।**
**षष्ठे दिने सपदि शम्बरदानवेन्द्रः।। ३७।।**

**पर्वतः** :- शान्तं पापम्।। २।। प्रतिहतममङ्गळम्।। २।। कुसुमायुधादेव स्वस्य वध इति कुतश्चिन्निश्चिकाय किं शम्बरः ?

**नारदः** :- अथ किम्।

**पर्वतः** :- अथ कीदृशीं दशामापन्नः प्रद्युम्नः।

**नारदः** :- **दृप्यद्यादसे[1] हन्त! यादवशिशुस्तेनार्णवे पातित-**
**स्तत्रत्येन तु जन्तुना कबळितः केनापि मीनात्मना।**
**जीर्णो नास्यपि चण्डचण्डदहनैश्श्रीकृष्णतेजोबलात्**
**पृथ्वीभुग्भिरमार्गगामिभिरिव ब्रह्मस्वमास्वादितम्।। ३८।।**

८. **सौवमिति।** स्वस्येदमित्यर्थे तिस्येदमित्यणि द्वारादीनां चेत्यनेनैजागमः। स्वकीयमित्यर्थः।।

1. M. Gr.1 दृप्यद्यादसि

**पर्वतः** :- (सचमत्कारम्।) नूनं स्वकेतनोऽयमिति दयमानेन मीनेन स्वजठरे निक्षिप्य रक्षितः प्रद्युम्नः।। ततः।। २।।

**नारदः** :- अथ कदाचिदपरैश्शफरैस्साकमधिगर्भमर्भकं बिभ्रदपि मीनो धीवरैरानायेन विगृहीतः।। दैत्यराजगृहमुपहारतया तदानीं मुदाऽऽनीतश्च।

**पर्वतः** :- अहो! पुनरपि घट्टकुट्यां प्रभातम्।। ततः।। २।।

**नारदः** :- ततश्च सूदाधिपत्यं कुर्वत्या मायावत्यास्सन्निधिं नीत्वा सूदैः पाकाय विदळितानां मीनानां कस्यचिज्जठरादवततार कुमारः[1] कोऽपि सकलजनहृदयपश्यतो हरो[2] वेणुगर्भादिव मुक्तामणिः।।

अथ कोऽयम् ? कुतो वा शफरजठरमनुप्रविष्ट ? इति चिन्तावत्यां मायावत्यामहमेव[3] सहस्राक्षनिदेशात्तत्सविधमुपसृत्य तत्क्षणादित्थमुपादिक्षम्[4]।

**प्रद्युम्न एष यदुवंशपतेः कुमारो**
**मारो भवत्प्रियतमो भुवि तन्वि! जातः।**
**गोप्तुं त्वमर्हसि मनस्विनि ! गूढमेनं**
**दैत्यं निहत्य दयितोऽयमुपेष्यति त्वाम्।। ३९।।**

इति मयोपदिष्टा मायावती तदानीमेव तमर्भकमाप्तसखीहस्ते सर्वथा संरक्षणीयोऽयमिति दत्तवती। साऽपि तत्क्षणादेव भृगुमतश्शैलस्य सन्निकर्षे महर्षेर्दर्भकस्याश्रममुपगम्य तस्यैव हस्ते परित्रायस्वैनं मुकुन्दनन्दनं प्रद्युम्नमिति दत्वा गतवती।।

**पर्वतः** :- अहो! मायावत्या लोकोत्तरं कार्यकौशलम्।। ततः।। २।।

**नारदः** :- **दयाळुहृदयो योगी दर्भकोऽपि तमर्भकम्।**
**वर्धयामास कृष्णेन स्पर्धमानं वपुश्श्रिया।। ४०।।**

---

1. M. Gr.1 कूमारः
2. M. Gr.1 पश्यतो हरः
3. M. Gr.1 चिन्तावतामहमेव
4. M. Gr.1 तत् क्षणादित्थमुदीक्षम्

**पर्वतः** :- न केवलं वपुश्श्रियैव[1] प्रद्युम्नः पित्रा सह स्पर्धते। किं तु व्यधिकरणाभ्यां जन्मवृद्धिभ्यामपि।। ततः।। २।।

**नारदः** :- अनन्तरमस्मादेव महर्षेरधिगतधनुर्वेदसारमवाप्तयौवनसौरभमरविन्दनयननन्दन-माकर्ण्य पुरन्दरेण शम्बरवधाकांक्षिणा सन्नियुक्तः पुनरपि शम्बरपुरमासाद्य प्रद्युम्नं प्रोद्भिन्न-यौवन[2]मभिधाय मायावतीमित्थमहमाज्ञापयम्।

**मायाभिरतिसन्धाय मदान्धं शम्बरासुरम्।**
**(९) तटोद्देशे भृगुमतस्सरसर्वार्थदं सरः।। ४१।।**

इति मद्वचनं शिरसि दधती मायावती सह सखीभ्यां निर्गत्य भृगुमदचलोपकण्ठमण्डनायमानं मञ्जुदुञ्जीवनाभिधानं सरस्स्वयमसेवत।।

प्रद्युम्नोऽपि तस्यैव शिखरिणस्तटवनसौभाग्यावलोकनविलासाय विदूषकसहायः प्रस्थित इति तदाश्रमादागतैस्तदुभयसमागमहर्षिभिर्महर्षिभिरभिहितम्। कीदृगितःपरं दैवसङ्कल्प[3] इति न विद्मः।

एतादृशमुदन्तं पुरन्दराय सानन्दमावेदयितुमनेन पथा तावदमरावतीं प्रति प्रस्थितोऽस्मि।

**पर्वतः** :- अखिलमपि करबदरतामानीतमत्र भवद्भिः।

**नारदः** :- अलं विलम्बेन सत्वरममरावतीमेव साधयाव इति निष्क्रान्तौ।।

**।। शुद्धविष्कम्भः।।**

---

९. **तटोद्देशे भृगुमतस्सरसर्वार्थदं सरः।** अत्र सरः कर्मसरेति गच्छेत्यर्थकं क्रियावाचकम्।। उपरितनग्रन्थस्य टीकाच्छाया च तत्तत्पुटाधोभागे प्रदर्शिता।।

---

1. My. Tel. Print. वपुश्श्रियेन
2. M. Gr.1 प्रद्युम्नं मप्रार्थितं यौवनं
3. M. Gr.1 देवसङ्कल्प

*(ततः प्रविशति वनसौभाग्यावलोकनकुतूहली प्रद्युम्नो विदूषकश्च।।)*

**विदूषकः** **:-** (अङ्गुळ्या निर्दिश्य) वअंस! इदो सहआररुक्खम्मि पेक्खसु तुमं विलोअण कल्लाणम्।।

पद्यम् - **मलअणिल-अवादप्पंदणंदोळिदग्ग[1]-**
**प्पवणविडवडोलारोह कीलाकुलाणम्।**
**परहुदमिहुणाणं पोप्फपीढे[2] णिविट्ठा**
**महुअर[3] विलआओ मंगळाइं पढंदि।। ४२।।**

तम्हा तक्केमि तुम्ह सरीरं जोव्वणं विअ अमुं वणं पडिवण्णो[4] सुरहि समओत्ति।।

*(वयस्य! इतस्सहकारवृक्षे पश्य त्वं विलोचनकल्याणम्।।*

***मलयनिलयवातस्पन्दनान्दोळिताग्र-***
***प्रवणविटपडोळारोहक्रीडाकुलानाम्।***
***परभृतमिथुनानां पुष्पपीठे निविष्टा***
***मधुकरवनिता[5] मंगळानि पठन्ति।। ४३।।***

*तस्मात्तर्कयामि तव शरीरं यौवनमिव अदोवनं[6] प्रतिपन्नस्सुरभिसमय – इति।।)*

**प्रद्युम्नः** **:-** अवितथमेवैतत् सखे! पश्य—

पद्यम् - **श्रमं हारं हारं सुरतविहितं पाण्ड्यसुदृशां**
**शनैर्घ्रायं घ्रायं सपरिमळचोळीकचभरान्।**
**प्रियैर्योजं योजं परिकुपितकर्णाटतरुणी**
**रसौ मन्दं मन्दं मलयमरुदास्कन्दति वनम्।। ४३।।**

(पुनर्निरूप्य) सखे! सहकारवृक्षं दक्षिणेन चक्षुरुपक्षिप्यताम्।

1. M. Gr.1 दोलिअंगं
2. M. Gr.1 पुंफपीठे
3. M. Gr.1 महुथर
4. M. Gr.1 **अमुं वणं पडिवण्णो** इति स्थाने **विअ पडिवंणो** इति अस्ति।
5. T. Gr.1 मधुकवनिता
6. M. Gr.1 अमुं वनं

पद्यम् - **अशोकाख्याः कष्टं वियुतयुवतीनां वपुरसृग्**
**झरीपानाच्छोणाः कुसुमशरबाणा ध्रुवममी।**
**तथा नो चेत्तासां तनुरतिकृशा स्यात्कथमुषः**
**परिम्लायत्तारा परिबृढकलापाण्डिमपदम्।। ४४।।**

(विमृश्य) तथापि किमन्यैर्वन्यैरनोकहैः। धन्यता खल्वशोकस्यैव यत एष यौवनमदस्पृशां हरिणदृशां चरणताडनसुखमनुभवति।।

**विदूषकः** :- असोओ विअ एसोवि जणो माणुसेसु धण्णो एव्व।
*(अशोक इवैषोऽपि जनो मानुषेषु धन्य एव।)*

**प्रद्युम्नः** :- तव कुतस्तादृशी धन्यता।।

**विदूषकः** :- तं किं ण जाणासि काहेचि संपुण्णाहारालाहकुविदा बम्हणीमज्झम्मि चलणताडणं काही।। *(तत्किं न जानासि कदाचित् सम्पूर्णाहारालाभकुपिता ब्राह्मणीमयि! चरणताडनमकरोत्।)*

**प्रद्युम्नः** :- (सहासमन्यतो गत्वा, परितोऽवलोक्य सचमत्कारम्— )

पद्यम् **(१०) छन्नास्सम्प्रति शाखिनस्समुदयद्रागैरमीपल्लवै-**
**र्मद्यन्ते मधुपाङ्घ्रिभिस्सुमनसो मान्यास्सतां मौलिभिः।**
**सन्तन्वन्ति भयं च पञ्चमरवाः प्रौढद्विजार्हागम-**
**श्रेयो हृद्यवनाभिवृद्धिसमये किं किं न सम्भाव्यते।। ४५।।**

---

**१०.** शाखिनो = वृक्षाः। समुदयन् रागोऽरुणिमा एषां तैः। पल्लवैः = किसलयैः, छन्ना = आच्छादिताः निबिडा इति यावत्। अन्यत्र शाखिनो = वेदाध्यायिनः। आविर्भूतरजोगुणैर्विटैः छन्नाः = तिरोहिताः, अभिभूता इति यावत्। सतां = सज्जनानां, मौळिभिः = शिरोभिः, मान्या = लालनीयाः, सुमनसः = पुष्पाणि विद्वांसश्च। मधुपाः = भ्रमराः मद्यपायिनश्च। पञ्चमरवाः = कोकिलालापाः चण्डालध्वनयश्च। प्रौढानां = द्विजानां पक्षिणाम् अर्हा = वासयोग्या, ये अगमा वृक्षास्तेषां श्रेयसा = वृद्ध्या हृद्यं यद्वनं तस्याभिवृद्धिसमये।

प्रौढानां द्विजार्हाणां = ब्राह्मणश्रेष्ठानामागमेन जातं यच्छ्रेयः = सुकृतं तद्धरन्तीति तद्धृतः = तन्नाशका ये यवनास्तेषामभिवृद्धिकाल इति चार्थः।।

किञ्च **(११) विजृम्भमाणां विटपाळिमेव समाश्रयन्ते सकला द्विजेन्द्राः।**
**तथोचितं विप्रवरा वळीनां विमानरूपः कलिकालयोगः।। ४६।।**

**विदूषकः** :- (उदग्रीवमवलोक्य)[1] वअंस इदो तुज्झ होज्जा दिठ्ठी।

पद्यम्- **भमंत गअदंत णिक्कसणभिण्ण धादुच्छडा**
**रएहि दुउणीकदारुण रुईहि मच्छा इदो।**
**दुमाण पडि दीसदे सुकिसलेहि सेलो इमो**
**णवुग्गदर इप्पहारुण तडोव्व पुव्वाअलो।। ४७।।**

ता एद्ध पविसिअ सेलतड सोहग्गं पेख्खामो।

*(वयस्य! इतस्तव भवतु दृष्टिः।*

***भ्रमद्गजदन्तनिष्कषणभिन्नधातुच्छटा***
***रजोभिर्द्विगुणीकृतारुणरुचिभिराच्छादितः।***
***द्रुमाणां प्रति दृश्यते सुकिसलयैश्शैलोऽयं***
***नवोद्गत-रविप्रभाऽरुणतट इव पूर्वाचलः।। ४७।।***

*तस्मादत्र प्रविश्य शैलतटसौभाग्यं पश्यावः।)*

**प्रद्युम्नः** :- तथा भवतु। ***(।। इत्युभौ शैलतटमधिरोहतः।।)***

**प्रद्युम्नः** :- अये! भयेनावसन्नानपि बाधन्ते मलिनाः।। तथा ह्यत्र—

पद्यम् - **गहनगुहाविहारिहरिगर्जनजर्जरित-**
**स्तिमितशयानकायमपि सिन्धुरबृन्दमिदम्।**
**क्षणमळयो विलम्ब्य पृथुलोपलसंशयतः**
**पुनरभितः पतन्ति मदगन्धगळद्विशयाः।। ४८।।**

---

**११.** विटानां = षिद्गानां, पाळिः = पङ्क्तिः, विटपानां = शाखानामाळिश्च। सकलाः = कलाविशिष्टाः समग्राश्च। द्विजेन्द्रा = ब्राह्मणश्रेष्ठाः पक्षिश्रेष्ठाश्च। विप्रेषु = ब्राह्मणेषु, वराः = श्रेष्ठाः। विषु = पक्षिषु, प्रवराः = श्रेष्ठाश्च।। तदावळीनां कलियुगसम्बन्धः विगते मानरूपे यस्मिन् स तादृशः। कलिकानां = कुट्मलानाम् आलय = आवासः अगः = वृक्षः पक्षिश्रेष्ठा वळीनां विमानरूपः = व्योमयानस्वरूपः। इति चार्थः।

---

1. My. Tel. Print. (रुद्रीसमवलोक्य)

**विदूषकः** :- ओसर वेइणो खुइमिणो महुअरा। जंदाणिं णिच्चलदाए कण्णाणिलेहिं ण पल्लट्टेंति हत्थिणो।। *(अवसरवेदिनः खल्वमी मधुकराः। यदिदानीं निश्चलतया कर्णानिलैर्न पर्यस्तयन्ति **(१२)** हस्तिनः।)*

**प्रद्युम्नः** :- एवमेवैतत्।।

**विदूषकः** :- **का णाम इमा ओसिर णिबद्धसिहावलपिंछा।**
**ओ कालपरिणद जंबूफलसवण्ण सरीराओ पआओ।। ४९।।**
***(का नामेमाश्शिरो[1] निबद्धशिखावळपिञ्छाः।***
***कालपरिणतजम्बूफलसवर्णशरीराः प्रजाः।। ४९।।)***

**प्रद्युम्नः** :- (सस्मितमवलोक्य) अमी किल किरातकुमारकाः। पश्यतु भवानत्र (परस्परोद्वेगसम्भ्रमम्)

पद्यम् - **आरात्पन्नगमौळिरत्नपटलीष्वङ्गारशङ्कावशात्**
**प्राप्ताभिल्लकुमारकास्सरभसम्पाटीरमूलान्तिकम्।**
**दृष्ट्वा कुण्डलिनो यथागतममी त्रासाकुला यान्त्यहो**
**तन्मूर्धोपनिबद्धबर्हचकिता धावन्ति तेऽप्यन्यतः।। ५०।।**

(इति कतिचित्पदानि गच्छन्नन्यतो दृष्टिमाधाय) अये! निरीक्ष्यतामितो निर्झरपातचमत्कारः।

पद्यम् **(१३)** **रक्तपल्लववृतां मधुपार्हां, पुष्पिणीं तटवनीं परिरभ्य।**
**निर्झरास्तदनु सानुशयत्वात्, किं भृगोः पतनमारचयन्ति ?।। ५१।।**

---

**१२.** अत्र पर्यस्तान् कुर्वन्तीत्यर्थे पर्यस्तशब्दात् तत्करोतीति णिचिर्यस्सौकुमार्यपर्यन्तपर्यस्तपर्याणे इतिर्यशब्दस्य लादेशे, द्वित्वे, पर्यस्ते **टश्चेति स्त**- इत्यस्य टादेशे द्वित्वे, **णिङदे दा वावे** इति णिच एत्वे पल्लट्टेंतीति रूपम्। यद्वा **विरेचे रोल्लुडोल्लुट्टुपल्हत्था** इति धात्वादेशे प्रकरणस्थसूत्रेण णिजन्तस्य विरेचयतेः पल्हत्थादेशे पल्हत्थन्तीति रूपम् - विरेचयन्तीत्यर्थः। विरेचनं = निष्कासनम्।

**१३.** अनुरक्तविटवृतां = मद्यपायियोग्यां, पुष्पिणीं = रजस्वलामिति चार्थः। नीचेषु = निम्नेषु, उपसर्पणं = प्रसरणम्। नीचानां = निकृष्टानाम्, उपसर्पणम् = अनुसरणम्। शिखावान् = अग्निर्ब्राह्मणश्च। पङ्कः = कर्दमः पापञ्च।

---

1. T. Gr.1 का नामेमा शिरो

वस्तुतो नीचोपसर्पणैकतत्पराणां शिखावद्विरोधमाचरतां पङ्कोन्मेषपोषकाणां जडाना-मेतेषामुचितमेव किल भृगुपतनम्।। (इति अन्यतो निर्दिश्य सानुरागम्।)

पद्यम् - **इह विहरति पश्य प्राश्यघासं विलासा-**
**च्चलितनिजविषाणत्यक्तकण्डूविषादाम्।**
**अतिचिरमुपजिघ्रन्नादरात् प्राणकान्तां**
**दिशि दिशि कृतलीलादृक्तरङ्गः कुरङ्गः।। ५२।।**

**विदूषकः** :- वअंस ! विउल सेलसाणुपडिब्भमणेण पडीसंतो विअ लक्खीअदि भवम्। *(वयस्य !*[1] *विपुलशैलसानुपरिभ्रमणेन परिश्रान्त इव लक्ष्यते भवान्।)*

**प्रद्युम्नः** :- सखे! साधु दृष्टं भवता, तदद्योपदर्शय श्रमशमनक्षममुद्यानं क्षणं विश्रमितुम्।

**विदूषकः** :- (अङ्गुळ्या निर्दिश्य) इदो अदूरे एव्व रमणिज्जं उज्जाणम् विज्जाहर विहारजोग्गं दीसदि। तं पविसिअ समसमणं कुणसु तुमम्। (इत्युभौ तत्सविधमुपसरतः।)

*(इतोऽदूर एव रमणीयमुद्यानं विद्याधरविहारयोग्यं दृश्यते। तत्प्रविश्य श्रमशमनं कुरु त्वम्।)*

**प्रद्युम्नः** :- (पुरो निर्वर्ण्य ) इह हि—

**(१४) घनविटपीतास्वधरा बालारामास्तु पृथुलकुचताळाः।**
**सुखमणितारावरणाः सुतरामळकोज्ज्वला विराजन्ते।। ५३।।**

(इति पुरतो गच्छन्नुद्यानमुद्वीक्ष्य सश्लाघम्।)

---

**१४.** घनैः = सान्द्रैः, विटपिभिः = वृक्षैः, इतास्वधरा भूमिर्येषां ते। पृथूनि लकुचानि = लिकुचफलानि ताळफलानि च येषु ते। सुष्ठु खमणेः = सूर्यस्य, ताराणां = नक्षत्राणां चावरणा = आच्छदकाः। सुतरैः = आरोहणार्हैः, आमलकैः = वृक्षविशेषैः, उज्ज्वलाः = प्रकाशमानाः, बाला = नूतना, आरामाः = निष्कुटाः।

अन्यत्र घनम् = सान्द्रं, विटैः पीतः सुष्ठु अधरो यासां ताः। पृथुलाः = स्थूलाः, ताळफलसदृशाः कुचाः = स्तना यासां ताः। सुखेन जातः मणितारवः रतिकूजितं येषु तादृशा, रणाः = सुरतसम्भेगा यासां ताः बालाः = रामाः स्त्रिय इत्यर्थः।

---

1. T. Gr.1 **वयस्य !** इति नास्ति।

इदं हि हृद्यानवद्यमुद्यानं विद्याधराणां विहारयोग्यमेव।। तथा हि—

पद्यम् - **नन्दच्चन्दनशैलकन्दरमरुत्सन्दोहमन्दोहमन्दोच्चलन्**
**माकन्दप्रसरन्मरन्दनिवहैरेतन्नदीमातृकम्।**
**इन्धे गन्धफली परीमळझरी दूरीकृताऽध्वश्रमं**
**क्रीडोद्यानमुदारकोकिलरमण्यालापलीलास्पदम्।। ५४।।**

(इति विदूषकोपदिश्यमानसरणिरुद्यानं प्रविश्य)

सखे! दक्षिणसमीरणानीयमानविविधकुसुमपरिमळे बालरसालमूले मुहूर्तमुपविश्य साधयाव (इत्युभौ तत्रोपविशतः।)।

**प्रद्युम्नः** :- (दूरतो दृष्टिं प्रसार्य सशिरः कम्पम्।) हन्त! विद्याधरयूनां वेलातिलङ्घिनी विलासिनी सौकुमार्यरसिकता। यतः —

पद्यम् - **कान्तां कुचद्वितयनिर्दयमर्दनेन**
**क्लान्तां च गाढपरिरम्भणसम्भ्रमेण।**
**विद्याधरः परिगतोत्पुलकां विलोक्य**
**चेलान्तमन्दपवनैर्नुदति श्रमाम्भः।। ५५।।**

अन्यतश्च- **निश्शङ्कमङ्कमधिरोप्यनितम्बगुर्वी**
**नीवीविकर्षभयसम्भ्रमचञ्चलाक्षीम्।**
**सीत्कृत्य दीर्घमिह शीधुमयं सुखेन**
**बिम्बाधरं चिरमसौ पिबति प्रियायाः।। ५६।।**

**विदूषकः** :- ता एद्ध तुहवि काएवि कल्लाणीए कढिणत्थणीए होदव्वम्।

*(तस्मादत्र तवापि कयापि कल्याण्या कठिनस्तन्या भवितव्यम्।)*

**प्रद्युम्नः** :- (सस्मितं सादरलज्जं च) अनेन ते वचनेन शर्वर्यामुपजातं स्वप्नदर्शनमहं सहर्षमस्मार्षम्।

**विदूषकः** :- केरिसं सिविणअ दंसणं कहेहि।। २।। *(कीदृशं स्वप्नदर्शनं कथय कथय।)*

**प्रद्युम्नः** :- शृणु सखे! स्वप्नदर्शनप्रकारम्—

पद्यम्- **घनजघनतटाञ्चञ्चारुकल्याणदामा**
**भयचपलकुरङ्गीलोचना कोमलाङ्गी।**
**अचरमरसवापी काऽपि तापिञ्छपुञ्ज-**
**प्रणयि चिकुरभारा प्रादुरासीत्पुरो मे।। ५७।।**

**विदूषकः** :- वअंस ताए सुन्दरीए लाअण्णं ण वित्थरेण वण्णिदव्वम्।।
जंभणंतस्स ते पुलअंकुरा एव्वसे अइसअं सअं विआकुणंति।। तदो।। २।।

*(वयस्य! तस्यास्सुन्दर्या लावण्यं विस्तरेण न वर्णितव्यम्। यद्भणतस्ते पुलकाङ्कुरा एवास्या अतिशयं स्वयं व्याकुर्वन्ति। ततः।। २।।)*

**प्रद्युम्नः** :- अनन्तरन्तु—

पद्यम् - **आनन्दौघं सान्द्रमक्ष्णोर्दुहाना**
**शृङ्गारस्य श्रेयसी देवता सा।**
**मन्दं मन्दं मानिनी मामकीनं**
**मञ्चस्थानं मानसं चाधिरूढा।। ५८।।**

**विदूषकः** :- वअंस णंएत्ताहे तुह एदारिस विण्णाणे अहं बहस्फदी।। तदो।। २।।
*(वयस्य! नन्विदानीं तवैतादृशविज्ञाने अहं बृहस्पतिः। ततः।। २।।)*

**प्रद्युम्नः** :- ततः तापसवृद्धरचितनारायणनामकीर्तनद्विगुणीक्रियमाण-माणवकमुखोद्गत-स्वाध्यायघोषैः प्रत्युषसि प्रबुद्धोऽभूवम्।

**विदूषकः** :- वअंस अच्चत्थसुहोदक्कं एअं सिविणअ दंसणम्। ता तुह तुण्णं एव्व तारिस तामरसलोअणा संगमसोक्खं सिज्झिज्ज। *(वयस्यात्यर्थशुभोदर्कमेतत्स्वप्नदर्शनम्। तस्मात् तव तूर्णमेतादृशतामरसलोचनासङ्गमसौख्यं सिद्ध्यति।)*

**प्रद्युम्नः** :- (सोपहासम्) आस्तां नाम स्वप्नदर्शनमाशिषमेव तव महाब्राह्मणस्य फलाविनाभूतं श्रद्दधामि।

**विदूषकः** :- को एद्ध संदेहो - (इति ऊर्ध्वमवलोक्य)।। हंत! मझ्झ जढलमझ्झम्मि अणलो विअ मत्तंडो मज्झे गअणं पज्ज्वलदि। *(कोऽत्र सन्देहः ? हन्त! मम जठरमध्ये अनल इव मार्तण्डो मध्ये गगनं प्रज्वलति।।)*

**प्रद्युम्नः** :- (निपुणं निरूप्य) वयस्य एवमेवैतत्।। तथा हि—

पद्यम् - **नवदवनिष्ठुरद्युमणिघृष्टिवितप्तवनी-**
**महिषमहाविषाणपरिभग्नसरस्तरळे।**
**नळिनवने निवस्तुमळिनांकुलमप्रभवन्**
**मुखरितदिङ्मुखं व्रजति पुष्पनगाभिमुखम्।। ५९।।**

अपि च सखे! पश्यैतत्—

**परुषतपनद्योताश्लेषोन्मिषद्घृणिमद्दृष-**
**ज्ज्वलनचकितो भल्लूकोऽयं प्रविश्य लतागृहम्।**
**रटति कठिनं श्रुत्वा तद्रन्ध्रनिर्गतगूढपान्**
**मकुटमणिषु ज्वालामोहात्ततोऽपि पलायते।। ६०।।**

किं च— **वातानां बहुळोर्मिवर्धनकृतां ध्वंसादलोले जले**
**सम्प्राप्ता जलजातपत्रशिशिरच्छायाच्छटामच्युतिम्।**
**तापं लोपममी नयन्ति विहगास्तत्सन्निधौ भ्राम्यतां**
**भृङ्गाणां निचयात् प्रियाभिरधुनाऽभीताभिरालिङ्गिताः।। ६१।।**

तदुपसरावस्तापापनोदाय **मज्जदुज्जीवनाभिधानं** सरोवरम्।

**विदूषकः** :- तह होदु। *(तथा भवतु।)* (इति सहोत्थायानुसरति।)

**प्रद्युम्नः** :- (परिक्रम्य पुरोवलोक्य) सखे! पश्य सरोवरस्यास्य सर्वोत्तरं रामणीयकम्।

पद्यम्- **नवोद्गच्छत्कच्छस्फुटविटपिगुच्छस्रुतमधु-**
**द्विरुक्तस्वादुत्वस्फुरणविमलस्वच्छसलिलम्।**
**गभीरं नाळीकस्थिरपरिमळश्रीसुरभिळं**
**पुनीते मे दृष्टिं श्रममपि धुनीते सर इदम्।। ६२।।**

अपि चात्र— **मूले मूले स्फुरति पयसां दीर्घनाळप्ररोहो**
**नाळे नाळे नवसुरभिता सम्पदां सद्मपद्मम्।**
**पद्मे पद्मे भ्रमति परितश्शीधुपानाय भृङ्गो**
**भृङ्गे भृङ्गे श्रवणमधुरा भाति सङ्गीतभङ्गी।। ६३।।**

**विदूषकः :- (१५)** एव्वं णेदं। *(एवमेतत्।)* (निपुणं विभाव्य—)

पद्यम् - **चारुगुणाकलिदेहिं विविहेहिमलंकदो पसूणेहिम्।**
**एसो सरो विजअदे मणोहरो सोरुहाणुसरणेण।। ६४।।**

***(चारुगुणकलितैर्विविधैरलंकृतं प्रसूनैः।***
***एतत्सरो विजयति मनोहरं सौरभानुसरणेन।। ६४।।)***

**प्रद्युम्नः** :- सखे! सद्यस्तनश्लेषनिपुणोऽसि।

**विदूषकः** :- **(१६)** (संस्कृतमाश्रित्य) त्वं तु सद्यस्तनाश्लेषनिपुणः।।

**प्रद्युम्नः** :- (सान्तर्हासं श्रवणमभिनीय)

पद्यम् - **कमलविशिखदेवसिद्धिमन्त्रः,**
**कमपि रसं किल कर्णयोर्दुहानः।**
**कबळयति हृदा सहैव कोऽयं,**
**कलवलयध्वनिरध्वनि क्लमं न :।। ६५।।**

**विदूषकः** :- ता वअंस एद्ध मज्जणकम्मं कदुअ चिहुरसोसणं कुणमाणीहिं विलासिणीहिं होदव्वम्।। *(तद्वयस्यात्र मज्जनकर्म कृत्वा चिकुरशोषणं कुर्वतीभिर्वीलासिनीभिर्भवितव्यम्।)*

---

**१५.** अत्र अन्त्यादिदेति मो णः इति णकारागमः।

१६. **सर्वेषां कारणवशात्कार्यो भाषाव्यतिक्रमः।**
**माहात्म्यस्य परिभ्रंशं मदस्यातिशयं तथा।।**
**प्रच्छादनं च विभ्रान्तिं यथा लिखितवाचनम्।**
**कदाचिदनुवादं च कारणानि प्रचक्षते।।** इति वचनात् प्रकृते मदातिशयात् संस्कृताश्रयणम्।

*एवमेतत्। ()*



***(।। नेपथ्ये।।)***

पद्यम् - **मज्रणं कदुअ मङ्गळोइदं मण्डणं जहतहं मए कदम्।**
**इट्ठदेवचलणञ्चणस्स मे संपदं कुणह सूणसंचअम्।। ६६।।**

***(मज्रनं कृत्वा मंगळोचितं मण्डनं यथातथं मया कृतम्।***
***इष्टदेवचरणार्चनाय[1] मे साम्प्रतं कुरुत सून सञ्चयम्।। ६६।।)***

**प्रद्युम्नः** :- (सानुरागमाकर्ण्य) सखे! समर्थ एव तव तर्कः।।

**विदूषकः** :- (साङ्गुळिनिर्देशम्) अग्गे पेच्छसु तुमं कंवि अच्छीणं ऊसवम् ।।
*(अग्रे पश्य त्वं कमप्यक्ष्णोरुत्सवम्।।)*

**प्रद्युम्नः** :- (निपुणं निर्वर्ण्य, सोत्कण्ठम्)।।

पद्यम् - **कनकमयलता वा ? कान्तिकल्लोलिनी वा ?**
**रजनिकरकला वा रत्नदीपप्रभा वा।**
**किमचिररुचिवल्ली केयमीदृग्विधश्रीः**
**मदयति हृदयं मे मन्मथस्येव माया।। ६७।।**

किञ्च— **कनकपृथिवीखण्डं (१७) काल्पद्रवांश्च मधुद्रवान्**
**मलयपवनं विद्युत्तेजो मनोजहृदम्बरम्।**
**समुपहरता छन्दो जाड्यं विमुच्य जगत्सृजा**
**जयति विहिता सेयं सायंतनोत्पलल्लोचना।। ६८।।**

अपि च— **कलासान्द्रे[2] चान्द्रे वपुषि रुचिमाचामति मुखं**
**गजोत्तंसे हंसेष्वपि गतिरनास्थां जनयति।**
**रसालम्बे बिम्बे रचयति च वैराग्यमधरो**
**गिरस्साक्षाद्द्राक्षास्वपि मदमुदस्यन्ति सुदृशः।। ६९।।**

---

**१७.** काल्पद्रवान् कल्पद्रुसम्बन्धिनः।

---

1. M.Gr. 1. & My. Tel. print. इष्टदैवचरणार्पनाय 2. M. Gr.1 काले सान्द्रे

**अस्या नेत्ररुचिर्निरस्यतितरामैन्दीवरीं वैखरीं**
**सौन्दर्यं वदनस्य निन्दति परं सन्दोहमिन्दो रुचाम्।**
**कान्तिः कुन्तलसंहतेर्न सहते कादम्बिनीडम्बरं**
**छाया हन्त! तनोर्धुनोति सुतनोश्शम्पा महस्सम्पदम्।। ७०।।**

**विदूषकः** :- महुरमहुर सपरिमळ सुरहिलाए कमलिणीए उवरि भिंगो विअ संपदं अदिट्ठद-रसोट्ठवसंपदा एसे उवरि सम्मं अणुसत्तो तुह मणो।।

*(मधुरमधुरसपरिमळसुरभिळायाः कमलिन्या उपरि भृङ्ग इव साम्प्रतमदृष्टतरसौष्ठव-सम्पदोऽस्या[1] उपरि सम्यगनुषक्तं तव मनः।)*

**प्रद्युम्नः** :- (साङ्गीकारम्) मौञ्जायन साधु मन्त्रयसे।

पद्यम् - **आजिघ्रन् पदपल्लवं मृगदृशो रम्योरुरम्भापथा-**
**दाप्लुत्य प्रसभं स्तनस्तबकमप्यामर्दयन्निर्दयम्।**
**आचुम्बन्नधरोष्ठबिम्बमनघं विन्दन् दृगिन्दीवरं**
**सानन्दं वदनारविन्दमधुनालीढे हृदिन्दिन्दिरः।। ७१।।**

यद्वा—— **संवाह्य प्रथमं प्रवाळमृदुळे साशंकमस्याः पदे भृत्वा**
**हन्त! नितन्बमण्डलभरं स्पृष्ट्वा च मध्यं ततः।**
**आपीनौ परिगृह्य च स्तनघटावामृश्य वक्त्राम्बुजं**
**त्रासाविष्टमृगीदृशो मन इदं दासानुदासायते।। ७२।।**

**विदूषकः** :- जुत्तं एव्व[2] एदम्।। *(युक्तमेवैतत्।)*

**प्रद्युम्नः** :- तदेहि तावदन्तिकवर्ति वेतसलताकुहर[3]तिरोहितात्मानौ विस्रब्धमासां व्यापारमव-धारयाव ——इति। (तथा कुरुतः।)

---

1. M. Gr.1 अदृष्टवसौष्ठवसम्पदोऽस्या
2. M. Gr.1 जुंतं एंव
3. My. Tel. Print. & T. Gr. 1 वेतसतरुकुहर

*(ततः प्रविशति सह सखीभ्यां मायावती।।)*

**मायावती** :- **(१८) मज्ञणं कदुअ** इत्यादि पुनः पठति।। २।।

**विचक्षणा** :- आणिदाइ अरविंद-वउळ-चंपअ-पुण्णाम-मल्लिआ-मंदारप्पमुहाइ पसूणाइ। तुण्णं आराहेहि तुह दइवदं[1] पसूणबाणं मणिसिद लाहत्थम्[2]।।

*(आनीतान्यरविन्द-वकुळ-चम्पक-पुन्नाग-मल्लिका-मन्दारप्रमुखानि प्रसूनानि। तूर्णमाराधय तव दैवतं प्रसूनबाणं मनीषित लाभार्थम्।)*

**मनोरमा :-** इमाइ अ साअल्लेण संचिदाइ[3] दुव्वक्खद तंबोलाइ आइ देवञ्चणजोग्गाइ उव अरणाइ। *(इमानि च साकल्येन सञ्चितानि दूर्वाक्षतताम्बूलादि कानि देवार्चनयोग्यान्युपकरणानि।)*

**विदूषकः** :- (जनान्तिकम्) वअंस! से सुंदरत्तणं विअ चउरत्तणं वि लोउत्तरं। जं तुम्ह रूवसरिसं णिम्माणदि वम्महविग्गहं[4] अहिणवेण हलिद्दाचोण्णपेंडेण एव्व।।

*(वयस्यास्यास्सौन्दर्यमिव चतुरत्वमपि लोकोत्तरम्। यत्तव रूपसदृशं निर्माति मन्मथविग्रहमभिनवेन हरिद्राचूर्णपिण्डेनैव।)*

**प्रद्युम्नः** :- (निर्वर्ण्य सश्लाघम्-)

पद्यम्- **कर्णान्तकूलङ्कषलोचनाब्जः**
**कश्चिद्दधानस्सुषमाविशेषम्।**
**तनोति मे लोचनयोर्विनोदं**
**मनोहरो मन्मथ विग्रहोऽयम्।। ७३।।**

---

१८. प्राकृतम् **मज्ञणं कदुअ मङ्गळोइदं मण्डणं जहतहं मए कदम्।**
**इट्ठदेवचलणञ्चणस्स मे संपदं कुणह सूणसंचअम्।। ६६।।**

छाया।। ***मज्ञनं कृत्वा मंगळोचितं मण्डनं यथातथं मया कृतम्।***
***इष्टदैवचरणार्पनाय मे साम्प्रतं कुरुत सून सञ्चयम्।। ६६।।***

---

1. M. Gr.1 दइअं 2. M. Gr.1 मणिसिअ-लाहत्थम्।, T. Gr.1 मणीसिद लाहंथम्।
3. M. Gr.1 साअंलेण संचिआइ 4. M. Gr.1 णिंमाणइ वंमहविंगहं

(पुनस्सोत्कण्ठम्।) सखे! साम्प्रतमेतस्या देवसपर्यासमयानुरूपो वेष एष तोषयति मदीयं हृदयम्। तथा हि—

पद्यम् - **हारिद्रैरनुलेपनैस्सुरभिळं कल्याणमस्या वपुः**
**पश्चात्संयमितैश्च कुन्तलभरैर्मध्यं परं बाध्यते।**
**हस्ताब्जं जपमालिकापरिचयादत्यन्तशोणायते**
**क्षामाङ्ग्या गरिमैकसीम्नि जघने क्षौमांशुकं मोदते।। ७४।।**

**विदूषकः** :- वअंस से पेच्छ देवदाहिज्झाणावहाणणिच्चलणं णिसग्गाहि[1] रूवं रूवं।। *(वयस्यास्याः पश्य देवताभिध्यानावधाननिश्चलनं निसर्गाभिरूपं रूपम्।।)*

**प्रद्युम्नः** :- (निर्वर्ण्य)[2] सखे! शास्त्रसरणिं[3] न व्यभिचरति साम्प्रतमस्या देवताध्यानचमत्कारः।

पद्यम् - **नासाग्रलम्बिनवमौक्तिकमर्धनीलं**
**नेत्रांशुभिः प्रसृमरैर्हरिनीलयन्ती।**
**उद्भासते निभृतमुन्नमितस्तनीयं**
**दीप्ता निवात इव सद्मनि दीपरेखा।। ७५।।**

**विचक्षणा** :- हळा मायावदि! सअला विओ आरादेव्व स्स अवे अह्लेण अणुट्ठिदा। अज्ज उणअप्पे हिप्फंजलिं।[4] *(हळा मायावति! सकला अप्युपचारा देवस्यावैकल्येन त्वयाऽनुष्ठिताः। अद्य पुनरर्पय पुष्पाञ्जलिम्।)*

**मायावती** :- तह *(तथा)* (इति[5] कुसुमान्यञ्जलिना गृह्णाति।)

---

1. M. Gr.1 णिच्चलं णिंसंगाहि 2. M. Gr.1 (निर्वर्ण्य) इति नास्ति। 3. M.Gr.1 शास्त्रसरणेः
4. M. Gr.1 हळा माआवइ! सअला वि उवआरदें वंसअवेंयळेण तुए अणुट्ठिआ। अंजउणअंपेहि पुंफजलिं। T. Gr.1 हळा माआवदि! .... अंपेहि पोंफंजलिम्।
5. M. Gr.1 तहेंति
6. M. Gr.1 (ओ आरा इत्यत्र उओउप इत्यनेन उपेत्यस्य ओकारादेशः) -इति टीका नास्ति।

**विदूषकः** **:-** अपवार्य—

पद्यम्- **घेत्तूण[1] सूणलाआ कण्णाविअ जअदि[2] कामिणी एसा।**
**पडि सरबंधं दाणिं कुणदु[3] करे से कुदूहळेण[4] भवम्।। ७६।।**

***(गृहीत्वा सूनलाजान् कन्येव जयति कामिन्येषा।[5]***
***प्रति सरबन्धमिदानीं करोतु करेऽस्याः कुतूहलेन भवान्।। ७६।।)***

**प्रद्युम्नः** **:-** (सासूयम्) तथाविधकर्मारम्भसमये त्वामेव पौरोहित्याय समाह्वयामः। इदानीं तु जोषमास्व।

**विदूषकः** **:-** वअंस महवि वअणं तुह किं अप्पिअं विअ भादि[6]।।
*(वयस्य ममापि वचनं तव किमप्रियमिव भाति ?)*

**प्रद्युम्नः** **:-** प्रियमेवैतत् किन्तु न तथ्यम्।। तथा हि—

पद्यम् - **किमन्वया किमावासा कस्य हेतोरिहागता।**
**कन्या पाणिगृहीती[7] वेत्यविचार्य प्रगल्भसे।। ७७।।**

**विदूषकः** **:-** अहिलंवि अग्गे विसदं हविस्सदि *(अखिलमप्यग्रे विशदं भविष्यति।[8])* (इति जोषमास्ते।)[9]

**मायावती** **:-** (सप्रावण्यम्)

पद्यम् - **अइ णम्ममित्त माहव णंदणलाहेण परममाणंदं।**
**कलुणासिसिरकडक्खो मह वम्मह[10] सिग्घमप्पेहि।। ७८।।**

***अयि नर्ममित्र! माधव! नन्दनलाभेन परममानन्दम्।***
***करुणाशिशिरकटाक्षः मम मन्मथशीघ्रमर्पय।। ७८।।[11]***

(इति पुष्पाञ्जलिमर्पयति।)[12]

---

1. M. Gr.1 घेंतूण 2. M. Gr.1 जअयि 3. M. Gr.1 कुणउ
4. M. Gr.1 कुऊहळेण 5. M. Gr.1 कामिनी एषा। 6. M. Gr.1 अंपिअं विअ भाइ 7. M. Gr.1 पाणिगृहीता 8. M. Gr.1 भविष्यदि(ति जोषमास्ते।)
9. M. Gr.1 अखिलं वि अंगे विसदं भविंसदिंति (जोषमास्ते।) 10. M. Gr.1 महमम्मह
11. M. Gr.1 **अयि … मन्मथशीघ्रमर्पय।।** 'इति पुष्पाञ्जलिमर्पयति।' इति अधिकः पाठः।
12. T. Gr.1, My. Tel. Print **(इति पुष्पाञ्जलिमर्पयति।)** इति नास्ति।

**विदूषकः** :- विसदं।। २।। *(विशदम्।। २।।)*

**प्रद्युम्नः** :- किमिति।।

**विदूषकः** :- माहव णंदणळाहेणत्ति[1] मुउंदणंदणस्स तुज्झ एव्व लाहं एसा अब्भत्थेदि[2]। *(माधवनन्दनलाभेनेति मुकुन्दनन्दनस्य तवैव लाभमेषाऽभ्यर्थयति[3]।)*

**प्रद्युम्नः** :- (विहस्य) अहो वाक्यार्थानभिज्ञस्य तवापि व्याख्याकौशलम्। यतो नर्ममित्र-माधवेति वसन्तमित्रमदनामन्त्रणपरमाद्यपादं नन्दनलाभेनेति पुत्रलाभप्रार्थनापरमनन्तरचरणम-प्यन्यधा व्याकुरुषे।।

**विदूषकः** :- तुमं एव्व कुसळो अण्णहा विवरणेसु कुदो मारिसस्स मंदमदिणो तारिसं कोसलम्। *(त्वमेव कुशलोऽन्यथा विवरणेषु कुतो मादृशस्य मन्दमतेः तादृशं कौशलम्?)*

**प्रद्युम्नः** :- अलं जीवतः कवेरभिप्रायवर्णनकलहेन। विवादास्पदं वाक्यार्थं तावदस्या मुखादेवावधारयावः[4] (—इत्युभौ वेतसतरुकुहरान्निर्गच्छतः।।)

**मायावती** :- (निर्वर्ण्य सह सखीभ्यां ससम्भ्रममुत्तिष्ठति।)

**मनोरमा** :- (सविस्मयम्) हळा मायावदि को एसो कमणिज्जवेसो[5] राअकुमरो विअ तुह पूआए पसण्णो मअणो[6] पुरदो सण्णिहेदि[7]। *(हळा मायावति! क एष रमणीयवेषो[8] राजकुमार इव तव पूजया प्रसन्नः मदनः[9] पुरतः सन्निधत्ते।)*

**मायावती** :- (सानुरागं निर्वर्ण्य विचक्षणां प्रति जनान्तिकम्) हळा! विअक्खणे एदस्स राअवुत्तस्स उत्तंतमहिलं पुच्छसु।[10] *(हळा विचक्षणे एतस्य राजपुत्रस्य वृत्तान्तमखिलं पृच्छ[11]?)*

---

1. M. Gr.1 णेंति
2. M. Gr.1 अंबंधेहि
3. M. Gr.1 अभ्यर्थयते, T. Gr.1 इयं छाया नास्ति।
4. M. Gr.1 वाक्यार्थमस्या मुखादेव अवधारयावः।
5. T. Gr.1 रमणिंजवेसो
6. M. Gr.1 मअणो इति नास्ति।
7. M. Gr.1 पुरओ संणिहेइ
8. M. Gr.1 एषो रमणीय्यवेषो
9. M. Gr.1 मदनः इति नास्ति।
10. M. Gr.1 हळा! विअंखणे! एअंस राअउंतंस उंतंदि अहिळं पुंछसु ?
11. M. Gr.1 पृच्छस्व भवती

**विचक्षणा** **:-** (सविनयं राजपुत्रं प्रति)——

पद्यम्- **कम्हा कंजविसालल्लोअण भवम् ?**

***(कस्मात् कञ्जविशाललोचन! भवान् ?)***

**प्रद्युम्नः** **:-** (स्वगतम्) हन्त! विचक्षणेत्यन्वर्थमेवास्या अभिधानम्[1]। यतः कुलस्थानादिकमिव वैदुष्यमपि मम परीक्षितुं च्छन्दो बद्धेनैव वाक्येन प्रश्नमारब्धवती[2]। तन्मयाऽपि तदुत्तरमुदाहरता तस्यैव शेषपूरणं कर्तव्यम्।। (प्रकाशम्)

***श्रीदर्भकस्याश्रमात्,***

**विचक्षणा** **:- किं जम्मेण कुलं तुए सफलिदं ?**

***(किं जन्मेन [किं जन्मना][3] कुलं त्वया सफलितम् ?***

**प्रद्युम्नः** **:-** ***ख्यातं यदूनां कुलम्।***

**मनोरमा** **:-** हळा मायावदि! फळिदं तुज्झ[4] पूआलदाए।।

*(हळा! मायावति! फलितं तव पूजालतया)*

**मयावती :-** (अपवार्य) हळा मणोरमे! सव्वंवि कमादो एव्व विसदं होज्झा जोसं सुणुसु पण्हुत्तरचमक्कारं[5]।। *(हळा! मनोरमे! सर्वमपि क्रमादेव विशदं भविष्यति[6] जोषं शृणु प्रश्नोत्तरचमत्कारम्।)*

**विचक्षणा** **:- कस्सा पञ्चमुआरभग्ग[7][सु]णिहिणो ?*(कस्यापत्यमुदारभाग्य[सु]निधेः।)***

**प्रद्युम्नः** **:-** (विदूषकं प्रति) मौञ्जायन! देहि तत्रोत्तरम्।

---

1. M. Gr.1 इदमभिधानम्
2. M. Gr.1 छन्दो बद्धेनैव प्रश्नमारब्धयति।
3. अत्र यद्यपि **किं जन्मना** इति पाठेन भाव्यं तथापि **अपि माषं मषं कुर्यात् छन्दो भङ्गं न कारयेत्** इति न्यायेन छन्दसः अभङ्गाय **किं जन्मेन** इति पाठः आदर्तव्यः। यद्यप्यत्र नास्ति छन्दो भङ्गः तथापि **जन्मेन** इति अपशब्दप्रयोगः भवति। किन्तु प्राकृतभाषाभाषिण्याः विचक्षणायाः तादृशदोषः यथाकथञ्चित् सोढव्यः।
4. M. Gr.1 हळा माआवइ! फळिदं तुंझ पूआलदाए ?
5. M. Gr.1 सुणसु पण्होंतरचमंकारं
6. M. Gr.1 भवति
7. M. Gr.1 पंचमुदारभंगणि

**मनोरमा :-** (जनान्तिकम्) एसो एद्ध कुदो सअं उत्तरं ण देदि[1]।
*(एषोऽत्र कुतः स्वयमुत्तरं[2] न ददाति।)*

**मायावती :-** लोउत्तरा पमाणवंसदा एव्वणं एद्ध मूअं कुणदि। किं ण सुणसि (आत्मनाम गुरोर्नामेति) महेसि वअणं।। *(लोकोत्तरा प्रमाणवशतैवैनमत्र[3] मूकं करोति। किं न शृणोषि महर्षिवचनम्।[4])*

**विदूषकः :-** (संस्कृतमाश्रित्य) ***कृष्णस्य विश्वप्रभोः,***

**विचक्षणा :- को णामो इमिणो ? *(किं नामास्य)* (१९)**

**विदूषकः :- महर्षिभिरसौ प्रद्युम्ननामोच्यते।। ७९।।**[5]

**विचक्षणा :-** हळा मायावदि! संदिहाणाए[6] तुए णिम्माणिदो कम्मोपोक्कलंगदाए मज्झे अपुव्वमंदरेण एव्व फळं जणेदि[7]। *(हळा[8] मायावति! सन्दिहानया त्वया निर्मितं कर्मपुष्कलाङ्गतया मध्ये अपूर्वमन्तरेणैव[9] फलं जनयति।।)*

**मायावती :-** (सलज्ञमवनतमुखी तिष्ठति[10]।)

**विदूषकः :-** (सहासम्) वअंस! मए भणिदस्स सद्दत्थस्स गेण्हदु भवं संवाअं[11]।
*(वयस्य मया भणितस्य[12] शब्दार्थस्य गृह्णातु भवान् संवादम्।।)*

---

**१९.** स्त्रमदामशिरोनभो न रीतिपुंस्त्वम्।

---

1. M. Gr.1 देइ।
2. M. Gr.1 कुतो स्वयमेव उत्तरं
3. M. Gr.1 प्रमाणवश्यतैव एनमत्र, My. Tel. Print. प्रमाणशरणतैवैनमत्र
4. M. Gr.1 किं न शृणसि ? **(आत्मनाम गुरोर्नामेति)** महर्षिवचनम्।
5. ***कस्मात् कञ्जविशाललोचन! भवान्? श्रीदर्भकस्याश्रमात्,***
   ***किं जन्मेन (जन्मना) कुलं त्वया सफलितम् ? ख्यातं यदूनां कुलम्।***
   ***कस्यापत्यमुदारभाग्य[सु]निधेः? कृष्णस्य विश्वप्रभोः,***
   ***किं नामास्य?*** **महर्षिभिरसौ प्रद्युम्ननामोच्यते।। ७९।।**
6. M. Gr.1 संदहाणाए
7. M. Gr.1 पुंकळं मंझे पुंवं अंतरेण एंव फळं जणेइ।
8. M. Gr.1 सखि
9. M. Gr.1 पुष्पमन्तरेणैव
10. M. Gr.1 तिष्ठती।
11. M. Gr.1 फणिदंस संदंधंस गण्हउ भवं संवादं।
12. M. Gr.1 फणितस्य

**प्रद्युम्नः** :- (सहर्षं स्वगतम्) मयि नूनमस्याः कंदळितप्रेमानुबन्धमन्तःकरणम्[1]। तथा हि-

पद्यम्- **व्रीडालीढं प्रणयसुभगं वीक्षितं सामिवामं**
**मन्दोद्भिन्नस्मितसुरभिळं मञ्जुवक्त्रारविन्दम्।**
**सान्द्रोन्मील[2]त्पुळकमुकुळैर्मेदुरं गात्रमस्याः**
**प्रादुर्भावं कथयति मयि प्रेमधाराङ्कुरस्य।। ८०।।**

अहो! ममाप्यस्यामतिवेलंकुसुमचापचापलम्।। तथा हि—

पद्यम् - **क्षामाङ्ग्याः कुचयोः क्षतार्पणकला कंडूलकामाङ्कुशं**
**कामं सम्प्रति जृम्भते करयुगं कण्ठग्रहोत्कण्ठया।**
**शश्वत्कर्णयुगीसरोज[3]सुदृशश्चाटूनि शुश्रूषते**
**किंचोदञ्चति कोमलाधरसुधास्वादाय[4] वक्त्रं मुहुः।। ८१।।**

**विदूषकः** :- विअक्खणे! किमिमाए देवीए मह वअंसम्मि राआणुबंधणिमित्तं।[5]
*(विचक्षणे! किमस्या देव्या मम वयस्ये रागानुबन्धनिमित्तम्।[6])*

**विचक्षणा** :- एद्ध बालसहआरच्छाअम्मि खणं उवविसदु राअकुमारो अहिलंवि अणुक्कमेण वोच्छिस्सामि।[7] *(अत्र बालसहकारच्छायायां क्षणमुपविशतु राजकुमारः। अखिलमप्यनुक्रमेण वक्ष्यामि।)*

***(।। तथेति सर्वे नाट्येनोपविशन्ति।।)***

---

1. M. Gr.1 **कंदळितप्रेमानुबन्धमन्तःकरणम्** इति स्थाने **कंदळितिप्रेमानुबन्धमन्तः** इत्येवास्ति।
2. M. Gr.1 मन्दोन्मीलत्
3. M. Gr.1 सरोरुह
4. M. Gr.1 कोमळाधरदळास्वादाय
5. M. Gr.1 विअंखणे किमिमाए देवीए मह वयं सम्मि रा आणुबंधणिंतं।
6. M. Gr.1 विचक्षणे ..... निमित्तम् इति छाया नास्ति।
7. M. Gr.1 उपविसऔ अहळंअणुकमेण वोंछंसामि।

**विचक्षणा** **:-** (उभावुद्दिश्य)

पद्यम् - **देविं जाणहणं रदिं महिदले मायावदीरूविणिम्[1]।**

***(देवीं जानतैनां रतिं महीतले मायावतीरूपिणीम्,)***

**प्रद्युम्नः** **:-** (स्वगतम्) कथमन्यधा[2] कल्याणीयमीदृशरूपा ?

**विदूषकः** **:- किं ठाणम् ?** ***(किं स्थानम्?)***

**विचक्षणा** **:- दणुइंद संबरघरम्** ***(दनुजेन्द्रशम्बरगृहम्)***

**विदूषकः** **:- किं तस्स गेहे ठिदा[3]।** ***(किं तस्य गेहे स्थिता।)***

**विचक्षणा** **:- पज्जुण्णं किल संबरादु कुहनादक्खादुणं रक्खिदुं।[4]**

***(प्रद्युम्नं किल शम्बरात् कुहनादक्षादेनं रक्षितुम्,)***

**विदूषकः** **:- कोअं माणिणिसे ?** ***(कोऽयं मानिन्यस्याः ?)***

**विचक्षणा** **:- सहीअ रमणो एसो पसूणाउहो।। ८२।।[5]**

***(सख्या रमण एष प्रसूनायुधः।। ८२।।)***

**प्रद्युम्नः** **:-** मयि मदनभावोपन्यासेन सकलमिदं नून[6]मळीकं स्यादिति डोलायते हृदयम्।

**विदूषकः** **:-** (सहर्षम्) दिठ्ठिआ संपण्णा तुह मणोरहसिद्धी।[7] ता तुवरसु तुमं देवीए से पाणिग्गहणमंगळम्मि[8]।। *(दिष्ट्या[9] सम्पन्ना तव मनोरथसिद्धिः। तस्मात्त्वरस्व त्वं देव्या अस्याः पाणिग्रहणमंगळे।)*

---

1. M. Gr.1 **... रइं महितळे माआवंरं रूविणीम्।**
   T. Gr.1 **देविं णाणहणं रदिं महिदले माआवदीरूविणीम्।**
2. M. Gr.1 कथमन्या
3. M. Gr.1 ठिआ
4. M. Gr.1 पंजुंणं किर संबराउ कुहनादंखाउणं रंखिदुं।
5. M. Gr.1 सहीए रमणो एसो पसूणा युहो
6. M. Gr.1 नून इति नास्ति।
7. M. Gr.1 संधि
8. M. Gr.1 पाणिंगहणमंगळंमि।
9. M. Gr.1 दृष्ट्या

**प्रद्युम्नः** **:-** अहो! कष्टमियति वयसि वर्तमानस्यापि तव बुद्धेरुपरिप्लवता। यदविमृश्यैव यत्किञ्चिदभिलपसि।।

**विदूषकः** **:-** (साशङ्कम्) कुदो एदं ? *(कुत एतत्।)*

**प्रद्युम्नः** **:-** मां हि शैशवदशायां मायाविनश्शम्बरादभिरक्षितवतीयमित्येतावदभ्युपगतमेव। किन्तु जन्मान्तरदाम्पत्योपन्यासेन प्रलोभनं हन्त! न शक्नोम्यानन्दयितुं[1] विमर्शशीलमन्त-रात्मानम्।

(पुनस्सविमर्शम्) शृणु[2] सखे!

पद्यम्- **कल्याणी योषिदियं कामं रतिरस्तु वामा वा।**
**असकृद्विमृशन्नप्यहमात्मानं[3] न स्मरामि कन्दर्पम्।। ८३।।**

**मायावती** **:-** (दीर्घमुष्णं निश्वस्य। स्वगतम्।) हंत! महंतमेदं वेससं उप्पण्णं। जं एसो अप्पाणं विविम्हरति[4]।

*(हन्त! महदेतद्वैशसमुत्पन्नम्। यदेष आत्मानमपि विस्मरति।[5])*

**विदूषकः** **:-** (अपवार्य)

पद्यम्- **विलअं रमणिज्जंणं विहादुं देण संपदं।**
**णिराकरेदि को लच्छिं अहीण्णू सअमाअदं[6]।। ८४।।**

***(वनितां[7] रमणीयामेनां विहातुं तेन साम्प्रतम्।***
***निराकरोति को लक्ष्मीमभिज्ञस्स्वयं[8]मागताम्।। ८४।।)***

---

1. M. Gr.1 शोष्यात्यानन्दयितुं
2. M. Gr.1 श्रुणु
3. M. Gr.1 असकृद्विमर्शन्नप्यहमात्मानं
4. M. Gr.1 विविह्मरयि।
5. M. Gr.1 यस्मात् एषो आत्मानं विस्मरति।
6. M. Gr.1 णिराकरेइ को लंछिहिंणू सअमागअं।, T. Gr.1 अहींणो सअमागअं।
7. M. Gr.1 विहार
8. M. Gr.1 लक्ष्मीमभितस्स्वय

**प्रद्युम्नः** :- शृणु[1] सखे! तत्त्वार्थम्।

पद्यम्- **सौन्दर्यसारनिलया इति चापलेन[2]**
**प्राज्ञः कथं परिरभेत परस्य दारान्।**
**उद्दामदीपकलिकां परमुज्ज्वलेति**
**कौतूहलात् क इह चुम्बितुमुत्सहेत।। ८५।।**

**मनोरमा** :- (जनान्तिकम्) हळा! माआवदि! अम्हो अप्पाणस्स अण्णाण दोसेण एसो तुह उवरिं परदारत्तण-मारोवेदि[3]।। *(हळा![4] मायावति! अहो! आत्मनोऽज्ञानदोषेणैष तवोपरि परदारत्वमारोपयति ।।)*

**मायावती** :- हळा मनोरमे ! अअं दाव किं कुणिज्ज्ञा[5]। जं णिद्दअं दइअं[6] एव्व मह उवरिं एव्वं विहं णाडअं उवक्कमदि[7]।। *(हळा![8] मनोरमे! अयं तावत् किं करिष्यति। यन्निर्दयं दैवमेव ममोपर्येवंविधं नाटकमुपक्रमते।[9])*

**विचक्षणा** :- अम्हो! राअउत्त अलं पदिव्व दुत्तिमाए[10] इमाए देवीए उवरिं[11] परदारत्तण कहणावदेसेण[12] दुट्ठसीलदारोवणेण। अवि दु जम्मंतराणुहूदत्थ[13]सक्कारविहुरं अप्पाणं एव्व उवालहसु[14]।।

*(अहो! राजपुत्रालं पतिव्रतोत्तमाया[15] अस्या देव्या उपरि परदारत्वकथनापदेशेन दुष्टशीलतारोपणेन। अपि तु जन्मान्तरानुभूतार्थसत्कारविधुर[16]मात्मानमेवोपालभस्व।।)*

---

1. M. Gr.1 श्रुणु
2. **सौन्दर्यसारनिलयेति हि चापलेन** इति पाठः साधुः विसन्धिदोषपरिहाराय।
3. M. Gr.1 आरोवेइ
4. M. Gr.1 सखि!
5. M. Gr.1 कुणंजा।
6. M. Gr.1 दइवं
7. M. Gr.1 उवंकमइ
8. M. Gr.1 सखि!
9. M. Gr.1 यस्मान्निर्दयं दैवं ममोपर्येवंविधिन्नाटकमुपक्रमते।
10. M. Gr.1 पइंवउंतमाए
11. M. Gr.1 उवरि
12. M. Gr.1 रहणावदेसेण
13. M. Gr.1 भूदंथ
14. M. Gr.1 उपालहसु
15. M. Gr.1 अहो राजपुत्र पतिव्रतायाः
16. My. Tel. Print. संस्काररहित

**प्रद्युम्नः** :- (सावज्ञम्) पण्डिता हि भवती दुरुपपादानामप्युपपादने विचक्षणा खल्वसि[1]।

पद्यम् - **आपातसुन्दरमनर्थकरं विमर्शे क-**
**श्श्रद्दधीत वचनं भुवि कामिनीनाम्।**
**किं पाकलब्धसहकारफलानुकारं**
**किंपाकभूरुहफलं निपुणा गृणन्ति।। ८६।।**

(विदूषकमुद्दिश्य पुनस्सवितर्कम्) सखे! भवानिदं निशमयतु।।

पद्यम्- **असुरपरिबृढेन चोदिताना-**
**मभिमतरूपकृतां निशाचराणाम्।**
**अवितथमहमुल्लिखामि तेषा-**
**ममुमपि कंचन वञ्चनाविशेषम्।। ८७।।**

**विदूषकः** :- (सभयकम्पम्) तह जइ पलाअणं एव्व पच्छं संपदमम्हाणं।।
*(तथा यदि पलायनमेव पथ्यं साम्प्रतमावयोः[2]।)*

**विचक्षणा** :- हळा माआवदि! मा होदु दुक्खे अ[3] विसेसकसाइदं तुह हिअअं। सअं एव्व सव्वं कालक्कमेण जाणिस्सदि राअउत्तो!। एत्ताहे उणएहि तस्स णईपवहस्स अहिमुहं ण गच्छिदव्वं।[4] *(हळा[5] मायावति! मा भवतु दुःखे च विशेषकषायितं[6] तव हृदयं स्वयमेव सर्वं[7] कालक्रमेण ज्ञास्यति राजपुत्र!। इदानीं पुनरेहि तस्य नदीप्रवाहस्याभिमुखं [8] न गन्तव्यम्।)*

**मनोरमा** :- हळा माआवदि! किं एद्ध इदो परि अवट्ठाणेण। चिरं तुह असण्णिहाणेण जाणिस्सद संबरो माआरूवं ति उञ्चिट्ठ गच्छिहामो (-इति[9] हस्तं समर्पयति।)

---

1. M. Gr.1 हि खल्वसि
2. M. Gr.1 पथ्यमस्माकम्।
3. M. Gr.1 मा होदु खेदविसेसकसाइअं तुह हिअयं।
4. M. Gr.1 जाणिंसइ। राअउंतो एंतहे पुण एतं सणइं पवाहं स अभिमुहदा एण गंछिगवं।
5. M. Gr.1 सखि
6. M. Gr.1 मा भवतु खेदविशेषकषायितं
7. M. Gr.1 सर्वमपि
8. M. Gr.1 राजपुत्रो अत्र अस्मात् पुनरेहि तस्य नदीप्रवाहस्याभिमुखतया
9. M. Gr.1 असंणिहाणे जाणिंसइ संबरो मायारूपं ति इं चिंठ गंछिहामोंति

*(हळा[1] मायावति! किमत्रेत उपर्यवस्थानेन[2] चिरं तवासन्निधानेन ज्ञास्यति शम्बरो मायारूपमित्युत्तिष्ठ गच्छामः।*

**मायावती** :- (दीर्घमुष्णं निश्वस्य, बाष्पाविलाभ्यां लोचनाभ्यां मुहुर्मुहुः प्रियतममवलोकयन्ती सव्याजं विलम्ब्य, सह सखिभ्यां निष्क्रान्ता[3]।।)

**विदूषकः** :- वअंस! किं एद्ध विलंबेसि सिग्घं गच्छिस्सामो महेसिणो आसमं[4]।।
*(वयस्य किमत्र विलम्बसे[5] शीघ्रं गमिष्यावो महर्षेराश्रमम्।)*

**प्रद्युम्नः** :- मौञ्जायन! सन्दर्शय महर्षेराश्रममुपतिष्ठमानं पन्थानम्।।

**विदूषकः** :- इदो मग्गो।। *(इत इतो मार्गः।)*

**प्रद्युम्नः** :- (सत्वरं साधयन्नग्रतोऽवलोक्य) अये! व्यतिक्रान्तानि गिरिकान्ताराणि साम्प्रतं कुलपतेराश्रमोपकण्ठपदवीमवतीर्णास्स्मः।। यतः -

पद्यम् - **विहाय वेदिस्तरणोचितान् कुशा-**
**निहाहरन्ते तृणमेणशाबकाः।**
**शकुन्तडिम्भास्सकुतूहलं बृह-**
**द्रथन्तरादीनि शनैरधीयते।। ८८।।**

इतश्च— **संगेन सांगेष्टिकृतामृषीणां**
**सालोयमालोहितपल्लवाग्रौ।**
**शाखाग्रजाग्रत्कुसुमासवाज्यै-**
**राघारमाघारयतीति(२०) मन्ये।। ८९।।**

---

**२०.** वायव्यादाग्नेयान्तमित्यादिरीत्याऽग्नौ कोणेष्वाज्यसेचनमाघारः। गृघृ-सेचन इति धातुपाठात्। आघारयतीत्यस्य करोतीत्यर्थः।

---

1. M. Gr.1 सखि!
2. M. Gr.1 किमत्र इतःपरमवस्थानेन
3. M. Gr.1 सखीभ्यान्निष्क्रान्ता
4. M. Gr.1 गछिंसामु महेसिणो असमं।
5. My. Tel. Print. & T. Gr.1 विलम्बयसि

अपि च— **सामोदषट्पदकदम्बपदाभिघात-**
**भ्रश्यत्प्रसूनशकलोपहता[1] वहन्ते।**
**बालाधरामृतसखास्स्फुटकुन्दबृन्द-**
**प्रस्यन्दि शीथुपृषताः (२१) पृषदाज्यलक्ष्मीम्।। ९०।।**

**विदूषकः** :- वअंस![2] अलं विलम्बेण सिग्घं साहेहि।।

*(वयस्य![3] अलं विलम्बेन शीघ्रं साधय।*

**प्रद्युम्नः** :- (अश्रुतिमभिनीय किमपि ध्यायन् विलम्ब्य याति।)

**विदूषकः** :- वअंस! किमज्ज वासंगविवस-माणसो विअ मन्दं मन्दं जासि।।

*(वयस्य! किमद्य व्यासंगविवशमानस इव मन्दं मन्दं यासि ?)*

**प्रद्युम्नः** :- सखे! साधु पश्यसि। व्यासंगविवशमेव सम्प्रति मदीयं हृदयम्। तथा हि—

पद्यम्- **क्वेयं नाम रतिर्मुकुन्दतनुजः क्वाहं मनोजः क्व वा**
**भूयस्सङ्गकथेति यद्यपि परं डोलायितं शङ्कया।**
**तामुद्दामघनस्तनस्तबकिनीं तन्वीं तथाप्यद्भुतां**
**स्मारं स्मारमिह स्थिता मम तनुस्तत्रैव लग्नं मनः।। ९१।।**

किञ्च— **कमलसखमुखाब्जं कान्तकर्णावतंस-**
**भ्रमदसमदनेत्रं भङ्गुरभ्रूविटङ्कम्।**
**गुरुजघननितम्बक्लेशखिन्नावलग्नं**
**किमपि युवति रत्नं केवलं भावलग्नम्।। ९२।।**

अपि च— **अम्भोजलक्ष्मी परमान्तरङ्गैरालिङ्गितप्रेमनदीतरङ्गैः।**
**सौम्यैरपाङ्गैस्सरसीरुहाक्ष्याश्चित्तं हृतं चित्तभुवोऽर्पितं मे[1]।। ९३।।**

---

**२१.** पृषदाज्यं दधिमिश्राज्यम्।

---

1. M. Gr.1 शकलोपहिता
2. M. Gr.1 वअंस! इति नास्ति।
3. M. Gr.1 वयस्य! इति नास्ति।
4. M. Gr.1 **चित्तभवोऽपि तेने।।**

**विदूषकः** :- वअंस ! तारिसीए तणुमज्झाए उवरि साहु संसत्तस्स मणस्स पुण प्पच्चाहारं कादुं जोइणोवि ण प्पहोन्ति। तहवि जइ सा सच्चं रई जइ अ तुमं वम्महो ताहे[1] कालक्कमेण तुम्हाणं समाअमो होज्झिस्सदि[2]।

एदं[3] खु देव्वस्स ण दुक्करं। एदत्थं[4] मा होदु तुह चिंता। दाणिं तुदे[5] वड्ढओ दब्भअमहेसी तुज्झ अणाअमेण चिन्तापरवस-हिअओ होज्झा। तुण्णं जाहि।

*(वयस्य ! तादृश्या[6]स्तनुमध्याया उपरि साधु संसक्तस्य मनसः पुनः प्रत्याहारं कर्तुं योगिनोऽपि[7] न प्रभवन्ति। तथापि यदि सा सत्यं रतिः यदि च[8] त्वं मन्मथः तदा[9] कालक्रमेण युवयोस्समागमो[10] भविष्यति।*

*एतत्खलु देवस्य न दुष्करम्। एतदर्थं तव मा भवतु चिन्ता।[11] इदानीं तु ते वर्धको दर्भकमहर्षिस्तवानागमेन चिन्तापरवशहृदयो भविष्यति[12]। तूर्णं याहि।)*

**प्रद्युम्नः** :- सत्यमेवैतद् (इति[13] सत्वरं परिक्रामति।)

**विदूषकः** :- वअंस ! आसमो[14]पंतो पविट्ठो अम्हेहिं। जं एद्ध इसीणं उडयपरंपरा दीसदि[15]।
*(वयस्याश्रमोपान्तः[16]प्रविष्ट आवाभ्यां यदत्र ऋषीणामुटजपरम्परा दृश्यते।।)*

---

1. M. Gr.1 पुणंपंछाहारं कादुं जाइणो विणं पहोति। सासंचंरं जइ तुमिवं महो ताहे
2. M. Gr.1 होंजिसदि।
3. M. Gr.1 एअं
4. M. Gr.1 एअंथं
5. M. Gr.1 दुदे
6. M. Gr.1 तादृशः
7. M. Gr.1 ज्ञानिनोऽपि
8. M. Gr.1 यदि च इति नास्ति।
9. M. Gr.1 तस्मात्
10. M. Gr.1 समागमं
11. M. Gr.1 एतदत्र मा भवतु तव चिन्ता।
12. M. Gr.1 भवेत्।
13. M. Gr.1 सत्यमेतद् इति
14. M. Gr.1 अंसमो
15. M. Gr.1 उडअ परंपरादिसइ।
16. M. Gr.1 वयस्याश्रमप्रान्तः

**प्रद्युम्नः** **:-** आम् सखे! अत्र खलु शमधनानामग्निशरणेभ्यः।

पद्यम् - **गोदुग्धव्यतिकरलब्धसौभगश्री-**
**धूमोऽयं दुरितहरो विगाहते द्याम्।**
**संदातुं हविरनलेन देवताना-**
**मुच्चैरुद्धृत इव बाहुरुज्जिहानः।। ९४।।**

तदेहि भगवतः कुलपतेर्दर्शनेन चक्षषीकृतार्थयाव इति निष्क्रान्तौ।।

***।। इति श्रीवाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवप्पयाचार्यतनूभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथार्ययज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन सीताम्बागर्भसम्भवेन काञ्चीनगरवास्तव्येन वेङ्कटाचार्ययज्वना विरचिते प्रद्युम्नानन्दनाम्नि नाटके प्रथमोऽङ्कः।।***[1]

1. My. Tel. Print. पुष्पिकायाः स्थाने **इति प्रथमाङ्कः** इत्येवास्ति।
T. Gr.1 पुष्पिकायाः स्थाने **प्रथमोऽङ्कः** इति अस्ति।

# द्वितीयोऽङ्कः

***(ततः प्रविशति महेन्द्रचारो लब्धवर्णो नाम।)***

**लब्धवर्णः** **:-** (सवैयग्र्यम्।) महेन्द्रेण हि मायावती-प्रद्युम्नयोरुदन्तमवगन्तुमृक्षवन्तं प्रति प्रहितोऽस्मि। तन्मया झटिति[2] तत्पुरमासाद्य तयोरुदन्तं विचार्य परावर्तितव्यम् - (इति सत्वरमुपसृत्यावलोक्य) हन्त! ऋक्षवन्तपुरस्यायमतिवेलो विभवः।।

पद्यम् — **स्फटिकखचितहर्म्यस्फारकान्तिप्रवाहा**
**दिशि दिशि विसरन्तो दीर्घसञ्चारतान्तम्।**
**दिनकरहयसङ्घं दिव्यगङ्गोर्मिमोहा-**
**दधिजिगमिषितां भस्सञ्चयं वञ्चयन्ते।। १।।**

किञ्चात्र — **शफरागभीरपरिघा[3]विहारिण-**
**श्शशलाञ्छने समुदिते स्वरापगाम् ।**
**विधुकान्तसालविगळन्नवोदक-**
**प्रचयोन्मुखाः प्रसभमुत्पतन्त्यहो!।। २।।**

अपि च — **प्रासादचित्रवलभीनिलयाः प्रभाते**
**पारावताः कलरवान् परमुद्गिरन्तः।**
**अध्यापयन्ति शनकैरमरेन्द्रपत्नी-**
**र्मञ्जूद्गमानि रणितानि[4] रतोत्सवेषु।। ३।।**

(इति किञ्चिदन्तरमुपसरन्नाकाशे लक्ष्यं बद्ध्वा)

---

1. M. Gr.1, My. Tel. Print **ओम्** इति नास्ति।
2. My. Tel. Print झडिति
3. T. Gr. 1 & My. Tel. Print. परिखा
4. T. Gr. 1 & My. Tel. Print. मञ्जूद्गमानि मणितानि

अयि मायावत्याः परिचारिके[1] कलकण्ठि! क्वेदानीं प्रस्थिताऽसि ? किमात्थ कपित्थारण्यवासिनं कमपि समधिगतसकलपुण्यक्षेत्रमाहात्म्यं निर्धारितनिखिललोकयोगक्षेमं सोमश्रवसं नाम मायावत्या हितोपदेशदेशिकं योगीन्द्रमाकारयितुम् (इति)।।

**लब्धवर्णः** :- (पुनराकाशे) कलकण्ठि! किं तदाऽकारणकारणम् ? किं ब्रवीषि ?

प्रद्युम्नेन खल्वनात्मज्ञेन परदारबुद्ध्या प्रत्यादिष्टा मायावती तद्विरहदहनसन्ताप-मनुभवन्ती सखीभ्यां सोपचारमाश्वास्यमाना क्रीडावने गूढमास्ते। तत्कृते प्रद्युम्नस्य प्राचीनजन्म-संस्कारोद्बोधनोपायं[2] प्रष्टुकामया विचक्षणया प्रेषिताऽस्मि महायोगिनमेनमानेतुम् (इति)।

**लब्धवर्णः** :- (सहर्षम्) महाराजमहेन्द्रस्यापि मनीषितानुगुणमेवेदं त्वरस्व तस्मिन् कार्ये। वृत्तान्तमेतमहमपि महेन्द्राय निवेदयितुं साधयामि (इति निष्क्रान्तः।)

**।। शुद्धविष्कम्भः।।**

1. T. Gr. 1 & My. Tel. Print. कथं मायावत्याः परिचारिकेयम् ?
2. M. Gr.1 संस्कारोत् बोधन

***(ततः प्रविशति विरहातुरा मायावती सख्यौ च।)***

**मायावती :-** (दीर्घं निश्वस्य) हंत! मइ दइवस्स अण्णारिसी पडिऊलता[1]। तहहि-

पद्यम् — **अम्हो! मिमाण खु परोप्परजोअकाले**
**विग्घो हळा! विरइदो[2] विहिणा हदेण।**
**हा! मे मणो तवदि संपदि[3] रज्जुभंगो**
**हज्जं गवीणजणणावसरेव्व जादो[4]।। ४।।**

*(हन्त! मयि दैवस्यान्यादृशी प्रतिकूलता। तथा हि-*

***अहो आवयोः खलु परस्परयोगकाले***
***विघ्नो हळा[5] विरचितो विधिना हतेन।***
***हा मे मनस्तपति सम्प्रति रज्जुभङ्गो***
***हैयङ्गवीनजननावसर इव[6] जातः।। ४।।)***

**विचक्षणा :-** हळा! माआवदि अलमलं विहलेन[7] विलापेण। अज्ज उणसंदावं ओणेदुं एलोअअ[8] चंदणारविंदप्पमुह सीअलोपआरा घेप्पंदु[9]।।

*(हळा[10] मायावति! अलमलं विह्वलेन[11] विलापेन अद्य पुनस्सन्तापमपनेतुमेलोदक-चन्दनारविन्दप्रमुखशीतलोपचारा गृह्यन्ताम्[12]।।)*

**मायावती :-** (अश्रुतिमभिनीय)

पद्यम्- **घणविरहदहणवड्ढिदसंदाव विसेसदूसिदे[13] दाणिम्।**
**कुसुम सुउमार देहो वससि तुमं णाह मह कहं हिअए।। ५।।**

1. M. Gr.1 पइकूळदा
2. M. Gr.1 विरइओ
3. M. Gr.1 मणं तवइ संपइ, T. Gr.1 मणो तपदि संपदि
4. M. Gr.1 जाओ
5. M. Gr.1 सखी
6. My. Tel. Print एव
7. T. Gr. 1 & My. Tel. Print. विफलेन
8. M. Gr.1 एलोदअ घेंपंतु
9. M. Gr.1 घेंपंतु
10. M. Gr.1 सखि!
11. T. Gr. 1 & My. Tel. Print. विफलेन
12. M. Gr.1 क्षेपन्तु
13. M. Gr.1 वंडिअसंताव विसेसदूसिए

***(घनविरहदहनवर्धितसन्तापविशेषदूषितायाः[1] इदानीम्।***
***कुसुमसुकुमारदेहो वससि त्वं नाथ मम कथं हृदये।। ५।।)***

**मनोरमा :-** (सखेदम्) हळा विअक्खणे! इमाए अणिवारणिज्जो विरहुम्माओ। जंतारं उच्चरिदाणि[2] वि देवअणाइ बहिरत्तण-बाहिअस्स जणस्स विअ सवण पहम्मिण पडंति[3]।

*(हळा[4] विचक्षणे! अस्या अनिवारणीयो विरहोन्मादः। यत्तारमुच्चरितान्यपि ते वचनानि बधिरत्वबाधितस्य[5] जनस्येव श्रवणपथे न पतन्ति।।)*

**विचक्षणा :-** हाळा! मणोरमे! साहु मंतेसि। एसा खु संदाव[6]समण-साहणाइ चंदणरसप्पमुहाइ चंदकिरणजालआइ[7] कमलिणी विअ ण सहदि।।

*(हळा[8] मनोरमे! साधु मन्त्रयसि[9]।। एषा खलु सन्तापशमनसाधनानि चन्दनरस-प्रमुखानि[10] चन्द्रकिरणजालकानि[11] कमलिनीव न सहते।।)*

**मायावती :-** हळा सहिओ! तुम्हाणं को मए कदोओराहो[12]। जं सिसिरोवआर-मिसेण मज्झ विजोअदवाणलं वड्ढावित्था। पेच्छह।। २।।

*(हळा सख्यौ युवयोः को मया कृतोपराधः। यच्छिशिरोपचारमिषेण वियोगदवानलं वर्धयिष्यतः।। पश्यतम्[13] ।। २।।)*

पद्यम्- **मह विरहपावआणं सुहचंदणमिंधणं होदि[14]।**
**एलासुरहिलमुअअं णवं घिदं ता ण[15] जाणामि।। ६।।**
***(मम विरहपावकानां शुभ[16]चन्दनमिन्धनं भवति।***
***एलासुरभिलमुदकं नवं घृतं तेषां[17] जानामि।। ६।।)***

---

1. T. Gr. 1 & My. Tel. Print. दूषित
2. M. Gr.1 उंचरिआइ
3. M. Gr.1 बाहिअंस विअ दणं सव्यवण पहंमिणं पढंति।
4. M. Gr.1 सखि!
5. M. Gr.1 बहिरन्तर्बाधितस्य
6. M. Gr.1 एसा संताव
7. M. Gr.1 जाळाइ
8. M. Gr.1 सखि!
9. M. Gr.1 मन्त्रयसे
10. M. Gr.1 चन्दनारविन्दप्रमुखानि
11. M. Gr.1 जालानि
12. M. Gr.1 किओ अवराहो।
13. M. Gr.1 मम वियोगदवानलो वर्धापितः। पश्य-
14. M. Gr.1 होइ
15. M. Gr.1 घअंत ण
16. M. Gr.1 सुख
17. M. Gr.1 घृतं तन्न

**मनोरमा :-** (जनान्तिकम्) हळा विअक्खणे! संपदं से विसआणुहवोवि लोअणाणं अवमिच्छूविअ अम्हाहिं[1] दुम्मरिसो।। ता जह इमाए विसअविम्हरणं होदि तह कादव्व मम्हाहिं।।[2]

*(हळा विचक्षणे! साम्प्रतमस्या विषयानुभवोऽपि लोचनयोरपमृत्युरिवावाभ्यां दुर्मर्षः। तस्माद्यथास्या विषयविस्मरणं [3] भवति तथा कर्तव्यमावाभ्याम्।।)*

**विचक्षणा :-** (अभ्युपगम्य) हळा माआवदि! इदो मंदाणिलं दोलित मउळिणिग्गळित मअरंदरस प्पसरसंपुण्ण-सीदलिमाणं[4] माहवीमंडपं पविसदु भवदी तावावणअणं कादुं[5]।।

*(हळा मायावति! इतो मन्दानिलान्दोळितमौळिनिर्गतमकरन्दरसप्रसारसम्पूर्ण-शीतलिमानं[6] माधवीमण्डपं प्रविशतु भवती तापापनोदनं [7] कर्तुम्।।)*

**मायावती :-** तह *(तथा।)* (इति लता मण्डपं[8] प्रविशति।)

**मनोरमा :-** (सविनोदम्) हळा माआवदि इदो पेच्छ।।

पद्यम्- **तलुण[9] सहआरतरुणा जुत्ता णो मालिआवेल्ली।**
**सिञ्जदि[10] महुच्छलादो करेदि मणिदाइ[11] मळिरुदमिसादो।। ७।।**

*(हळा मायावति! इतः पश्य।[12]*

***तरुणसहकारतरुणा युक्ता नवमालिकावल्ली।***
***स्विद्यति[13] मधुच्छलात्करोति मणितान्यळिरुतमिषात्।। ७।।)***

**मायावती :-** (साभ्यसूयम्) एसा खु मह सिद्दिमुहुत्तेण सिट्ठा विहिणा। तदो एव्व एदारिस[14] दसाविसेसविवसं मं पेक्खिअ इअं णवत्तव मज्ञणावआदप्पमआर आवळीवल-क्खसुसुमेहिं कुसुमेहिं हसदि विअ[15]।।

1. M. Gr.1 अम्हेहिं 2. M. Gr.1 ता जह इमाए वसाअविम्हरणं होइ तह कादंवं अम्हेहिं
3. M. Gr.1 विषादानुभवोऽपि लोचनानामपमृत्युरिव अस्माभिर्दुर्मर्षः। तद्यथा अस्याः विषादविस्मरणं ...
4. M. Gr.1 दोळिआमूळिणिंगळि अमअरंदरसंपंण सीअळिमाणं
5. M. Gr.1 पविसउभवं रंतावावण अणं कादुं 6. M. Gr.1 निर्गलितमकरन्दरसप्रसरसम्पन्न
7. M. Gr.1 तापापनयलं 8. M. Gr.1 तहेंति लता मण्टपं
9. M. Gr.1 तरुण 10. M. Gr.1 सिंजइ 11. M. Gr.1 करेइ मणिआ
12. M. Gr.1 संस्कृतच्छया नास्ति। 13. M. Gr.1 सिञ्चति
14. M. Gr.1 एआरिस 15. M. Gr.1 दाअंपमदारदावळीपळं खसुसुमेहिं कुसुमेहिं हसइ विअ।

*(एषा खलु मम सृष्टिमुहूर्तेन सृष्टा विधिना। तत एवैतादृश दशाविशेषविवशां मां दृष्ट्वेयं नवार्तव मञ्जनावदात-प्रमदारदावळी [1]-वळक्षसुषुमैः कुसुमैर्हसतीव।।)*

**विचक्षणा :-** माआवदि! मा एव्वं भणिज्ञा।[2] जं एसा।।

पद्यम् - **विरहविसाअभरं दे वेल्ली दट्ठूण दअमाणा[3]।**
**महुरूवमंसुमुज्झदि डवडवदि दुरेह गाणकवडेण[4]।। ८।।**

*(मायावति! मैवं भण [5]। यदेषा।*

***विरहविषादभरं ते वल्ली दृष्ट्वा दयमाना।***
***मधुरूपमश्रूज्झति प्रलपति द्विरेफगानकपटेन[6] ।। ८।।)***

**मनोरमा :-** (सचमत्कारम्) तदो एव्व इमाए लदाए सहआरिणित्ति सहओ वपदेसो[7]। *(तत एवास्या लतायास्सहचारिणीति सहजो व्यपदेशः[8]।)*

**मायावती :-** (सोत्कण्ठम्) ताहे इअं वणळदा सहआरिणी मे जाहे विलासरसिओ मम[9] वल्लहो सो। कीळासु चाडुभणिदेसु[10] समं हळा! से सूनं कुणिज्ज[11] सहि मे सवणावदंसं।।

*(तदा [12] इयं वनलतासहचारिणी मे यदा विलासरसिको मम[13] वल्लभस्सः। क्रीडाचाटुभणितेषु[14] समं हळाऽस्यास्सूनं कुरु[15] सखि मे श्रवणावतंसम्।।)*

**विचक्षणा :-** किमेव्वं पुणो पुणो पलविदमेव्व पलवसि। तारिसो वि ऊसवो तुह देव्वाणुग्गहादो हविस्सदि।[16]*(किमेवं पुनः पुनः[17] प्रलपितमेव प्रलपसि ? तादृशोऽप्युत्सवस्तव[18] दैवानुग्रहाद्भविष्यति।)*

---

1. M. Gr.1 दावलि
2. M. Gr.1 माआवरं मा एंवं भणें जा जं एसा।
3. M. Gr.1 दयमाणा।
4. M. Gr.1 महुरइव असुं मुंझइ वडवडइदुरेह गाणकवडेण।
5. M. Gr.1 फण
6. M. Gr.1 मधुरूपअश्रुमुझति कटुरटति द्विरेफगानकपटेन।।
7. M. Gr.1 जहं योववदेसो।
8. M. Gr.1 सहकारिणीति यथार्थो अपदेशः।
9. M. Gr.1 मह
10. M. Gr.1 चाडुभणिदेअ
11. M. Gr.1 कुणंज
12. M. Gr.1 तस्मात्
13. M. Gr.1 मे खिला सरसिको मम
14. M. Gr.1 क्रीडासु चाटुफणिते च
15. M. Gr.1 कुरुष्व
16. M. Gr.1 किमेंवं फुणासि ऊसओ तुह दें वाणुं गहादो भविंसइ।
17. M. Gr.1 **पुनः पुनः** इति स्थाने **फणसि** इति अस्ति।
18. M. Gr.1 तादृशोऽपि उत्सवः तव

**मायावती** **:-** (निध्याय) किमहं पुणोवि मह हिअअवळ्ळहस्स तत्तारिसं मुहकमलम् - *(किमहं पुनरपि मम हृदयवल्लभस्य तत्तादृशं मुखकमलम् ?[1])*

(इत्यर्थोक्ते मूर्छां नाटयति[2]। सख्यावन्योन्यं मुखं सबाष्पमवलोकयतः।।)

**मनोरमा** **:-** (नळिनदळव्यजनपवनैरस्यास्संज्ञामागमय्य)

सहि! समाससिहि[3]।। २।। *(सखि![4] समाश्वसहि।। २।।)*

**मायावती** **:-** (कथञ्चिद्धैर्यमाहार्य) अम्हो मणोरमे! किंति संतावाणळं अणिळेहिं[5] वड्ढेसि। (पुनर्विमर्श्य) अहवा[6] किं तुह उवालंभेण। एदं पहंजणमेव्व उवालहामि[7]। (सपारुष्यम्)

पद्यम्- **सुणु पवणतुमेक्को सोवि एक्को मअंको[8]**
**विरहिपसुवहेसुं बद्धदिक्खौ[9] दुवेवि।**
**दसदु णणु सरीरं दंदसूओ तुहाणं अहव[10]**
**तहवि लोए होदि[11] पावी चिराऊ।। ९।।**

*(अहो! मनोरमे! किमिति सन्तापानलमनिले [12]वर्धयसि। अथवा किं तवोपालम्भेन? एतं प्रभञ्जनमेवोपालभे [13]।*

***शृणु पवनत्वमेकः सोऽप्येको मृगाङ्कः***
***विरहिपशुवधेषु बद्धदीक्षौ द्वावपि।***
***दशतु ननु शरीरं दन्दशूको युवयोरथवा[14]***
***तथापि लोके भवति पापी चिरायुः।। ९।।)***

**विचक्षणा** **:-** सहि! सच्चं इमाणं चंदमंदपवणाणं दंदसूअदंसेवि वड्ढदि आऊ।।

*(सखि! सत्यमनयो[15]श्चन्द्रमन्दपवनयोर्दन्दशूकदंशेऽपि वर्धते आयुः[16]।)*

---

1. M. Gr.1 (इत्यर्थोक्ते मूर्च्छामभिनयति।) इति अधिकपाठः। 2. M. Gr.1 मूर्छामभिनयति।
3. M. Gr.1 **सहि! समाससिहि** इति स्थाने **समंससहि** इति अस्ति।
4. M. Gr.1 सखि! इति नास्ति। 5. T. Gr. 1 & My. Tel. Print. संदावाणलं अहिलेहिं
6. M. Gr.1 अहव 7. M. Gr.1 उपाळहामि 8. M. Gr.1 अंकोमि अंको
9. M. Gr.1 बंधदिंखा 10. M. Gr.1 दंदसूओ तुहाणं अहह 11. M. Gr.1 होइ
12. T. Gr. 1 & My. Tel. Print. मखिलै 13. M. Gr.1 प्रभञ्जनमेव उपालभामि।
14. M. Gr.1 रहह 15. M. Gr.1 मेतयो 16. M. Gr.1 दशनेऽपि वर्धत्यायुः।

**मायावती** :- (पुनस्सरोषम्)

पद्यम्- **मंदंवि[1] हंत! पवणं जवणं जाणामि जं खलो एसो।**
**कुणदि[2] वणे महुजोई पंचमसंगेण पहिअ जण बाहं।। १०।।**

*(१) (मन्दमपि हन्त पवनं यवनं[3] जानामि यत् खलु एषः[4]।*
*करोति वने मधुयोगी पञ्चमसङ्गेन पथिकजनबाधाम्।। १०।।)*

*।। नेपथ्ये।।*

**विराजमानं श्रीमन्तमारुहच्छम्बरो रथम्।**
**प्रस्थितस्समराकाङ्क्षी मृत्युना परिचोदितः।। ११।।**

**चतुर्भिस्सचिवैस्सार्थं सैन्येन महतावृतः।**
**दुर्धरः केतुमाली च शत्रुहन्ता प्रमर्दनः।। १२।।**

**एतैः परिवृतोऽमात्त्यैर्युयुत्सुः प्रस्थितो रणम्।**
**तमृक्षवन्ते नगरे निहत्यासुरसत्तमम्।। १३।।**

**गृह्य मायावतीं देवीमागच्छन्नगरं पितुः।**
**चित्रसेनोऽतिसेनश्च विष्वक्सेनोऽजितस्तथा।। १४।।**

**श्रुतसेनस्सुसेनश्च सोमसेनो मदस्तथा।**
**सेनानीस्सैन्यहन्ता च सेनहासैन्यकस्तथा।। १५।।**

**सेनास्कन्धोऽतिसेनश्च सेनको जनकस्तथा।**
**सकलो विकलश्शान्तस्सुशान्तोऽन्तकरो विभुः।। १६।।**

**कुम्भसेनस्सुदंष्ट्रश्च केशिरित्येवमादयः।**
**श्रुत्वा तु शम्बराद्वाक्यं सुतास्ते शम्बरस्य हा।**
**सन्नद्धा निर्ययुर्हृष्टाः प्रद्युम्नवधकाङ्क्षया।। १७।।**[5]

***१. टीका :-*** *जवनमित्यत्र यवनमिति च प्रतीयते।*

1. M. Gr.1 मंतंवि
2. M. Gr.1 कुणइ विव
3. T. Gr. 1 & My. Tel. Print. जवनं
4. M. Gr.1 खलो एषः
5. M. Gr.1 नेपथ्यम् नास्ति। **विराजमानं ......** तः **प्रद्युम्नवधकाङ्क्षया।।** इति पर्यन्तम्।

**मायावती** **:-** (मुहूर्तं निध्याय सामर्ष[1] संस्कृतमाश्रित्य)

पद्यम्- **स त्वां योगी तव दिशि वसन् शत्रुनामांशभाजं**
**कस्मान्ना ग्रात्कठिनयमदिग्वात[2] वातापि तापी।**
**यद्वा रोषादपि कबळितं योगिना तेन नूनं**
**तत्याज त्वां सुहृदिति धिया तस्य किं जाठराग्निः।। १८।।**

किञ्च- **व्यर्थं दीनां व्यधयसि मुहुर्वातवीतागसं मां**
**स्तोकस्तो[3] काप्युदयति तव स्त्रीवधेनैव शङ्का।**
**प्रागानन्दे जनकदुहितुः प्राप्य शीलं पितुस्ते**
**यातु स्त्रीणां किल कबळनं याचति स्माञ्जनेयः।। १९।।**

अपि च- **वातशीत इव लक्ष्यसे पुनः पातकिन् क्षिपसि पावकं मयि।**
**चोळभूपरिचयात्तवाथवा कल्पते कपटशीलताद्ध्रुवम्।। २०।।**

अपि च- **प्राणिव्रातप्रमथनदशाभीषणश्राद्धदेव-**
**घ्राणद्रोणी[4]विसृमरमरुद्धत्तहस्तावलम्बः।**
**वायो भूयो मलयमकुटीकूटपाटीरवाटी**
**व्याळक्ष्वेळश्वसितमिळितस्त्वं कुतो मय्यतीक्ष्णः।। २१।।**

किं बहुना- **सन्तः पवनपिशाचं हन्त विदुस्त्वामतस्त्वदावेशात्।**
**अळिरवमन्त्रोच्चारा अन्तश्च लयन्ति मल्लिकाबालाः।। २२।।**

**मनोरमा :-** (विहस्य) सहि कहं संपदं सक्कदभासा एव वहरसि[5]। *(सखि! कथं सम्प्रतं संस्कृतभाषया व्यवहारः[6]।)*

**मायावती** **:-** (आत्मनश्चित्तविकारमनुस्मृत्य लज्जते।)

---

1. M. Gr.1 सामर्षं इति स्थाने पुनस्सरोषम् इति अस्ति। 2. M. Gr.1 यमदिक्ग्वात 3 . T. Gr. 1 & My. Tel. Print. स्तोकस्ता 4. M. Gr.1 घ्रौणीद्रौणी
5. M. Gr.1 संकअभासाए एंव ववहरसि।
6. M. Gr.1 साम्प्रतं संस्कृतभाषयैव व्यवहुरसि।, T. Gr.1 व्यवहरसि

**विचक्षणा** **:-** (सपरिहासम्)[1] सहि! एव्वं ववहारो[2] से पाणवल्लहा भेअ[3] णिइज्झासणेण। *(सख्येवं व्यवहारोऽस्याः प्राणवल्लभाभेदनिधिध्यासनेन।।)*

**मायावती** **:-** (सखेदहासं करतले कपोलमाधाय)

पद्यम्- **देहाभेअ[4]कहा सुण्णागदं पिअदमापअं[5]।**
**अन्तदोदारभावेवि संसओ विहिणा कदो[6]।। २३।।**

(पुनस्तापातिशयमभिनीय) सहि! कअळि मह संदावं[7] णिवारेहि।

***(देहाभेदकथा शून्यागतं प्रियतमापदम्।***
***अन्ततोदारभावेऽपि संशयो विधिना कृतः।। २३।।***

*सखि! कदळि मम सन्तापं निवारय।)*

(इति लतामण्डप[8]रम्भास्तम्भमालिङ्गति।)

**मनोरमा** **:-** पेक्ख विअक्खणे[9] पिअसहीए वेलं विलंघमाणाणं[10] विरहाणलज्झालाणं विअंभणं। जेण इमाए आलिंगिदा कअळीसीदल[11]सहावदाए दअमाणा विअ मइला होदि[12]।

*(पश्य विचक्षणे प्रियसख्या वेलां विलङ्घमानानां विरहानलज्वालानां विजृम्भणम्। येनानयाऽलिङ्गिता[13] कदळीशीतलस्वभावतया दयमानेव मलिना भवति।)*

**विचक्षणा** **:-** सहि! तह ण होदि[14] एदं। किं दु अमूए ऊरूणं रामणीअअं दट्ठूण अमरिसेण मइला होदित्ति अहमुल्लिहामि[15]।। *(सखि! तथा न भवत्येतत्। किंत्वमुष्या[16] ऊर्वो रामणीयकं दृष्ट्वा अमर्षेण मलिना भवतीत्यहमुल्लिखामि।)*

---

1. My. Tel. Print. (सपरिहासम्) इति नास्ति।
2. M. Gr.1 ववहरो
3. M. Gr.1 भेद
4. M. Gr.1 देहाहेद
5. M. Gr.1 पिअदमपदं।
6. M. Gr.1 विहिणाकओ
7. M. Gr.1 संतावं
8. M. Gr.1 लतापण्टप
9. M. Gr.1 वियंखणे!
10. M. Gr.1 विळंघमाणंणं
11. M. Gr.1 कअळीसीअळ
12. M. Gr.1 होइ
13. T. Gr. 1 & My. Tel. Print. येनानयो आलिङ्गिता
14. M. Gr.1 होइ
15. M. Gr.1 होइंति हं उंळिहामि।
16. M. Gr.1 भवति। एतत् किन्तु अस्याः

**मायावती** **:-** (सदैन्यम्) सहीओ से कअळीकंडस्स सुइरमालिङ्गणे[1] वि मह ण संतो संतावो।। *(सख्यावस्य कदळीकाण्डस्य सुचिरमालिङ्गनेऽपि[2] मम न शान्तस्सन्तापः।)*

**विचक्षणा** **:-** (सपरिहासम्) आलिङ्गिदव्वस्स आलिंगणे संदावसन्ती होज्ञा।
*(आलिङ्गितव्यस्यालिङ्गने तापशान्तिर्भविष्यति[3]।)*

**मायावती** **:-** (साङ्गीकारम्) आम सहि -

पद्यम् - **कप्पूरखंडमअभूमिदळे[4] किळित्तं**
**सीदंसुमंडलछुहोह[5]मअं तडाअं।**
**गाहामि णाम जइ णा तणुतावसंती**
**ताहे वि तस्स महुराहरमंतरेण।। २४।।**

*(आम सखि !*
***कर्पूरखण्डमयभूमितले क्लृप्तं***
***शीतांशुमण्डलसुधौघमयं[6] तटाकम्।***
***गाहे[7] नाम यदि ना तनुतापशान्तिः***
***तथापि तस्य मधुराधरमन्तरेण।। २४।।)***

(पुनस्सविषादमातंकातिशयं निरूप्य)

पद्यम्- **मंदं मंदं जह जह हळा! मारुदो[8] वादि एसो**
**सिग्घं सिग्घं तह तह बहू होन्ति सासाहिलासा[9]।**
**संवड्ढंते जह जह वणे कोइलोआरणाआ[10]**
**अम्हो सद्दा तह तह गळे मज्झ मंदी हुवंदि[11]।। २५।।**

---

1. M. Gr.1 चिरं आळिंगणे
2. M. Gr.1 कदळीखण्डस्य चिरमालिङ्गनेऽपि
3. M. Gr.1 सन्तापशान्तिर्भवति।
4. M. Gr.1 भूमितळे
5. M. Gr.1 सीअंसुमंडलसुहो
6. M. Gr.1 सुधौखमयं
7. M. Gr.1 गाहामि
8. M. Gr.1 मारुओ
9. M. Gr.1 सासाणि(भि)ळामे।
10. M. Gr.1 कोइलोदारणादा
11. M. Gr.1 भवंति।

***(मन्दं मन्दं यथा यथा हळा! मारुतो वात्येषः***
***शीघ्रं शीघ्रं तथा तथा बहू भवन्ति श्वाशाभिलाषाः[1] ।***
***संवर्धन्ते यथा यथा वने कोकिलोदारनादा***
***अहो! शब्दास्तथा तथा गळे मम मन्दी भवन्ति।। २५।।)***

**मनोरमा** :- एव्वमेदं। अलमलं सवणकडुणा दुक्खवण्णणचडुणा। अज्ज उण लच्छीवल्लह[2]-हीअअ-सीअलं संफुल्लपल्लवतल्लं आरुहिद्धा। ताव[3]भंगुराइं अंगाइं सिसिरअदु भवदी।

*(एवमेतत्। अलमलं श्रवणकटुना दुःखवर्णनचटुना। अद्य पुनर्लक्ष्मीवल्लभ-हृदयशीतलं सम्फुल्लपल्लवतल्पमारोह। ताप[4]भङ्गुराण्यङ्गानि शिशिरयतु भवती।)*

**मायावती** :- तह *(तथा।)* (इति समारोहति तल्पं नाटितकेन। मुहूर्तमिव स्थित्वा[5], पुनस्सविषादम्)

अम्हो! जम्हअ[6]भूसण-फालणअण-णअण[7]मंसल-किसाणुभीसणेषु-णवकिसलएसु[8] सअणं मह वड्ढावदि संदावं[9]। ता एद्ध ण सक्कुणोमि[10] अवट्ठादुं।

*(अहो! जिंहगभूषण-फालनयन-नयनमांसल-कृशानुभीषणेषु नवकिसलयेषु शयनं मम वर्धयति[11] सन्तापम्। तस्मादत्र न शक्नोम्यवस्थातुम्।)*

(इति। पुनस्सामर्षं पल्लवतल्पादुत्तिष्ठति।)

**मनोरमा** :- सहि! सहसु।। २।। *(सखि! सहस्व।। २।।)* (इति गाढमाश्लिष्यति।)

**मायावती** :- (सप्रेमकोपम्) सहि! किं एदेहिं[12] मह विरहदहणस्स हत्थावलंबणं आअरंतेहिं सुक्कोवआरेहिं। जइ णाम मे जीवणं तुम्हाणं समीहिदं ताहे तस्स अणुउणो उवाओ चिंतणिज्जो।।

*(सखि! किमेतैर्मम विरहदहनस्य हस्तावलम्बनमाचरद्भिश्शुष्कोपचारैः। यदि नाम मे जीवनं युवयोस्समीहितं तदा तस्यानुगुणोपायश्चिन्तनीयः।)*

---

1. M. Gr.1 श्वासानिलामे। 2. M. Gr.1 वंळभ 3. M. Gr.1 आरुहिह। संताव
4. M. Gr.1 तल्पम् आरुह्य, सन्ताप 5. M. Gr.1 मुहूर्तं स्थित्वैव
6. M. Gr.1 जिम्हअ 7. M. Gr.1 णअण इति नास्ति। 8. M. Gr.1 किसलेसु
9. M. Gr.1 वंढावइ संतावं 10. M. Gr.1 संकामि 11. M. Gr.1 वर्धति
12. M. Gr.1 एएहिं

**मनोरमा** **:-** एव्वं विअक्खणाए। *(एवं विचक्षणया।[1])*

**मायावती** **:-** केरिसो। *(कीदृशः ?)*

**विचक्षणा** **:-** सहि एद्ध कज्ज़े उवाअं पुच्छिदुं तुह हिदोवएस[2]देसिओ महाजोई सोमासवो णाम[3] कलकण्ठीमुहेण आआरिदो।। *(सख्यत्र कार्ये उपायं प्रष्टुं तव हितोपदेशदेशिको महायोगी सोमश्रवाः नाम कलकण्ठीमुखेनाकारितः[4]।)*

**मायावती** **:-** (सधैर्यावष्टम्भम्) तह जइ सअलतंत-णिरूवणसीलो सो एव्व महाजोई मं सो असाअरादो समुद्धरिस्सदि।।

*(तथा यदि सकलतन्त्रनिरूपणशीलस्स एव[5] महायोगी मां शोकसागरात् समुद्धरिष्यति।)*

**विचक्षणा** **:-** को एद्ध संदेहो ? *(कोऽत्र सन्देहः ?[6])*

***।। नेपथ्ये।।***

पद्यम्- **(कस्य कृतार्थयति तरोश्छायां मायावती धृता या सा।)**

**मायावती** **:-** (श्रुत्वा साशङ्कम्) अम्हो ! किं मह चिरं असण्णिहाणेण माआरूवं विजाणिअ एद्ध आअच्छदि[7] संबरो।

*(अहो ! किं मम चिरमसन्निधानेन मायारूपं विज्ञायात्रागच्छति शम्बरः।)*

**विचक्षणा** **:-** किं अट्ठाणे संकसी सुणुसु जोसं अग्गे सव्वं विसदं हविस्सदि[8]। *(किमस्थाने शङ्कसे शृणु जोषमग्रे सर्वं विशदं भविष्यति[9]।)* (इति श्रुतिं दत्वा सर्वा अवदधते।)

***।। पुनर्नेपथ्ये।।***

***(मयि जाग्रत्युग्रतपस्यार्तेर्वार्ता कथं नु वत्सायाः।। २६।।)***

---

1. M. Gr.1 एवं विचक्षणायै। 2. M. Gr.1 हिदोवदेस
3. M. Gr.1 सोमंसवो 4. M. Gr.1 सोमश्रवाः कलकण्ठिकामुखेनाकारितः।
5. M. Gr.1 तथा सति सकलतत्त्वनिरूपणशीलो स एव
6. M. Gr.1 कस्सन्देहः 7. M. Gr.1 आअंछइ
8. M. Gr.1 होइ 9. M. Gr.1 भवति।

**मायावती** :- (श्रुत्वा[1] सहर्षम्) हळा! णीदो[2] संदेहो। जं सो एव्व सोहणो महाजोई परमकालुणि[3]अदाए अम्हाणं लोअणाइ कदत्थीकादुं आदो। ता एदं[4] देसिअं पच्चुग्गच्छामो।

*(हळा! नीतस्संदेहः। यत्स एव शोभनो महायोगी परमकारुणिकतयाऽस्माकं लोचनानि कृतार्थीकर्तुमागतः तस्मादेतं देशिकं प्रत्युद्गच्छामः।[5])*

(इति सर्वा योगिनं ससंभ्रमं प्रत्युद्गच्छन्ति।)

***(ततः प्रविशति कलकण्ठ्या निवेद्यमानोद्यानपद्यस्सुशीलेन शिष्येण सह महायोगी सोमश्रवाः।)***

**सोमश्रवाः** :- (सवात्सल्यम्) क्व वत्सा मायावती ?

**सख्यौ** :- (प्रणम्य। सप्रश्रयम्) इदो कडक्खेदु देसिओ। एसा तुम्हाणं चलणपोम्हाणं णमोक्कारमाअरदि[6]। (सोपचारम्) देसिअ! एसो विट्ठरो (इति विष्टरं समर्पयति।।) *(इतः कटाक्षयतु देशिकः। एषा युष्माकं चरणपद्मयोः[7] नमस्कारमाचरति। देशिक एष विष्टरः।)*

**विचक्षणा** :- (अर्घ्याद्युपचारानाहरति।)

**सोमश्रवाः** :- उपचारास्सर्वेऽप्याचरिताः। उपविशतामितो वत्से! भवत्यौ। विशिष्य चेदानीमलसा मायावती च।

**[सर्वाः[8]]** :- जं आअरिओ आणवेदि। *(यदाचार्य आज्ञापति।[9])* (इति[10] सर्वास्साञ्जलि-बन्धमुपविशन्ति।।)

**सोमश्रवाः** :- (सकरुणम्) कथमेतादृशः कृशभावो वत्सायाः ? अस्याः खलु -

पद्यम्- **प्रादोषिकाम्बुजविडम्बिमुखप्रभाणि**
**प्रत्यूषचन्द्रसुषुमामुपमानयन्ति।**
**अङ्गानि मध्यपदवीमहह प्रपन्ना-**
**न्यालोकितुं प्रभवतां कथमक्षिणी मे।। २७।।**

तदाख्या हि विचक्षणे! तत् कार्य्यं यन्निबन्धनमेतस्याः।[11]

---

1. M. Gr.1 श्रुत्वा इति नास्ति।
2. M. Gr.1 णीओ
3. M. Gr.1 कारुणि
4. M. Gr.1 किदंथीकादुं आअओ। ता एअं
5. M. Gr.1 "**हळा ... प्रत्युद्गच्छामः।**" इति नास्ति।
6. M. Gr.1 णमोंकारं आअरइ।
7. M. Gr.1 पद्मानां
8.* **। सर्वाः।।** इति नास्ति।
9. M. Gr.1 यदाचार्योऽस्मानाज्ञापयतीति।
10. M. Gr.1 जं आअरिओ मं आणवेदिंति
11. My. Tel. Print. & T. Gr.1 तानवनिबन्धनमेतस्याः

**विचक्षणा** :- (स्वगतम्) होदु[1] एदस्स संपदं जोअसंपदाअवसदाए पआसणकदे[2] एव्वं वच्छिस्सं। (प्रकाशम्) अय्य![3] तुए जोअप्पहावादो एव्व उवलद्धे णिहिलत्थे[4] किं पुणरुत्तिभूदेहिं अम्हाणं वअणेहिं।।

*(भवत्वेतस्य साम्प्रतं योगसम्प्रदायवशतायाः प्रकाशनकृते एवं वक्ष्यामि। आर्य! त्वया योगप्रभावादेवोपलब्धे निखिलार्थे किं पुनरुक्तिभूतैरस्माकं वचनैः।।)*

**सोमश्रवाः** :- अस्तु योगदृष्ट्यैवास्यास्सन्तापमूलमुपलप्स्ये (इति नेत्रे निमील्य ध्यायति।)

**सुशीलः** :- प्रतिपन्नं किं भवता कृत्स्नम् ?

**सोमश्रवाः** :- चक्षुषी उन्मील्य। हन्त! प्रतिपन्नमन्तरात्मना सन्तापनिबन्धनं वत्सायाः। (सावज्ञम्।) वत्से! तदेतदीषत्करम् यदर्थं तव चिन्ता सन्तापः।

**सुशीलः** :- सकुतूहलम् भगवन्! विवृणुष्व। वयमप्येतन्निशमयिष्यामः।

**सोमश्रवाः** :- तर्हि श्रूयतामवहितेन।।

पद्यम् **(२)** **तत्तादृग्भवपद्मसम्भवमुखत्रैविष्टपग्रामणी-**
**चूडापीडसुरद्रुगुच्छकमधुस्त्रोतो विशेषोर्मिभिः।**
**अस्तोकैरभिषिच्यमानचरणत्राणस्य पत्नीहरेः**
**प्रद्युम्नं किल रुक्मिणीसुतमिह प्रासूतलोकोत्तरम्।। २८।।**

**सशीलः** :- भगवन्नधिगत एवायमस्माभिरपि। यः खलु रतिवल्लभांशश्शम्बरनिरासाय यदुकुलमभूषयत्।।

---

२. तत्तादृगित्यत्र तत्तदिव दृश्यत इति तत्तादृक्। तत्तदिति वीप्सा। यद्वा **तादृगादयो रूढिशब्दाः नैवात्र दर्शनक्रिया दृश्यत** इति काशिकावचनात्। तादृक्छब्दो रूढ्या प्रकाशकत्वार्थः। तथा च तच्छब्दः प्रसिद्धिपरः तादृक्छब्दो महामहिमत्वादिरूपतत्प्रकारविशेषप्रसिद्धिपरः। तयोः खञ्जकुब्ज-वद्विशेषणसमासे तत्तादृगिति रूपम्। यद्वा तुल्यशब्दसमानार्थकतत्तुल्यशब्दवत् तादृक्छब्दसमानार्थक-तत्तादृक्छब्दोऽप्यस्ति। एवमेतादृशादयोऽपीत्यभियुक्तैरप्पय्यदीक्षितैः **यादवाभ्युदयाख्यकाव्यरत्नव्याख्यायां** निरूपितम्।

---

1. M. Gr.1 होतु
2. M. Gr.1 आसणकए
3. M. Gr.1 अंअ!, T. Gr.1 अंअ!
4. M. Gr.1 णिहळंथे

**सोमश्रवाः** :- वत्स तर्हि स्तोकमेव कथयितुमवशिष्यते। शृणु तावत्।।

पद्यम् - **नावैति हन्त! रतिरित्यविशङ्कमेनां**
**नात्मन्यसौ मदनतामनुसन्दधाति।**
**अस्याः परिग्रहविधावभवत्पयोज-**
**पत्रान्तरस्थितपयस्तरळान्तरात्मा।। २९।।**

**विचक्षणा** :- (जनान्तिकम्) हळा माआवदि[1] अच्चरिअं।। २।। आअरिअस्स अस्स लोउत्तरं जोअमाहप्पम्।।

*(हला![2] मायावति आश्चर्यम्।। २।। आचार्यस्यास्य लोकोत्तरं योगमाहात्म्यम्।)*

**सुशीलः** :- (सशिरः कम्पम्) भगवन्! श्लाघनीयः प्रद्युम्नस्य शास्त्रवश्यत्वनिबन्धनो धैर्यातिशयः। यत एतादृशो[3] निर्यत्नमुपनतस्य रत्नस्य परिग्रहेऽपि संशेते।।

**सोमश्रवाः** :- वत्स! यथाभूतमभिदधासि[4]।

पद्यम् - **मुनेरपि मनोगतिर्भवति तावदेव स्थिरा**
**न यावदिह यौवनाभरणभूषिता योषितः।**
**स्थिरस्मरतरङ्गितं ददति सुस्मितालिङ्गितं**
**सरोजदुरहंकृति[5]क्षपणदीक्षितं वीक्षितम्।। ३०।।**

**मनोरमा** :- अम्हो! एदे अविवेअउत्तंतमेव्व पुणो कहं सलाहंति।[6]

*(अहो! एतावविवेकवृत्तान्तमेव पुनः कथं श्लाघेते।[7])*

**मायावती** :- खणं जोसं होहि। *(क्षणं जोषं भव।)*

**सुशीलः** :- भगवन्! भवान्तरीयसंस्कारोद्बोधने तस्य कस्तर्हि साम्प्रतमुपायः ?

**मायावती** :- (स्वगतम्) अज्ज दिट्ठिआ अम्हाहिं पुच्छिदव्वं अमुणा पुच्छिदम्।। *(अद्य दिष्ट्या अस्माभिः प्रष्टव्यममुना[8] पृष्टम्।)*

1. M. Gr.1 माआवइ! 2. M. Gr.1 सखि 3. My. Tel. Print. & T. Gr.1 एतादृशो
4. M. Gr.1 दधसि। 5. M. Gr.1 रहंकुति
6. M. Gr.1 अंहो! एए अविवेअ ळंतं एंव पुणो कहं सिळाहंति।
7. M. Gr.1 अहो! एते अविवेकलब्धमेव पुनः कथं श्लाघन्ति। 8. M. Gr.1 प्रष्टव्यमनेन

**सोमश्रवाः** **:-** वत्स! विचक्षणयाऽप्येतदर्थमेव वयमाकारिताः। तन्मया तत्रैवोपाय-श्चिन्तनीयः।

(इति ध्यानमभिनीय, मायावतीमुद्दिश्य)

वत्से! तदेतत्खलु निशम[1]यितव्यमव्यासक्तेन चित्तेन।

पद्यम् **(३)** **सालग्रामाचलपरिसरे सिद्धसाद्ध्यानुभाव्यं**
**पुण्यारण्यं विलसति फलैः पुष्कलं पुष्कराख्यम्।**
**तस्मिन्नस्ति त्रिदशमहितं *तीर्थमुष्टोधनाख्यं***
**यस्यालोकादपि च मनुजो याति जातिस्मरत्वम्।। ३१।।**

ततश्च - **माहेश्वरीभिर्मायाभिर्महातीर्थसमागमः।**
**यथास्य सिद्ध्यति तथा यतस्व सुमुखि! स्वयम्।। ३२।।**

**विचक्षणा** **:-** तह एव्व सही करिस्सदि। जह आणवेदि[2] आअरिओ। *(तथैव सखी करिष्यति। यथा आज्ञापयत्याचार्यः।)*

**मायावती** **:-** (सानन्दम्) **(४)** (संस्कृतमाश्रित्य) -

पद्यम् **(५)** **अन्तर्मग्नं विरहजलधेर्हन्त! मन्देतरस्य**
**प्रौढैर्दुःखव्यतिकरमयैः पन्नगैर्यन्त्रिताङ्गम्।**
**भक्तश्रेयः प्रकटकमठस्साधु वोढाक्षमाया**
**मादृक्षं त्वं जनमुदहरो[3] मन्दरागं क्षणेन।। ३३।।**

(इति सप्रश्रयं प्रणमति।)

---

३. अराणां = रेखानां, ग्रामः = समूहः तेन सहितस्सालग्रामः।

४. संस्कृताश्रयणं सन्तोषातिशयःकारणम्।

५. क्षमाया = भूमेः वोढा = भर्ता। भक्तानां देवादीनां श्रेयः प्रकटः। श्रेयोऽभिवृद्धिप्रकाशकः। कमठः = कूर्मरूपी भगवान्। मन्देतरस्य महतः जलधेः = क्षीराब्धेः अन्तर्मग्नं सर्पवेष्टितं मन्दरसंज्ञमगं पर्वतं यथा उज्जहार, तथा क्षमागुणधारी भजतां श्रेयः प्रकाशकः मठः = आश्रमस्थानं यस्य स सोमश्रवाः महतो विरहाब्धेरन्तर्मग्नं दुःखसम्पर्करूपसर्पैर्बद्धम् अमन्दरागम् = अधिकप्रियानुरागिणं मादृशं दीनं जनम् उद्धृतवान् इत्यर्थः।

---

1. M. Gr.1 तदेतन्निशम 2. M. Gr.1 आणवेदी 3. M. Gr.1 ज्वजंनमुदहरो

**सोमश्रवाः** **:-** (विहस्य) वत्से ! वयमपि किं स्तोतव्यकोटौ त्वया निधीयामहे। अलमक्षुण्णैरनात्मीयजनोचितै[1]रीदृशैरुपचारैः। अद्य पुनराशीरियमादीयतां भवत्या।

पद्यम् - **(६) उत्तुङ्गवंशविहिताभ्युदया सुवृत्ता**
**तत्तादृगद्भुतगुणा सुतरां विशुद्धा।**
**तेजस्विना मधुरमौक्तिकमालिकेव**
**त्वं नित्यसङ्गतिमवाप्नुहि नायकेन।। ३४।।**

वयं पुनस्सायाह्निकाय कर्मणे कपित्थारण्यमेव साधयिष्याम। (इति सह शिष्येण[2] निष्क्रान्तः।।)

**मायावती** **:-** हळा किं एद्ध इदो परं अम्हाणं अणंतरकरणिज्जकय्यानुगुणं[3] उज्जोअं करिस्सामो।
*(हला ! किमत्रेतः[4] परमस्माकम् अनन्तरकरणीयकार्यानुगुणमुद्योगं करिष्यामः।।*

(इति सह सखिभ्यां निष्क्रान्ता।)

**।। इति श्रीवेङ्कटाचार्ययज्वनः कृतिषु**
**प्रद्युमनान्दनाम्नि नाटके**
**द्वितीयोऽङ्कः।।**[5]

---

**६.** उत्तुङ्ग = उन्नतः। वंशो = वेणुः कुलं च। सुवृत्ता = वर्तुलाकारा। समीचीनचरित्रा च तत्तादृक्छब्दो व्याख्यातः। विशुद्धा = निर्मला। तेजस्विना = कान्तिमता नायकेन हारमध्यमणिना - भर्त्रा च।
**।। इति द्वितीयाङ्कः।।**

---

1. M. Gr.1 रनात्मजनोचितै-
2. M. Gr.1 इति शिष्येण सह
3. M. Gr.1 अणंतरकरणिंजकंजाणुउणं, T. Gr.1 अणंतरकरणिंजकंआनुगुणं
4. M. Gr.1 सखि कथमत्र इतः
5. My. Tel. Print.* **। द्वितीयाङ्कः।।** इत्येतावदेव अस्ति। पुष्पिकेयं नास्ति।

।। हरिः ओम्।।

# तृतीयोऽङ्कः

***(।। ततः प्रविशति मायावतीप्रयुक्ता माया।।)***

**माया** **:-** अज्ज खु तत्तहोदीए[1] माआवदीए अहं एव्वं पहिदम्हि। "जह मह वल्लहो पोक्खरार[2]ण्णभूसणस्स उब्बोहणसरस्स परिसरं परावडिस्सदि[3]। तह तु एकादव्वम्। अहं वि विरहतावावणोअणकदे[4] तदंतिअट्ठिदं विविह-कुसुमप्पसरंत[5]-मअरंदसीदलं कवित्थवणं उवगच्छिस्सं। तुमं तुण्णं गच्छ" - (इति)[6]।

*(अद्य खलु तत्र भवत्या मायावत्या अहमेवं प्रहिताऽस्मि[7]। "यथा मम वल्लभः पुष्करारण्यभूषणस्य उद्बोधनसरसः परिसरं परापतिष्यति। तथा त्वया कर्तव्यम्। अहमपि विरहतापापनोदनकृते तदन्तिकस्थितं विविधकुसुमप्रकर[8]प्रसरं मकरन्दशीतलं कपित्थारण्यमुप-गमिष्यामि[9], त्वं तूर्णं गच्छ!" - इति।)*

"ता मए को एद्ध[10] उवाओ करणिज्जो" *(तस्मान्मया कोऽत्रोपायः करणीयः?)*

(इति चिन्तामभिनीय सोत्साहम्)।

एव्वं एद्ध करिस्सं - "जह दाणिं दारुणसद्दूलरूपं कदुअदब्भअ महेसिणो आसमं[11] गदुअ मए तत्त जंतूणं खोहो कादव्वो। तदो आसम[12]क्खोहभीदेहिं मुणिंदेहिं मह वहकदे पत्थिदो[13] पज्जुण्णो मह पआइं[14] अणुसरिस्सदि। जावहि[15] तस्स लोअणगोअरो भविस्सं।

---

1. M. Gr.1 तत् भवदीए 2. M. Gr.1 पुंखरारं 3. M. Gr.1 परापडिंसदि 4. M. Gr.1 अणकिदे 5. M. Gr.1 परिसरंत, T. Gr.1 अरंपसरंत
6. M. Gr.1 तु तुंणं गंछेति 7. M. Gr.1 प्रहितोऽस्मि 8. M. Gr.1 प्रकर इति नास्ति।
9. M. Gr.1 किमपि वनमुपगच्छामि 10. M. Gr.1 अंथ 11. M. Gr.1 अंसमं
12. M. Gr.1 तदो अंसमं 13. M. Gr.1 **वहकदे पत्थिदो** इति स्थाने **वहकए** इत्येवास्ति।
14. M. Gr.1 **मह पआइं** इति स्थाने **मंएं वदावअणु** इति अस्ति। 15. M. Gr.1 जावहं

*(एवमत्र करिष्यामि। "यथा इदानीं [1] दारुणशार्दूलरूपं कृत्वा, दर्भकमहर्षेराश्रमं गत्वा, मया तत्र जन्तूनां क्षोभः कर्तव्यः। तत आश्रमक्षोभभीतैर्मुनीन्द्रैर्मम वधकृते* ***प्रार्थितः*** *[2]* ***प्रद्युम्नः*** *मम पदान्यनुसरिष्यति। यावद्धि तस्य[3] लोचनगोचरो भविष्यामि।)*

अह[4] उब्बोहणसरपरिसरं गदुअ तत्त तिरोहाणं पडिवज्जिस्सामि[5]। संपदं विलंबो ण कादव्वो।"

*(अथ उद्बोधनसरः[6] परिसरं गत्वा तत्र तिरोधानं प्रतिपत्स्ये।[7] साम्प्रतं विलम्बो न कर्तव्यः।")*

(इति सत्वरं निष्क्रान्ता।।)

**।। इति प्रवेशकः।।**

1. M. Gr.1 **इदानीं** इति नास्ति।
2. M. Gr.1 प्रार्थितः इति नास्ति।
3. M. Gr.1 मामेव तावदनुसरिष्यति यावदहं तस्य
4. M. Gr.1 अहं
5. M. Gr.1 पडिपंजिसामि।
6. M. Gr.1 सरसः
7. M. Gr.1 तिरोधानं प्रतिपत्स्यामि।

*(।। ततः प्रविशति तपोवनक्षोभसम्भ्रमोत्थितः प्रद्युम्नः ।।)*

**प्रद्युम्नः** **:-** (समन्तादवलोक्य साशङ्कम्) किमिदमिदानीम्।।

पद्यम् - **तरलयति[1] नस्त्रासोदञ्चल्लुलायपलायनं**
**चकितभुजगीफूत्कारोद्यच्छमूरुचमूरुजम्।**
**मुनिवनमभिक्रोशत्कीशाधिरोहतिरोहत[2]-**
**क्षितिजविटपोड्डीनभ्राम्यद्विचित्रपतत्रिकम्।। १।।**

(पार्श्वतोऽवलोक्य) अहो! केयं मरियादाऽतिलङ्घिनीपर्याकुलता तपोवनवासिनां जनानाम्। तथा हि-

**जवात्पश्चाद्धावज्जनचरणघातध्वनिभिरप्यमी**
**जाता शङ्का दशसु च दिशास्वर्पितदृशः।**
**करभ्रश्यत्पूजाकुसुमतुलसीवासितपथाः**
**पलायन्ते हन्त! प्रसभमृषयश्शुष्यदधराः।। २।।**

इतश्च- **निश्वस्य तूर्णमभितो निहितावलम्ब**
**यष्टि स्खलत्पदममीयमी नो जरार्ताः।**
**धावन्ति हन्त! विचलन् नलिनाक्षमालाः**
**सन्ताड्यमानवपुषश्लथचीरबन्धाः।। ३।।**

(इति कतिचित् पदानि गत्वा पुरोऽवलोक्य)

अहो! मामेवाभितः परापतन्ति सङ्घीभूय ससम्भ्रमं मुनयः। यदि मे तावदाश्रमक्षोमनिबन्धनं प्रष्टव्याः।।

*(।। प्रविश्य सम्भ्रान्ताः मुनयः ।।)*

**मुनयः** **:-** भो! भो! यदुवंशमुक्तामणे! महावीर![3] परित्रायस्व।। २।।

1. M. Gr.1 तरळयति 2. M. Gr.1 तोरोहित

3. T. Gr.1 महावीर इति स्थाने वीर इति अस्ति।

**प्रद्युम्नः** :- (सधैर्यम्) भो! भो! तत्रभवद्भिर्मा भेतव्यम्।।

पद्यम्- **जाग्रत्यहो! यदुकुलप्रभवे जनेऽस्मिन्**
**जायेत चेद्भयमिहाश्रममाश्रितानाम्।**
**धिङ्मेदिनीतलभरं मम देहमेतद्-**
**भारायितं भुजममुष्य भरं च चापम्।। ४।।**

अथ किं निबन्धनमत्र भवतामाकुलत्वे।

**मुनयः** :- राजन्! न दृष्टपूर्वोऽयं[1] दुष्टव्याघ्रः।।

**प्रद्युम्नः** :- (विहस्य) अविशङ्कमास्यातामत्र भवद्भिरीशत्करमेतन्निरशनम्[2] (इति द्रुततरं परिक्रम्यावलोक्य, सप्रत्यभिज्ञम्।) स एवायमाश्रमक्षोभहेतुश्शार्दूलः। ब्राह्मणैः खलु भेतव्य-मेतस्मादतिभीषणवेषात् तथा हि-

पद्यम्- **कल्पान्तदारुणकृतान्तकरालवक्त्र-**
**दंष्ट्रा शितांचलखरान्नखरान् वहद्भिः।**
**पादैरयं भयमभिप्रथयन् जनानां[3]**
**शार्दूलकश्चरति निर्दयमत्र दृप्तः।। ५।।**

अतश्च[4] **(१)वनभूसुरभीकरणक्षमं कबन्धैकसापेक्षम्।**
**नेष्यामि पुण्डरीकं सुशोभ नक्षत्रपतिरहं शोषम्।। ६।।**

(इति शरं धनुषि सन्धाय, द्रुततरमुपसृत्य) हन्त! प्राणपातभिया बाणपातानुगुणं प्रदेशमतीत्य पलायते शार्दूलः।।

---

१. **टीका :-** वनभुवः = अरण्यभूमेः। सुरभीकरणे = परिमलीकरणे। क्षमं = शक्तम्। कबन्धे = उदके। एकस्मिन् अपेक्षासहितम्। पुण्डरीकम् = सिताम्भोजम्। सुशोभः = शोभनकान्तिः। नक्षत्राणां = ताराणाम् पतिश्चन्द्रोऽहं शोषम् = म्लानिं प्रापयिष्यामीत्यप्रकृतार्थः। वने सतां भूसुराणां = ब्राह्मणानाम्। भीकरणे = भयोत्पादने। क्षमम् = शक्तम्। कबन्धे = अपमूर्धकलेबरे। एकस्मिन्नपेक्षासहितम्। पुण्डरीकम् = व्याघ्रम्। सुशोभनः = अतिसमीचीनः। छत्रपतिः = राजन्यश्रेष्ठोऽहम् शोषम् = नाशं प्रापयिष्यामीति प्रकृतार्थः।।

---

1. M. Gr.1 दुष्टपूर्वो
2. M. Gr.1 न्नरसनम्
3. M. Gr.1 भयमतिप्रथयन् प्रजानां
4. M. Gr.1 अत्र च

पद्यम्- **संरब्धे मयि सहसा गृहीतचापे**
**सक्रोधं दिशति[1] दृशौ विवृत्तकण्ठः।**
**नेदीयान् क्षणमथ च क्षणं दवीयान्**
**व्याघ्रो मां वनभुवि कर्षतीव दूरम्।। ७।।**

(समन्तादवलोक्य) अमुना खल्वरण्यादरण्यमाकर्षता कदाचिदप्यदृष्टचराणि सुकृतिभिरेव कृतसेवनानि वनानि मम लोचनगोचरतामानीतानि।। (सश्लाघम्)

पद्यम्- (२) **अभ्रंलिहैर्हस्तवृतानि[2] सालै-**
**रवाप्तशोभानि च पद्मिनीभिः।**
**उत्तुङ्गभूभृद्भिरुपाश्रितानि**
**मन्ये पुराण्येव महावनानि।। ८।।**

(इति कतिचित् पदानि गत्वा, पुरोऽवलोक्य)

**प्रच्छन्नस्तु लतावितानकुहरे भूयोऽपि दृग्गोचरो**
**विद्राति स्वयमाशु हन्त! हरिणान् विद्रावयन्नध्वनि।**
**दृप्तोऽयं सविधे चरन्निव पुनर्दूरे दरीदृश्यते**
**भ्रान्तिं नस्तनुते तदेतदधुना शार्दूलविक्रीडितम्।। ९।।**

(इति कस्यचित्तरोश्छायां समासाद्य)

अहो! बहोररण्यदेशस्याक्रमणात् परिश्रान्त इव सरः प्रान्तमुपसरति शार्दूलः। तदस्माकं तदनुसरणश्रान्तानामनुगुणमेव। (इति सरःपरिसरमुपसरन्नग्रतोऽवलोक्य, सविस्मयम्)

हन्त! कथमन्तर्हितमेव मुनिमण्डलधैर्यखण्डनपण्डितेन पुण्डरीकेण। अस्तु तावदमुष्य दारणदूरोत्सारणयोरन्यतरदेव महर्षिभिरभिलषितम्। (पुनस्सवितर्कम्)[3] -

---

२. अभ्रंलिहैः = अन्तरिक्षगामिभिः। सालैः = वृक्षैः। प्राकारैश्च वृतानि। पद्मनीभिः = कमललताभिः तज्जातिस्त्रीभिश्च प्राप्तकान्तीनि। उत्तुङ्गभूभृद्भिः = उन्नतपर्वतैः उत्तमप्रभुभिश्च उपाश्रितानि। महारण्यानि पुराण्येव मन्ये इत्यर्थः।।

---

1. M. Gr.1 संक्रोधन्दिशति  2. M. Gr.1 हॅन्त! वृतानि  3. M. Gr.1 (पुनस्सतर्क्कम्)

पद्यम्- **केनापि चोदितेयं कापि ममाकर्षणाय किं माया।**
**तर्क्कयति हृदयमित्थं तर्हि तमन्तर्हितं दृष्ट्वा।। १०।।**

तत्प्रसभं विवासयता विधिना फलवदरण्यमेव प्रापितमिति हृष्यामि। यन्मया कञ्चन पुण्डरीकमनुधावता काञ्चनपुण्डरीकपरिमण्डितं महदिदमत्यद्भुतं तीर्थमासादितमि-त्यवतीर्य सरस्तीर्थं नाटितकेन।

पद्यम् - **प्रचलितकलहंसीपक्षविक्षेपवेग-**
**प्रभवपवनचञ्चत्काञ्चनाम्भोजवातैः।**
**मधुरमधुरसौघैर्मांसळस्वादुतोयं**
**दिशति सर इदं मे चक्षुषोर्दीर्घमायुः[1]।। ११।।**

तदस्यैवोदकेन कान्तारभ्रमणतापमपनेष्यामि (इति तदीयं विमलकमलपरिमळ-सुरभिळमुदकमास्वाद्य मुहूर्तमिव ध्यायन्नुत्थाय, सानुस्मरणरोमाञ्चम्।)

हन्त! रतेरधरसुधारसास्वादमहोत्सवमनुस्मारयत्येतदीयं पयः। ततश्च नूनं भवान्तरीय-वृत्तान्तानुस्मरणमहौषधं तदिदमुदकमिति तर्कयामि। यदिदानीम्।

पद्यम्- **रोमाञ्चकर्कशरतिस्तनशातकुम्भ-**
**कुम्भोपमर्दि[2]परिरम्भणसम्भ्रमाणि।**
**तानि प्रसूनधनुषो मम ताण्डवानि**
**चेतस्स्वयं स्मरति हन्त! चिराय भूयः।। १२।।**

(पुनर्निध्याय सविषादनिर्वेदम्[3])

सविप्रतिसारं च - हा हतोऽस्मि महता प्रमादेन। तथा हि-

पद्यम्- **अयत्नलब्धामणुमध्यमां तां**
**त्यजन् भ्रमाद्दैवहतोऽस्मि मूर्खः।**
**अनर्घमप्यन्तिकवर्तिरत्न-**
**मङ्गारमोहादिव मन्दभाग्यः।। १३।।**

---

1. M. Gr.1 चक्षुषोर्दीर्घमायुः 2. M. Gr.1 कुम्भोपमर्द्दि 3. M. Gr.1 सविषादं

(सानुस्मरणकौतुकम्)

पद्यम्- **हर्षेण स्तिमितं स्मरेण मसृणं ह्रीणं प्रतिक्षेपणे**
**प्रौढोन्मादजडं ततश्च तरलं पश्चान्मिळञ्चापलम्।**
**प्रोदञ्चद्भयमूर्च्छितं पुनरपि स्तोकस्मितालिङ्गितं**
**तन्वङ्ग्याः किमपि स्मरामि मधुरं तत्तादृगालोकितम्।। १४।।**

(पुनर्विचिन्त्य सरोमाञ्चम्)

पद्यम्- **आदौ मे समवेक्ष्य विस्मयवशादाकस्मिकीमागतिं**
**सान्द्रानन्दविशेषसम्भ्रमभरस्वैरोच्चलत्कुण्डलम्।**
**तन्वङ्ग्या यदपाङ्गितं सुरभिळं तादात्विकैस्सात्त्विकै-**
**स्तन्मे हन्त! चिराय खेलति तरामद्यापि (३) हृद्यादृते।। १५।।**

किञ्च- **वेलालङ्घिविशृङ्खलस्मरमदक्रीडा[1]समाजोन्मिष-**
**द्यातायातशुभावलोकमधुरस्मेराननं सुभ्रुवः।**
**उद्यत्स्वेदकपोलमङ्गमुदयद्रोमाञ्चवेधश्लथ-**
**प्रोदञ्चत्कुचकञ्चुकं तदधुनाऽप्यास्ते दृशोरग्रतः।। १६।।**

(पुनःक्षणमनुचिन्त्य सानुतापम्)

पद्यम्- **अनुचितमसौ स्वीया नो वेत्यहो! मयि संशयं**
**कृतवति तदा रोषादा[2]पाटलत्वमुपेयुषीम्।**
**प्रसभमुदयद्बाष्पां शोकाद्भयादतिविह्वलां**
**दृशमकृतयत्तन्वी तन्मे धुनोति मनोऽधुना।। १७।।**

अपि च- **दृष्ट्वा मुक्तदयं मदीयहृदयं दीर्घं श्वसत्युच्चकै-**
**रुत्तिष्ठेति सखीजनेन रभसादुक्ताऽपि कृच्छ्रेण सा।**
**उत्थायाथ पुनर्विलम्ब्य शनकैरुर्वीं लिखन्ती पदा**
**दीनां दृष्टिमधत्त यन्मयि खले तन्मे मनः कृन्तति।। १८।।**

---

**३.** हृदि आदृत इति च्छेदः।

---

1. M. Gr.1 व्रीळा    2. M. Gr.1 कोपादा

(पुनस्सानुस्मरणविस्मयम्)

**कमलसुरभिस्मेरं कर्णान्तकाञ्चनकुण्डल-**
**स्तबकमघवन्नीलाकारस्फुरन्नयनप्रभम्।**
**व्यवहितमपि श्लाघ्यं तस्या मुखं मुहुरद्भुतं**
**व्यसनमलिने चित्तादर्शे मम प्रतिबिम्बितम्।। १९।।**

हन्ताधुना कान्ताविरहसन्तापातिशयनिबन्धनावेदनाविलङ्घ्यते वेलाम्। तथा हि-

पद्यम्- **चेतः कष्टं चिन्तया दह्यते मे**
**वक्त्रं घर्मश्वासवातोद्गमेन।**
**कामेनाङ्गं कामवस्थां न कुर्यात्**
**प्राचीनानां पाप्मनां दुर्विपाकः।। २०।।**

अद्य किल व्यसनैरिव किरणैरपि विलङ्घ्यते मर्यादा। यतः-

पद्यम्- **चक्षुर्निमेषविगमेऽपि न मे गृहीतुं**
**शक्नोति हन्त! विषयानपि सन्निकृष्टान्।**
**देशे दवीयसि चिरादपि वर्तमानां**
**तामेव किन्तु परिपश्यति सर्वतोऽपि।। २१।।**

(पुनस्सन्तापातिशयमभिनीय)

**रोधः प्रत्युप्तचन्द्रोपलगळदमृतस्रोतसा मांसलापं**
**गर्भोदञ्चन्मृगाङ्कव्यतिकरशिशिरं गाहमानस्सुधाब्धिम्।**
**अश्रान्तं चेत्सुधाभ्र[1]प्रसृमरकरकास्वादशीताळुजिह्वोऽ-**
**प्येतामार्तिं न जह्यां तदपि तदधरास्वादनैकापनोद्याम्।। २२।।**

(पुनश्च क्षणं निध्याय[2] विधिं प्रति)

**पुराणसुकृतोदयोपनतयोगयोरेकदा**
**मिथस्सरसचेष्टितैर्मिळितभावयोरावयोः।**
**कथञ्चिदपि सङ्गमं कमपि हन्त! कृत्वा भ्रमं**
**बलाद्विघटयन् विधे! चिरतरं भवान् जीवतु।। २३।।**

1. M. Gr.1 चेत्सुधाब्द 2. M. Gr.1 विध्याय

(पुनस्सविषादकोपम्)

**वदने वनितां वहन् विधे! कलयात्मानमिवापरं जनम्।**
**अथवा तव नाभिजातता प्रथिता नूनमुदाहृता मयि।। २४।।**

किञ्च- **विधे! परुषता निधे विदयमेवमन्तर्दहन्**
**त्वया विरचितः प्रियाविरहशोकदावानलः।**
**पुरा किल पुरारिणा मयि निरागसि[1] प्रेषिता-**
**न्नितान्तमतिरिच्यते निटिलनेत्रकालानलात्।। २५।।**

(विधिचन्द्रमसावुद्दिश्य)

पद्यम् **(४)** **विधौ परं विमलसरोरुहासने**
**सुशोभनाभ्युदयविशेषपूजिते।**
**न मादृशव्यसनविधायितोचिता**
**सुशीतले कुवलयसम्मते त्वयि।। २६।।**

(विशेषदर्शनमभिनीय)

अथवा किमेतस्य छन्दोबृन्दाभ्यासव्यासङ्गविपर्यस्तान्यकार्यव्यापारस्य विधातुरुपालम्भेन। तामेव प्राणदयितां तत इतः काननेऽस्मिन् विचेष्यामि।

(इति विरहज्वरोन्मत्तः किञ्चिदन्तरमुपसृत्यावलोक्य)

अयं किल सकलवनलताकुञ्जसञ्चारपरश्चञ्चरीक एव तावदावेदयिष्यति मे प्रियोदन्तम्। तदेनमेव पृच्छामि - (इति द्रुततरं परिक्रम्य)

४. विमलसरोरुहमासनं पीठं यस्य विधेः। विमलानां सरोरुहाणां कमलानामासनः निरासकः म्लानिदो विधुश्चन्द्रः। सुशोभायां भगवन्नाभावभ्युदयेन सुशोभनेन समीचीनेनाभ्युदयेनाविर्भावेण च कुवलयस्य = भूमण्डलस्य, कुवलयानां = नीलोत्पलानां सम्मत इष्ट इति चार्थः।।

1. M. Gr.1 दुरागसि

पद्यम्- **सद्यस्तनस्तबकसम्भृतदिव्यशोभा**
**सा चञ्चरीकसुकुमारकृशाङ्गयष्टिः।**
**दृष्टा किमद्भुतलता भवता वनेऽस्मिन्**
**धत्ते मधून्यधरपल्लवमेव[1] यस्याः।। २७।।**

(पुनस्सरोमाञ्चं सोत्कण्ठं च)

**प्रसभमबलायान्तं बिम्बाधरामृततृष्णया**
**भ्रमर! पुरतस्त्वां पश्यन्ती स्वतो भयविह्वला[2]।**
**मुखरवलयं धूत्वा धूत्वा करौ मुकुळेक्षणं**
**सुभगरशनाघोषं सा मां कदा परिरप्स्यते।। २८।।**

अये मधुकर! कथमधन्योऽसि त्वमप्यहमिव मन्दभाग्यः। यतः- स्थितेऽपि मृदुलतर-निश्वसितपरिमळसुरभिळे तस्या मुखकमले प्रतिलतिकाकुसुमरसास्वादलम्पटः पर्यटसि। यद्वा-

पद्यम्- **म्लानं विलोक्य विरहज्वलनेन तस्या-**
**श्श्वासानिलोष्मभरदुस्सहमाननाब्जम्।**
**गायन् मिळिन्द! किमपि प्रति वल्लिगेहं**
**मन्ये चिरादटसि[3] हन्त! मरन्दभिक्षाम्।। २९।।**

हन्त! सकरुणमामन्त्रयमाणमपि[4] मामनादृत्यैव[5] गच्छतीन्दिन्दिरस्सान्द्रमकरन्द-रसपुञ्जं किमपि लताकुञ्जम्। अथवा-

पद्यम् **(५)** **मधु निपीय परिभ्रमतो वने, मदजुषस्सततं मलिनात्मनः।**
**सुमनसां मधनैरुदरम्भरे-र्भ्रमर! कस्य परोपकृतिः कुतः।। ३०।।**

---

५. मधु मध्ये पुष्परस इत्यमरः। सुमनसां = विदुषां पुष्पाणां च।

---

1. My. Tel. Print. & T. Gr.1 पल्लव एव
2. My. Tel. Print. & T. Gr.1 स्वयं मदविह्वला
3. M. Gr.1 चिरायसि च
4. M. Gr.1 मामन्त्रियमाणमपि
5. M. Gr.1 मामनादृत्य

(इत्यन्यतः परिक्रम्यावलोक्य सानन्दम्)

पद्यम्- **इह सहकारोद्देशे विहरन्त्यास्साकमाळीभिः।**
**उन्मिषति श्रुतिसुभगो बाला या नूनमालापः।। ३१।।**

तदिहैव स्थित्वा[1] तप्तान्यङ्गानि दयितास्तनकलशशीतलिम्ना सुखयिष्यामि -

(इति सोत्कण्ठं सहकारतरुसविधमुपसरन्निपुणं निरूप्य सनिर्वेदम्)

इह किल बालरसालमृदुलकिसलयसमास्वादमाद्यत्कलकण्ठकण्ठकुहरसमुदञ्चितेन पञ्चमेन बत![2] वञ्चितोऽस्मि। अस्तु तावदमुमेव कलकण्ठं कम्बुकण्ठीवृत्तान्तं प्रत्यनुयोक्ष्ये[3]।।

पद्यम्- **कलकण्ठपोतभवता महीरुहा-**
**मुपकण्ठभूमिषु चिरेण खेलता।**
**विरहामयव्यसनिनी[4] विलोकिता**
**मम देवता किमिह मञ्जुभाषिणी।। ३२।।**

(पुनस्सवितर्कम्)

पद्यम्- **भ्रातः! कोकिल! सा किल प्रणयिनी प्राप्तावनं त्वामहो**
**कल्याणीं गिरमङ्गकामपि नभो मध्या किमध्यापयत्[5]।**
**नोचेदित्थमिदं विदग्धमहितं सङ्गीतमेतादृशं**
**कूजत्काकसमाजदूषितभवत्कण्ठात् कथं जृम्भताम्।। ३३।।**

(इति क्षणमवस्थाय साशङ्कम्)

पद्यम्- **विरुतेन विवृण्वतानि तां तं**
**पथिकानामधिकान्यभावुकानि।**
**अयमत्र पिकः प्रवर्तयिष्य-**
**त्यनुसन्धानमनङ्गमङ्गळानाम्।। ३४।।**

---

1. M. Gr.1 गत्वा
2. M. Gr.1 तव
3. T. Gr.1 प्रत्यनुयोत्स्ये।
4. T. Gr.1 विरहामयव्ययसिनिनी
5. My. Tel. Print. & T. Gr.1 किमध्यापिपत्

(पुनस्सकोपाटोपम्) अरे! परभृत! हतक! कथमभ्यर्णे वर्णयन्तमपि मामनादृत्य प्रत्युत कर्णज्वरमेव[1] कमपि नादमुदञ्चयसि।। अथवा-

पद्यम्- **पान्थानां दशमदशां प्रदिशति तव पञ्चमो यतः प्रसभम्।**
**तत् पिक! सत्यं मृत्युर्धावति पञ्चम इति श्रुतिर्ब्रूते।। ३५।।**

(क्षणं विमृश्य सधैर्यावष्टम्भम्)

पद्यम् **(६)** **पिकद्रोहिन् देहि व्यसनमुदयत्पञ्चम रुतः**
**स्वतः प्राणात्मानो विजहतु तनुं पञ्चम रुतः।**
**अतोऽप्यन्यत्कर्तुं प्रभवसि किमङ्गीकृतमृति-**
**र्जनः प्रायो जानुद्वयसमिह जानाति जलधिम्।। ३६।।**

(पुनस्सखेदम्) अशक्यमितःपरमत्रावस्थातुम्। तथा हि-

**किमपि कुरुते कामः किञ्चैष सम्प्रति पञ्चमः**
**स्फुटमुपवनाभ्यर्णात् कर्णापमृत्युरुदञ्चति।**
**मलयनिलयैर्वातैरेतष्टलाद[2]भिवर्धिता दहति**
**महती ज्वाला माला वियोगदवाग्निजा।। ३७।।**

(इत्यन्यतो गत्वा, पुरो निर्वर्ण्य) अत्र हि-

पद्यम्- **प्रायस्सुमोद्गमसमुत्सुकसारसाक्षी**
**पादाम्बुजप्रणयियावकसारसाक्षी।**
**तन्वीं स एष कथयिष्यति तामशोक-**
**स्तद्वद्भवेयमचिरादहमप्यशोकः[3]।। ३८।।**

(इति सविधमुपसृत्य, साभ्यर्थनम्)

**अद्राक्षीर्यदि मुग्धाक्षीमशोक! कथयाधुना।**
**फलं तव प्रसूनानां यस्याश्श्रवणमण्डनम्।। ३९।।**

**६.** सञ्चेवाणिकि समुद्रं मोकाळ्ळपोडुगु (సచ్చేవాణికి సముద్రం మోకాళ్ళ పొడుగు) - इत्यान्ध्रभाषागाथा।

1. M. Gr.1 प्रत्युत्कीर्णज्वरमेव 2. M. Gr.1 रेतैर्बलाद 3. M. Gr.1 महमप्यचिरादशोकः

(क्षणमवस्थाय निपुणमालोक्य)

पद्यम्- **कोपरक्तयमनेत्रगोळक-स्मारकाः परमशोककोरकाः।**
**अङ्गनाविरहतापशुष्मणा-माचरन्ति मुहुराज्यसेचनम्।। ४०।।**

(इत्यन्यतो गच्छन् दूरतो दृष्टिं प्रसार्य सानुरागं सहर्षं च)

पद्यम्- **दिष्ट्या सम्प्रति तर्कयामि नियतं देवः प्रसादोन्मुख-**
**सान्द्रानन्दसुधाभिरेष दहनश्शान्तश्चिरादान्तरः।**
**चारुस्मेरमुखी चकास्ति पुरतश्चाटूक्तिपूर्वं[1] शनै-**
**रार्तं मामबलाचलाङ्गुलिदळैराकारयन्ती यतः।। ४१।।**

(इति सतृष्णं द्रुततरमुपसृत्य सखेदम्-)

हन्त! भ्रान्तमित्थमस्मदन्तःकरणेन तदेकचिन्तामसृणेन यद्धि मनसा ध्यायति तच्चक्षुषा पश्यति वाचा वदति च। तथा हि[2]-

पद्यम्- **वसति पुरतो वासन्तीयं लता दयिता न मे**
**नवसुमनसां लक्ष्मीरेषा न तु स्मितचन्द्रिका।**
**समदमधुपालापस्सोऽयं न तच्चटुभाषितं**
**स तु[3] किसलयस्पन्दो नेदं तदङ्गुळिचेष्टितम्।। ४२।।**

(इति श्रान्तश्चम्पकतरुविटपमवष्टभ्य, क्षणमनुध्यायन्नखाग्रैर्नयनसलिल[4]मपनयन्नसह्यं मन्दगन्ध-वहस्पर्शमभिनीय)

पद्यम्- **प्रायेण पञ्चममुखैः परिभूयमानः**
**पापीयसा च पवनेन विदह्यमानः।**
**कालं कियन्तमयि! ते दयिते! वियोग-**
**कालानलं कमपि तन्वि! सहेय कष्टम्।। ४३।।**

(इति दीर्घमुष्णञ्च निश्वस्य पुनस्सबाष्पदृष्टिस्तिष्ठति।)

---

1. M. Gr.1 पुरतो चाटूक्तिपूर्वं
2. M. Gr.1 तथा हि इति नास्ति।
3. M. Gr.1 तनु
4. M. Gr.1 नयनजल

***(।। नेपथ्ये।।)***

पद्यम् **ताव किसाणुकिसा मे तणू जहत्थाहिहा[1] हळा! तह वि।**
**पिअदम-संगम-मंगळपच्चासाए कहं वि जीवामि।। ४४।।**

***(तावत्कृशानुकृशा मे तनुर्यथार्थाभिधा हळा! तथापि।***
***प्रियतमसङ्गमङ्गळप्रत्याशया कथमपि जीवामि।। ४४।।)***

**प्रद्युम्नः** **:-** (सादरमाकर्ण्य सपुलकोन्मेषम्)

हन्तेदानीमसत्साधननिबन्धनाप्यवगतिरबाधितविषयतया प्रतिपद्यते प्रमाणपदवीम्। यतः- इह दक्षिणेन कदळीकदम्बकं माधवीमण्डपादुदञ्चितस्तस्या मधुरालापस्सुखयति श्रवणयुगळम्। अथवा किमेतदपि मम भ्रमविजृम्भितमेव स्यात्।

(इति क्षणमालोच्य, मुष्टीकृतं सव्यहस्तं दक्षिणेन करतलेनास्फाल्य सवितर्कम्) नूनम्[2]-

पद्यम्- **मधुरालापैरेभिस्तस्या वदनादुदञ्चितैर्भाव्यम्।**
**कथमन्यतः पिकानां कण्ठादभिजातपञ्चमोद्भेदः।। ४५।।**

अपि चैवमनुमिनोमि-

पद्यम्- **मधुरमधुरसार्द्रे माधवीमण्डपेऽस्मिन्**
**वसति सह सखीभ्यां वल्लभा सैव नूनम्।**
**विरहदहनतापादव्यक्तमालिङ्गिताना-**
**मिह किल कदळीनामीक्ष्यते म्लानिरेवम्।। ४६।।**

अतो द्रुततरमस्यैव माधवीमण्डपस्योपकण्ठमासाद्य तदभ्यर्णरम्भास्तम्भान्तरितस्सविस्रम्भमस्यास्सल्लापादिकमाकलयिष्यामीति तथा करोति।

---

1. M. Gr.1 जहत्थाबिहा 2. M. Gr.1 **नूनम्** इति नास्ति।

***(।। ततः प्रविशति तापातुरा सखीभ्यामाश्वास्यमाना मायावती।।)***

**मायावती** **:-** हळा! अज्ज खु मज्झ हिअअमज्झप्परूढो वसण[1]विसद्दुमो तुम्हाहिं[2] दिण्णेहिं अणप्पकप्पूरसक्कदसलिलेहिं साहोपसाही होदि[3]।।

*(हळा! अद्य खलु मम हृदयमध्यप्ररूढः व्यसनविषद्रुमो युवाभ्यां दत्तैरनल्पकर्पूर-संस्कृत[4]सलिलैश्शाखोपशाखी भवति।)*

**सख्यौ** **:-** सहि! सहसु।। २।। *(सखि! सहस्व।। २।।)*

**प्रद्युम्नः** **:-** (स्वगतम्)

पद्यम्- **प्रत्यूषशीतकरपाण्डरगण्डभागं**
**निद्राविघातनिबिडीकृतनेत्ररागम्।**
**अस्या मुखाब्जमवलोकयतो ममाभू-**
**दानन्दमोहभयशोकयुगन्तरात्मा।। ४७।।**

किञ्च- **परिणतसितकैतकप्रभाश्वसितगतागतनर्तितस्तनी।**
**तनुतनुरतनुज्वरातुरा मम हि दुनोति मनो धिनोति च।। ४८।।**

**मायावती** **:-** (दीर्घं निश्वस्य सदैन्यम् संस्कृतमाश्रित्य) **(७)**

पद्यम्- **पाशैर्बद्ध्वा पुनरभिमतप्रेक्षणाशापदेशैः**
**कामव्याळाननकबळिते तापकालाग्निभीमे।**
**दुस्थे दुःखैरपि बहुविधैर्देहकारागृहेऽस्मिन्**
**निक्षिप्यैवं व्यधयति विधिर्निर्यियासून् ममासून्।। ४९।।**

**प्रद्युम्नः** **:-** (आत्मगतम्) (अवितथमाह-) देवी! अद्य खलु दूरे वसतेऽपि हि मह्यमसह्यविरह-सन्तापातिशयमस्याः पिशुनयन्ति भूषणान्येव[5]। तथा हि-

---

**७.** शोकातिशयेन माहात्म्यपरिभ्रंशाद्भाषाव्यतिक्रमः।।

---

1. M. Gr.1 वसरण 2. M. Gr.1 तुंहेहिं 3. M. Gr.1 कअसलिलेहिं साहोव साही होदि
4. M. Gr.1 संगत 5. M. Gr.1 भुषणान्येव

पद्यम्- **हारेणाकलितो विपाण्डर[1]तनुच्छायाभिभूतश्रिया**
**क्षामाङ्ग्या विवृणोति कामपि परामुष्णोद्गतिं कृष्णिमा[2]।**
**अश्रान्तोदितलास्यकेळिरतनुश्वासांश्च नासामणिः**
**कार्श्यं चेत्करयोरमङ्गळभिया कृच्छ्राद्धृते कङ्कणे।। ५०।।**

**सख्यौ** :- सहि! बहुकालसहिदं वि एदं पिअविरहं क्षणमेत्तं सहिदुमसक्कंती किंति एव्वं विलपसि[3]। *(सखि! बहुकालसोढमप्येतं[4] प्रियविरहं क्षणमात्रं सोढुम्[5] शक्नुवन्ती किमित्येवं विलपसि।)*

**मायावती** :- खणमेत्तंति कुदो तुम्हेहिं उवलद्धम्।*(क्षणमात्रमिति कुतो युवाभ्यामुपलब्धम्।)*

**विचक्षणा** :- किं[6] विम्हरिदासि तुए एव्व कदं[7] उवाअं। *(किं विस्मृतवत्यसि[8] त्वयैव कृतमुपायम्।)*

**मायावती** :- तह वि मह मन्दभाआए[9] कहं विअ तारिसो ऊसवो सिज्झिज्झन्ति[10] संकाअंको मंअच्चत्थं बाहदि। एदारिसे[11] समए तुमं किंति जोसं वट्टसि। एद्ध वणे उण सो गवेसणिज्जो।

*(तथापि मम मन्दभाग्यायाः कथमिव तादृश उत्सवस्सिद्ध्यतीति[12] शङ्कातंको मामत्यर्थं बाधते। एतादृशे समये त्वं किमिति जोषं वर्तसे। अत्र वने पुनस्स गवेषणीयः[13]।)*

**विचक्षणा** :- तह होदु।। *(तथा भवतु।)*

**मायावती** :- (सप्रेमकोपं संस्कृतमाश्रित्य[14])

**उद्वेलैर्विरहानलैरतितरामुन्मस्तके संज्वरे प्राप्ते**
**चेतसि पारवश्यमसुषु स्वैरं प्रतिष्ठासुषु।**
**अद्यानाचरितेन किं सखि! फलं केनापि यत्नेन**
**ते किं शुष्के सलिलैर्द्रुमे किमपि वा तोये गते सेतुना।। ५१।।**

1. M. Gr.1 कलितो व्विपाण्डर 2. My. Tel. Print कृष्टिमा 3. M. Gr.1 विलवसि
4. M. Gr.1 बहुकालसहितमपि एतं 5. M. Gr.1 सहितुम् अशक्नुवन्ती 6. M. Gr.1 किं इति नास्ति।
7. M. Gr.1 किदं 8. M. Gr.1 विस्मरिता असि 9. M. Gr.1 मन्दभंगाए
10. M. Gr.1 सिंझंजंति 11. M. Gr.1 बाहइ। एआरिसे
12. M. Gr.1 तादृशो उत्सवो सिद्ध्यतीति 13. M. Gr.1 गवेषणीय्यः 14. M. Gr.1 संस्कृतमाशृत्य

**विचक्षणा** :- एव्वं एव एदं *(एवमेवैतत्।)*

(इति सरभसमुत्थाय गौळीवचनं सूचयित्वा पुनरुपविशति।)

**मायावती** :- (निर्वर्ण्य साङ्कम्) किं सहि! ण गदासि[1]। *(किं सखि! न गतासि ?)*

**विचक्षणा** :- गोळी[2]वअणादो। *(गौळीवचनात्।)*

**मायावती** :- किं कहेदि सा। *(किं कथयति सा ?)*

**विचक्षणा** :- एद्ध एव्व वणे[3] आगदुअ गुत्तं तुह पिअदमम्।। *(अत्रैव वने आगत्य गुप्तं तव प्रियतमम्।)*

**मायावती** :- एदं सहि! सच्चं होदु।[4] *(एतत् सखि! सत्यं भवतु।[5])*

**प्रद्युम्नः** :- (स्वगतम्) मया पुनरिहैवमितःपरमवस्थातुं न युज्यते च। तथा हि-

पद्यम्- **अस्याः कुन्तलगन्धवर्षिपवनैरामोदिता नासिका**
**चक्षुस्सौष्ठवदर्शनेन चटुभिश्श्रोत्रे च वाचां क्रमैः।**
**अद्य त्वग्रसने मनस्त्वरयतस्सेर्ष्ये इवोत्कण्ठिते**
**गाढाश्लेषसुखाय काममधरास्वादप्रमोदाय च।। ५२।।**

**मायावती** :- सहि! साहु सुहोदक्कं एव्व कहेदि गोळी। तहवि फलन्ति विफलन्ति चेति लोअप्पवादो मह संस अंकरेदि[6]।

*(सखि! साधु शुभोदर्कमेव[7] कथयति गौळी। तथापि फलन्ति न फलन्ति चेति[8] लोकवादो मम शङ्कामङ्कुरयति[9]।)*

---

1. M. Gr.1 किंति सहि ण गआसि
2. M. Gr.1 गौळी
3. M. Gr.1 एंधवण एंव
4. M. Gr.1 सहि एदं संचं होदु।
5. M. Gr.1 **मायावती** :- किं सखि! न गतासि ? तः ........
   **मायावती** :- एतत् सखि! सत्यं भवतु। — पर्यन्तं छाया नास्ति।
   T. Gr.1 ***मायावती*** **:- एतत् सखि सत्यं भवतु।** इत्येतावत् छाया नास्ति।
6. M. Gr.1 चेंति लोअवादो मह संकंअं कुरेइ।
7. M. Gr.1 सुखोदर्कमेव
8. M. Gr.1 तथापि फलति विफलति चेति
9. M. Gr.1 लोकप्रवादस्संशयं करोति।

**प्रद्युम्नः** :- (सानुरागानन्दम्)

पद्यम्- **(८) पुरस्तन[1]तटस्थेमभासुरा पाण्डराकृतिः।**
**विनेष्यति रसैस्तापमसौ सुरतरङ्गिणी[2]।। ५३।।**

(इति रम्भास्तम्भावरणादुत्थाय माधवीमण्डपं प्रविशति।)

**विचक्षणा** :- (ससम्भ्रमं निर्वर्ण्य) हळा! माआवदि![3] उच्चिट्ठ।। २।। फलिदं तुह मणोरहाणोअहेण। *(हळा![4] मायावति! उत्तिष्ठ।। २।। फलितं तव मनोरथानोकहेन।)*

(इति हस्तं दत्ते।)

**मायावती** :- (सखीहस्तमवलम्ब्य ससम्भ्रममुत्तिष्ठन्ती पुरतः प्रियतमं निर्वर्ण्य स्तम्भं नाटयति।)

**विचक्षणा** :- (सोपचारम्) राअउत्त! अज्ज खु सुप्पहादमम्हाणं। *(राजपुत्राद्य खलु सुप्रभातमस्माकम्![5])*

**प्रद्युम्नः** :- (अवनतमुखो लज्जां नाटयित्वा) अयि! विचक्षणे! सम्प्रति किमहमभिदध्याम्?

पद्यम्- **सदृशं सङ्गिरमाणायां प्रति वितथाभिधानमलिनाऽभूत्**
**तस्या एव तवाग्रे जिह्रेति कथं न जल्पितुं जिह्वा।**
**तथापि प्रियायाः प्रतिवचनसुधारसपानलोलुपं**
**श्रवणयुगळं त्वरयति व्रीडा जडामपि रसनाम्।। ५४।।**

(इति सानुरागं मायावतीं प्रति)-

पद्यम्- **अशुभतिमिरभङ्गादद्य मे सुप्रभातं**
**दिशति फलमभीष्टं देवता सुप्रसन्ना।**
**कमलमुखिवियोगक्लेशनिर्निद्रयोर्मे**
**विरचयसि यदक्ष्णोर्व्यक्तमानन्दवर्षम्।। ५५।।**

---

८. पुरोभवं यत्तटं तस्य स्थेम्ना = स्थिरत्वेन। पुरोग्रे स्तनतटयोः = कुचप्रदेशयोः, स्थेम्ना = स्थिरत्वेन काठिन्येनेति यावत्। सुरतरङ्गिणी = देवगङ्गा सुरतस्थानभूता च। रसैर्जलैः। सुरतसुखैश्च। तापम् = आतपसन्तापं विरहज्वरञ्च।

---

1. M. Gr.1 पुनस्तन 2. M. Gr.1 नवसुरङ्गिणी 3. M. Gr.1 माआवइ!
4. M. Gr.1 सखि! 5. T. Gr.1 इयं **छाया** नास्ति।

अयि! दयिते! न सुखाल्लभ्यते सुखमित्यभियुक्तभाषितमवितथमवधारयामि। यतः -

पद्यम्- **प्रायः कार्श्यं वपुषि कलयन् प्राज्यशोकाग्निमध्ये**
**स्थित्वा हारं विजहदनिशं त्यक्तनिद्राप्रसङ्गः।**
**घोरेणैवं विरहतपसा क्लेशितो देवतां त्वां**
**ध्यायन्नित्यं कथमपि चिरात्तन्वि साक्षात्करोमि।। ५६।।**

**मायावती** **:-** (व्रीडया मुखमवनमय्य जोषं तिष्ठति।)

**प्रद्युम्नः** **:-** (स्वगतम्)[1] पुरा किल मया विजल्पितानां कर्णकटूनां वितथवचनानामनुस्मरन्ती पुरन्ध्रीयं सम्प्रति[2] मयि कोपेन नूनं मौनं भजते। तदद्य प्रसादनीया तन्वङ्गीम्[3]। (प्रकाशम्।)

पद्यम्- **मानिनि! न मुखं धत्से मयि यदि कोपेन (९) शोणतरळाक्षम्।**
**तव चरणमर्पय तदा मदुरसि कल्याणि! शोणतरळाक्षम्।। ५७।।**

यद्वा - **वचनमनुचितं क्षमस्व मे, तव हृदयं हि निरङ्कुशक्षमम्।**
**अयि! तव हृदयादुदञ्चितौ, कठिनकुचावपि (१०) यत् क्षमाधरौ।। ५८।।**

(पुनस्सोत्कण्ठम्)

**दिवापि स्यादभ्रं शशिमदधुनोदञ्चय मुखं**
**किरापाङ्गान्[4] वर्षाजलदहरित[5]स्सन्तु हरितः।**
**स्मितं देहि स्तोकं भवतु वनमाम्रेडितसुमं**
**भवेत् सानुप्रासं परभृत! रुतं व्याहर गिरः।। ५९।।**

(भूयस्सानुरागम्)

**मयि कामानलमग्ने![6] तव द्रवीभवतु हृदयनवनीतम्।**
(११) **अतनु शुभाज्याकलनं तदनुभवं तन्वि! तन्वीथाः[7]।। ६०।।**

---

**९.** शोणे तरळे चाक्षिणी यस्य - शोणतरालाक्षा यस्मिन्निति चार्थः।

**१०.** क्षमागुणधारिणौ पर्वतसदृशाविति चार्थः।

**११.** अतनु = अधिकं, शुभं = श्रेष्ठं यदाज्यम्। अतनोर्मन्मथस्य, शुभा = आजिः, युद्धं = सम्भोग इत्यर्थः।

---

1. M. Gr.1 (आत्मगतम्)
2. M. Gr.1 सम्प्रति इति नास्ति।
3. M. Gr.1 तन्वङ्गी
4. M. Gr.1 किरापागान्
5. M. Gr.1 जलदभरित
6. M. Gr.1 कालानमग्ने
7. M. Gr.1 तत्पुरतस्तन्वि तन्वीया

**मायावती** :- (सबाष्पोद्गमम्) अय्यउत्त![1] तुइ ण कंवि अवराहं पेक्खामि[2]। जेण एव्वं भणदि भवं। किन्दु किवासुण्णेण विहिणा कदे[3] दुव्वावारे तुमं किं कुणिज्ज[4]।

*(आर्यपुत्र! त्वयि न कमप्यपराधं[5] पश्यामि। येनैवं भणति[6] भवान्। किन्तु कृपाशून्येन[7] विधिना कृते दुर्व्यापारे त्वं किं कुर्याः[8]।)*

**विचक्षणा** :- राअउत्त! अविदहं एव्व कहेदि सही। *(राजपुत्र! अवितथमेव कथयति सखी[9]।*

**प्रद्युम्नः** :- (सानन्दम्) अयि! विचक्षणे! सदृशमेवेदं निसर्गसौम्यानां युष्माकम्। तथाहि-

पद्यम्- **सौम्यो जनस्सत्यपि दोषभूम्नि**
**निर्दोषयत्येव ननु स्वकीयम्।**
**दोषात्मकं सन्तमसैर्गृहीतं**
**कालं सुधांशुः कुरुते विशुद्धम्।। ६१।।**

(पुनस्सतृष्णं मायावतीमुद्दिश्य)

**मानिनि! तप्ताय[10] भृशं मह्यमसह्या तनुनिदाघेन।**
**सद्यस्तनकुम्भद्वयपरिरम्भणशीतलं रसं[11] देहि।। ६२।।**

सुमुखि! न सहन्ते खल्वधर्मं सुक्षत्रियाः[12]। ततश्च-

पद्यम्- **कठिनाविमौ कृशवलग्नखेदिनौ[13]**
**प्रसभं मृगाक्षि! परिमर्दये कुचौ।**
**अयि! खण्डयाम्यधरपल्लवं च य-**
**(१२) श्शुचिदान्तकान्तिविभवा पिधायकः।। ६३।।**

**१२.** शुचिश्शुभ्रा दन्तसम्बन्धिनी कान्तिः। शुचीनां = शुद्धानाम्। दान्तानां = जितेन्द्रियाणां कान्तिः = तेज इति च।

1. M. Gr.1 अंअउंत!, T. Gr.1 अंअउंत!
2. M. Gr.1 पेंछामि
3. M. Gr.1 विधिना किदे दुंवावारे
4. M. Gr.1 कुणंजा
5. M. Gr.1 किमप्यपराधं
6. M. Gr.1 भणसि
7. M. Gr.1 शून्येन
8. M. Gr.1 करोतु
9. M. Gr.1 सखि !
10. M. Gr.1 दीप्ताय
11. M. Gr.1 व्रतं
12. M. Gr.1 क्षत्रियाः
13. M. Gr.1 खेदनौ

(पुनस्सतृष्णोद्रेकम्)

**प्रचलनयनमीनां फुल्लवक्त्रारविन्दां**
**कनदुरसिजकोकां केशशैवालकान्ताम्।**
**जघनपुलिनरम्यां शीतलां प्रेमपूरै-**
**र्विरहदहनतप्तो (१३) नर्मदां त्वां विगाहे।। ६४।।**

(इति सरभसं सुगाढमाश्लिष्यति।)

**विचक्षणा** :- हळा! मणोरमे! इदोवरं सहिए[1] कुसुममालिआदिअं न पुव्वं विअ तावणिआणं[2]। किन्दु अच्चत्थसुहावहं भविस्सदि। ता तुण्णं आगच्छ। ताए धारणजोग्गाइ कुसुमाइ गेण्हिदुं[3]।

*(हळा![4] मनोरमे! इतःपरं सख्याः कुसुममालिकादिकं न पूर्वमिव तापनिदानम्। किन्तु अत्यर्थसुखावहं भविष्यति। तस्मात्तूर्णमागच्छ। तस्याः[5] धारणयोग्यानि कुसुमानि गृहीतुम्[6]।)*

(इति सख्या सह सव्याजं माधवीमण्डपान्निष्क्रान्ता।)

**प्रद्युम्नः** :- (आश्लेषसुखमभिनीय)

पद्यम्- **क्षणमनुपमानन्दोत्सिक्तलक्षणं[7] कुतुकोल्बणं**
**क्षणमथ घनव्यामोहान्धं क्षणं मुकुळेक्षणम्।**
**इदमिति परिच्छेदायोग्यं कमप्यसितेक्षणे!**
**वितरति परं संश्लेषस्ते विकारमिवान्तरम्[8]।। ६५।।**

(पुनस्सतर्षम्)**प्रभवति गुणैर्नीचामोदा प्रमोदयितुं न मां**
**कलयति न सोत्कर्षं हर्षं[9] गुरुस्तनि गोस्तनी।**
**अभिनवमधुस्यन्दो निन्दोचितो न तु रोचते**
**त्वदधरसुधापानं सानन्दमिच्छति मे मनः।। ६६।।**

(इति लज्जया नमितं मुखं चुबुके गृहीत्वा ललितमुन्नमयति।)

---

**१३.** नर्मदां = तन्नामिकां नदीम्। सुखदां च।

---

1. M. Gr.1 सहीए 2. M. Gr.1 तावणिदाणं 3. M. Gr.1 गंहिदुं
4. M. Gr.1 सखि! 5. M. Gr.1 तूर्णमागच्छास्याः 6. M. Gr.1 गृह्णीतुम्।
7. M. Gr.1 मानन्दोत्सिक्तं क्षणं 8. M. Gr.1 मिहान्तरम्। 9. M. Gr.1 तर्षं

***(।। नेपथ्ये।।)***

पद्यम्- **आपीतो करिमण्डलान रुधिरासारो मये मंसलो**
**खंधारेसु मये खु कोपि पुरिसो एसो गळे गेण्हितो[1]।**
**संपोता परुसेसु सीहकुनपा तंतंचलेसुं मये संतोसा**
**पिय पेक्ख नासियपियो[2] गन्धो नरानां नितो।। ६७।।[3]**

***(आपीतः करिमण्डलानां रुधिरासारो मया मांसलः***
***स्कन्धावारेषु मया खलु कोऽपि पुरुष एष गळे गृहीतः।***
***संप्रोताः परुषेषु सिंहकुणपा दन्ताञ्चलेषु मया सन्तोषात्***
***प्रिय! प्रेक्षस्व नासिकाप्रियो गन्धो नराणामानीतः।। ६७।।)***

**मायावती** **:-** (श्रुत्वा ससम्भ्रमम्) अय्यउत्त![4] परित्ताअसु।। २।।
*(आर्यपुत्र! परित्रायस्व।। २।।)*

**प्रद्युम्नः** **:-** (सधैर्यावष्टम्भम्) मानिनि! मा भैषीः।। २।।

**मायावती** **:-** (सचिन्तम्) अम्हो दाणिं वि चिराअंति कहं सहीओ।।
*(अहो! इदानीमपि चिरायेते[5] कथं सख्यौ ?)*

***(।। प्रविश्य सम्भ्रान्ते सख्यौ।।)***

**सख्यौ** **:-** (सत्रासश्वासम्-) अवि सुणसि राअउत्त एदाइ अदिभयंकराइ जप्पिदाइ[6]।
*(अपि शृणोषि राजपुत्र! एतान्यतिभयङ्कराणि जल्पितानि।)*

**प्रद्युम्नः** **:-** अयि विचक्षणे! केषाममूनि भीषणानि भाषणानि येभ्यो बिभ्यति भवत्यः।

---

1. T. Gr.1 गेण्हिदो
2. T. Gr.1 नासिअपियो
3. M. Gr.1 **आवीदे कळिमंडळा हळुहिळाशाळे मये मंसळे**
**कंदाळे शुमए खु केवि पुळसेए सेगळे गण्हिदे।**
**शापोदापळुशेशिशुं घ कुणपादं दंचळे शुं मयेशं**
**दो शावदि पेंकणा २ अमिमेगंधेणळाहं णिध।। ६७।।**
4. M. Gr.1 अंअउंत !
5. M. Gr.1 चिरायन्त्यौ
6. M. Gr.1 एताइ अतिभअंकराइ जंपिताइ T. Gr.1 अतिभअंकराइ

**विचक्षणा** :- सअल-लोअदुरवअम-माआडंबरेण संबरेण समत्तप्पाणि-संघारकदे[1] पहिदाणं हेलामेत्त-संपाइद-तिहुवण[2] विसाआणं पुरिसाआणं पिसाआणं।।

*(सकललोकदुरवगममायाडम्बरेण शम्बरेण समस्तप्राणिसंहारकृते प्रहितानां हेलामात्र-सम्पादितत्रिभुवनविषादानां पुरुषादाना[3] पिशाचानाम्।)*

**प्रद्युम्नः** :- (सावज्ञम्) किं तावता चिन्तावता भूयते प्रद्युम्नेन यदुकुलप्रभवेन।

**विचक्षणा** :- (साशङ्कम्) अवि एद्ध सहीए आअमणं जाणिस्संति एदे पिसाआ।[4] *(अप्यत्र सख्या आगमनं ज्ञास्यन्ति एते[5] पिशाचाः।)*

**प्रद्युम्नः** :- ततः किम् ?

**मनोरमा** :- तदो एदेसिं[6] मुहादो संबरो वि। *(तत एतेषां[7] मुखाच्छम्बरोऽपि।)*

**प्रद्युम्नः** :- ततोऽपि किम् ?

**मायावती** :- (सबाष्पोद्गमम्) तदो मं एव्व सो माआमाहप्पेण ओहरिअ[8] किं किं कुणिज्झंति[9] न जाणीअदि ? *(ततो मामेव स[10] मायामाहात्म्येन हृत्वा किं किं करिष्यतीति न ज्ञायते[11] ?)*

**प्रद्युम्नः** :- (विहस्य) अप्येवमुग्रे[12] मयि जाग्रत्यपि चापहस्ते।

**विचक्षणा** :- सो खु अप्पमेय[13]-माआमाहप्पो। जो पुरवं जगदेक्कवीरे जणद्दणे वि जाअरूए जातमेत्तं तुमं छट्ठे[14] दिअहे एव्व अरिट्ठादो हरिअ।।

*(स खल्वप्रमेयमायामाहात्म्यः। यः पूर्वं जगदेकवीरे जनार्दनेऽपि जागरूके[15] जातमात्रं त्वां षष्ठे दिवसे एवारिष्टादहार्षीत्[16]।)*

**प्रद्युम्नः** :- (साङ्गीकारम्) न तर्हि शम्बरवधादृते निरातङ्कं पङ्कजाक्षीसम्भोगसौख्यं सेत्स्यति।

---

1. M. Gr.1 संघारकए
2. M. Gr.1 संपदादि अंति हुवण
3. M. Gr.1 पुरुषादानाम् इति नास्ति।
4. M. Gr.1 अवि यंथ सहीए आगमणं जाणंसिंति एए विसाआ।
5. M. Gr.1, T. Gr. 1 ज्ञास्यन्ते ते
6. M. Gr.1 एएसिं
7. M. Gr.1 एतेभ्यो
8. M. Gr.1 हरिअ
9. M. Gr.1 कुणंजेंति
10. M. Gr.1 सो
11. M. Gr.1 किं किं कुर्य्यान्न जाने।
12. T. Gr.1 अप्येवमग्रे
13. T. Gr.1 अंपमेअ
14. M. Gr.1 चंठे
15. M. Gr.1 जगदेकवीरे जाग्रति
16. M. Gr.1 एव अरिष्टादहरत्।

**विचक्षणा** **:-** अह इं। *(अथ किम् ?)*

**मनोरमा** **:-** ता राअउत्त तुण्णं अणुजाणसु सहीए घरगमणं। *(तस्माद्राजपुत्र ! तूर्णमनुजानीहि[1] सख्या गृहगमनम्।।)*

**प्रद्युम्नः** **:-** तथा भवतु।

**मायावती** **:-** (सबाष्पमवलोकयते।)

**प्रद्युम्नः** **:-** (सधैर्यम्) मानिनि ! मा किञ्चिन्मनसि शङ्किष्ठाः।।

पद्यम्- **जाग्रन्मायाडम्बरं शम्बरं तं, साकं दैत्यं पुत्रमित्रैर्निहत्य।**
**द्रक्ष्यामि त्वां सुप्रसन्नाननाब्जां, प्रद्युम्नोऽहं तन्वि ! कुर्वे प्रतिज्ञाम्।। ६८।।**

**मायावती** **:-** (स्वगतम्) अम्हो ! तत्तारिस-बलिशालिणो[2] देविंदप्पमुहेहिं दुज्जअस्स संबरस्सवि कहं अय्यउत्तेण[3] वहो कादव्वो। तहवि देव्वो एव्वणं[4] रंखिस्सदि। (प्रकाशम्)

अय्यउत्त ! मह का चिंता। जाए णिहिलभुवणसिट्ठिट्ठिदि-संघारेक्कलीलस्स वासुदेवस्स णंदणो तुमं एव्व वल्लहो।

*(अहो ! तत्तादृशबलशालिनो देवेन्द्रप्रमुखैर्दुर्जयस्य शम्बरस्यापि कथमार्यपुत्रेण वधः कर्तव्यः। तथापि देव एवैनं[5] रक्षिष्यति। आर्यपुत्र ! मम का चिन्ता। यस्या[6] निखिलभुवनसृष्टिस्थिति-संहारैकलीलस्य वासुदेवस्य नन्दनस्त्वमेव वल्लभः।)*

(इति सबाष्पं मुहुरवलोकयन्ती सह सखिभ्यां निष्क्रान्ता।)

**प्रद्युम्नः** **:-** अलमितःपरमत्रावस्थानेन। तस्यैव दैत्यराजस्य वधं प्रत्यास्थेयो यत्न (इति सत्वरं निष्क्रम्यावलोक्य सप्रत्यभिज्ञम्।)

अयमेव खल्वस्मद्गुरोर्महर्षे[1]राश्रमस्पर्शी पन्थाः। तदनेनैव तावदाश्रममासादयिष्यामि (इति द्रुततरमरण्यानीरतीत्य सानुस्मरणं सलज्जं च।)

येन किल सेयं सायन्तनकुवलयनयना सर्वथा विहातुमनुचितेत्यसकृदुपदिष्टोऽपि हतविधिदुर्वि[2]पाकादनादरमकार्षम्। (तमेव प्रियवयस्यं मौञ्जायनं प्रति)

---

1. M. Gr.1 जानातु 2. M. Gr.1 बळसाळिणो 3. M. Gr.1, T. Gr.1 अंअउंतेण
4. M. Gr.1 देवो एंवरं 5. M. Gr.1 एव 6. M. Gr.1 यस्या इति नास्ति।
7. T. Gr.1 **महर्षे** इति नास्ति। 8. M. Gr.1 हतविधेर्दुर्वि

"सम्प्रति[3] कथंकारमियन्तमुदन्तं निरपत्रपः कथयिष्यामि" (इति चिन्तयन् किञ्चिदन्तरं गत्वा पुरो निर्वर्ण्य सहर्षम्)

हन्त! कथमिहैवागतो मौञ्जायनो मम नर्मवयस्यः अनेन नूनमस्मदनागमनाद्दुर्मनायमानेन मुनिनामां प्रति प्रहितेनैव भवितव्यम्[4]।।

***।। प्रविश्य विदूषकः।।***

**विदूषकः** :- (हस्तावुद्यम्य) विअओ होदु वअंसस्स। *(विजयो भवतु वयस्यस्य।)*

**प्रद्युम्नः** :- (साशङ्कम्) सखे! कथमिहैव सवैयग्र्यमागतोऽसि।

**विदूषकः** :- तुह चिरंअदंसणादो दुम्मणाअमाणेण मुणिणा[5] अणेण तुज्झ गवेसणकद[6] पहिदोम्हि। सद्दूळं अणुसरंतेण तुए जं[7] एव्वं चिराइदं। ता तक्केमि तस्सिं वणुद्देसे कावि कल्लाणी मिलिदंति। कहं अण्णहा तुह एदारिसं उव्वेलं आलस्सं।

*(तव चिरमदर्शनाद्दुर्मनायमानेन मुनिनानेन[8] तव गवेषण कृते प्रहितोऽस्मि। शार्दूलमनुसरता त्वया यदेवं चिरायितम्। तस्मात्तर्कयामि तस्मिन् वनोद्देशे कापि कल्याणी मिळितेति। कथमन्यथा तवैतादृशमुद्वेलमालस्यम्।)*

**प्रद्युम्नः** :- (सस्मितम्) सखे! शार्दूलानुसरणश्रान्तिनिबन्धनं कथमन्यथयसि।

**विदूषकः** :- वअंस![9] किं दाव णाळिएरपादवारोहणं णवतणत्थंति जप्पंतस्स[10] मग्गं अणुसरसि। *(वयस्य! किं तावन्नाळिकेरपादपारोहणं नवतृणार्थमिति जल्पतो मार्गमनुसरसि।)*

(इति सहासं संस्कृतमाश्रित्य)

पद्यम्- **प्रौढस्त्रीकुचरुचिरस्त्रगग्रजाग्र-**
**न्माणिक्यप्रसभविमर्ददत्तमुद्रम्।**
**वक्षस्तत्करधृतहेमकङ्कणाङ्कं**
**कण्ठं च स्थगयितुमङ्ग! का गतिस्ते।। ६९।।**

---

3. M. Gr.1 सम्प्रति इति नास्ति।
4. M. Gr.1 भवितव्यः।
5. M. Gr.1 दुंमणायमाणेण मुणिअणेण
6. M. Gr.1 गवेसणकए
7. M. Gr.1 **तुए जं** इति स्थाने **एजं** इति अस्ति।
8. M. Gr.1 मुनिजनेन
9. M. Gr.1 वयंस
10. M. Gr.1 पाअवारोहणं णवतिणत्थंति जंफंतस्स

**प्रद्युम्नः** :- (सस्मितम्) सखे! सत्यैव यद्यपि तव[1] सम्भावना। तथापि तदभिधातुमहमपत्रपे।

**विदूषकः** :- (आलोच्य) अवि वअंस! सा एव्व माआवदी[2] तुए आलिंगिदा।

*(अपि वयस्य! सैव मायावती त्वया आलिङ्गिता।)*

**प्रद्युम्नः** :- (सादरलज्जम्) तर्को हि तव न कदापि विषयं व्यभिचरति।

**विदूषकः** :- अज्ज किं अण्ण-विलआसंसअ-णिवारणकालणं[3] तं सवित्थरं कहेहि। *(अद्य किमन्यवनिता[4] संशयनिवारणकारणं तत्सविस्तरं [5] कथय।)*

**प्रद्युम्नः** :- शृणु सखे! सङ्ग्रहेण दूरमाकर्षता दुष्टव्याघ्रेण शीघ्रं कनककमलपरिकर्मितं किमपि सरः प्रापितस्य मम श्रमशमनार्थमास्वादिततोयस्य भवान्तरवृत्तान्तस्मरणमसृणमन्तः करणमभूत्।

**विदूषकः** :- अच्चरिअं।। २।। *(आश्चर्यम्।)*

ण सो सद्दूलो ताए पहिदो माआमओ एव्व। तदो।। २।।

*(न[6] स शार्दूलस्तया प्रहितो मायामृग[7] एव। ततः।। २।[8])*

**प्रद्युम्नः** :- **चिन्तानुतापपरिमोहमहाविषाद-**
**सन्तापसन्तमसजृम्भणशान्तबोधे।**
**अस्तोकसाध्वसमये समयेऽथ तस्मि-**
**न्नक्ष्णोस्तयैव सुचिरादमृतायितं मे।। ७०।।**

तदा किल! (सहर्षशोकम्)

**दृष्टिं यत्र क्वचनददती दीर्घकालं पुरस्थे**
**निध्यायन्ती निभृतमलसा निश्वसन्त्याय तोष्णम्।**
**सा जल्पन्ती किमपि किमपि[9] स्वैरमाकृत्य वन्ध्यं**
**दृष्टा तन्वी परमुपगता दीनदीनामवस्थाम्।। ७१।।**

---

1. M. Gr.1 तव यद्यपि 2. M. Gr.1 माआवई 3. M. Gr.1 णिवालणकालणं
4. M. Gr.1 किमन्यस्त्री 5. M. Gr.1 तं सविस्तरं 6. M. Gr.1 ननु
7. M. Gr.1 मायामय 8. T. Gr.1 इयं छाया नास्ति। 9. M. Gr.1 कमपि कमपि

**विदूषकः** :- सद्दूलवहकद[1]-तावसजणाहअदाण-सुकिदं अइरादो[2] एव्व दे फलिदं। तदो।। २।।
*(शार्दूलवधकृत[3]तापसजनाभयदानसुकृतमचिरादेव ते[4] फलितम्। ततः।।२।।)*

**प्रद्युम्नः** :- (सानुस्मरणरोमाञ्चम्)

पद्यम्- **सरभसपरिरिप्सासम्भ्रमोच्छूनपीनस्तन-**
**शिथिलितचञ्चत्कञ्चुळीसन्धिबन्धम्।**
**अलघुपुलकमङ्गं हन्त! दुर्वारनीवीच्युति**
**मम किल[5] चित्ते सन्निधत्ते तदीयम्।। ७२।।**

किञ्च- **भ्रश्यन्तीं प्रसभं रसादथ करेणैकेन नीवीं दध-**
**त्यानन्दादधरं चुचुम्बिषति मय्यन्यं करं धून्वती।**
**कान्ता यल्लपति स्म कातरतया मन्दाक्षमन्दाक्षरं**
**मन्ये तल्लिखितं मदीयहृदये कृत्स्नं मनोजन्मना।। ७३।।**

(पुनस्सतर्षोत्कर्षम्)

पद्यम्- **कामोन्मादविशेषगद्गदपदं क्षेमंकरं कर्णयो-**
**र्जल्पन्त्याः किमपि प्रफुल्लपुलकस्वेदार्द्रगण्डस्थलम्।**
**मोहानन्दनिमीलदक्षियुगळं मुग्धभ्रुलं बालकं**
**पर्युन्नम्य मुदा कदा पुनरहं पास्यामि तस्या मुखम्।। ७४।।**

**विदूषकः** :- वअंस! किं णाम कालणं तत्तारिस-णिअंबिणीसंभोअ-सोक्खं विणा तुह एद्ध आअमणे[6]। *(वयस्य! किं नाम कारणं तत्तादृशनितम्बिनीसम्भोगसौख्यं विना त्वयाऽत्रागमने[7]।)*

**प्रद्युम्नः** :- सखे! शम्बरासुरपरिचोदितनिशाचरपिशाचस्तनित[8]श्रवणचकितया दयितया तया[9] निरातङ्कमानंगमुत्सवमुपलिप्समानया कृतेन शम्बरसंहार[10]प्रार्थनेन संविघ्नित तदधर-सुधारसास्वाद-निःश्रेयसस्तमेव दमितुमनास्तूर्णमधुना प्रस्थितोऽस्मि।।

1. M. Gr.1 दुंठसंदूळवह, T. Gr.1 संदूलवहकओ
2. M. Gr.1 अचिरादो
3. M. Gr.1 दुष्टशार्दूलवध इति
4. M. Gr.1 तव
5. M. Gr.1 किल मम
6. M. Gr.1 आगमणे
7. M. Gr.1 तवात्रागमने
8. M. Gr.1 पिशाचरटित
9. M. Gr.1 तया इति नास्ति।
10. M. Gr.1 शम्बरसंप्रहार

**विदूषकः** :- (सहर्षम्) अम्ह! हे वअंस! तस्स खु तुमं सेसवे हिदवंतस्स सअलभुवण-व्वसणनिदाणस्स[1] दणुअराअस्स वहप्पसंगो मह मणं पीणेदि[2]। किन्दु विविह-माआविज्ञाबल-विप्पलद्ध-समत्तसुरसंघस्स तस्सवि वहो कहं हविस्सदित्ति संका पिसल्ली बाहदि[3]।

*(अहो! वयस्य! तस्य खलु त्वां शैशवे हतवतस्सकलभुवनव्यसननिदानस्य[4] दनुजराजस्य वधप्रसङ्गः मम मनः प्रीणयति। किन्तु विविधमायाविद्याबलविप्रलब्धसमस्त-सुरसङ्घस्य तस्यापि वधः कथं भविष्यतीति शङ्का पिशाचिका बाधते [5]।।)*

**प्रद्युम्नः** :- (सक्रोधहासम्) सखे मास्म संशयाळुर्भव। सत्यमित्थं हि सम्प्रति प्रतिजाने।

पद्यम्- **सद्यो योगिप्रसादात् समधिगतदुराधर्षमायाप्रकर्षो**
**द्विट्कण्ठच्छेदकण्डूचटुलभुजनटच्चण्डकोदण्डदण्डः।**
**तत्तादृग्रक्तमुष्णं दनुजकुलपतेस्तस्य रुष्टोऽथ येयं**
**तस्याः पास्यामि पश्चादधरमधुरसंहर्षवत्या युवत्याः।। ७५।।**

तदेहि महर्षेरस्याभ्यनुज्ञया तदनुगुणे कर्मणि तावत् सज्जीभवितव्यमिति निष्क्रान्तौ।।

***।। इति श्रीवेङ्कटाचार्ययज्वनः कृतिषु***
***प्रद्युम्नानन्दनाम्नि नाटके***
***तृतीयोऽङ्कः।।[6]***

**।। हरिः ओम्।।**[7]

---

1. M. Gr.1 सवणनिआणं स
2. M. Gr.1 पीडेदि
3. M. Gr.1 भविंसदिंति संका पिसाइ आबाईई।
4. M. Gr.1 त्वां शैशवे हतवतस्सकलभुवनव्यसननिदानस्य इति नास्ति।
5. M. Gr.1 बाधति।
6. My. Tel. Print* **। तृतीयोऽङ्कः।।** इत्येव पुष्पिका लभ्यते।
T. Gr. 1* **। तृतीयोऽङ्कः।।** इत्येव पुष्पिका लभ्यते।
7. My. Tel. Print, M. Gr. 1* **। हरिः ओम्।।** इति नास्ति।

# चतुर्थोऽङ्कः

***(।। ततः प्रविशति कञ्चुकी।।)***

**कञ्चुकी** **:-** (जराभरालसः कृच्छ्रेण वेत्रयष्टिमुद्यम्य सनिर्वेदम्)

पद्यम्- **प्रागासीज्जनवारणाय भवनद्वारिप्रभोरन्वहं**
**निर्यातेषु वयस्सु या कतिपयेष्वालम्बनायाभवत्।**
**यष्टिस्सैव कुलक्रमादुपगता यस्या भरादद्य मे**
**भारायैव चिराय पर्यवसिता तस्यै जरायै नमः।। १।।**

किञ्च- **(१) पदोपन्यासे हा! चरणरसनं प्रस्खलति मे**
**वपुर्वक्त्रं चेदं सदशनपरिह्रासमधुना।**
**अदश्चक्षुश्शीर्षं बहुलपलितान्तर्हितमभू-**
**दसौ पारे वाचां जयति जरसः कोऽपि महिमा।। २।।**

अपि च- (पुनर्निश्वस्य)

**प्रेक्षणस्थितिगतिव्यवहारा भङ्गुरा बत! वयः परिणामात्।**
**पारतन्त्र्यमिदमेकमभङ्गं कष्टमाचरमनिश्वसितान्मे।। ३।।**

यदिदानीमपि महाराजशम्बरेणाहमादिष्टोऽस्मि।

---

**१.** चरणञ्च रसना चानयोस्समाहारः। पदस्य पादस्योपसमीपे न्यासे = निक्षेपे, पदस्य सुबन्तादेरुपन्यासे उच्चारणे च प्रस्खलति। वपुश्शरीरं, सन् = विद्यमानः, अशनस्य परह्रासोऽल्पीभावो यस्येति। वक्त्रम् = आननम्। दशनानां = दन्तानां, परिह्रासस्संक्षेपः तत्सहितमिति चार्थः। चक्षुः परत्वे पलितशब्देन रलयोरैक्यात् परितमिति प्रतीयते। पॄ-पालनपूरणयोरिति पूरणार्थक-पॄ-धातुनिष्पन्नत्वात् परितशब्दस्य नेत्राच्छादकदोषविशेषोऽर्थः।

बहुलं यत्परितं नेत्रदोषः तेनान्तर्हितमाच्छादितं चक्षुः विषयग्रहणपाटवशून्यमिति यावत्। बहुलं यत्पलितं जरसा केशानां शुक्लत्वं तेनाच्छादितं शीर्षमिति चार्थः।।

यथा- **रथाङ्गक! यदुकुलशिशुना प्रद्युम्ननाम्ना धानुष्कमानिना।**
**साम्प्रतमस्मदीयस्यन्दनकेतनापहरणं कृतमित्यश्रौषम्।। ४।।**

तद्वधोपायपर्यालोचनकृते दुर्धरकेतुमालिप्रभृतीन् सचिवान् समानयेति। तदद्य मया[1] तूर्णमेव साधयितव्यम् - (इति जराभरमन्थराणि कतिचित्पदानि गत्वा पुरोऽवलोक्य)

अये ! राक्षसः कथमयमत्यन्तसम्भ्रान्तः परापतति तदेष प्रष्टव्यः।

***(।। प्रविश्य राक्षसः।।)***

**राक्षसः** **:-** हे कञ्चुइअ[2] ! ल्हंगअ कहिं दाणिं महालायशम्बरे चिट्ठदि[3]। कहेहि।। २।। *(भो! कञ्चुकिन्[4] ! रथाङ्गक कुत्रेदानीं[5] महाराजशम्बरस्तिष्ठति। कथय।। २।।)*

**कञ्चुकी** **:-** कथयिष्यामि तावत्कथय किं प्रद्युम्नकृतरथकेतनापहरणनिबन्धनस्तवायमावेगः।

**राक्षसः** **:-** अले! न केवलं लधकेदणा[6]वहलणम्मि पय्युम्मेण वीशंदं[7]। अवि दु लःकशा[8] वि अणेक्का कीणाशशअणं[9] णीदा। तं शामिणो णिवेएदुं गश्चामि[10]।।

*(अरे! न केवलं रथकेतनापहरणे प्रद्युम्नेन विश्रान्तम्। अपि तु राक्षसा अप्यनेके कीनाशसदनं नीताः। तत्स्वामिनो निवेदयितुं[11] गच्छामि।)*

**कञ्चुकी** **:-** (सखेदभयकम्पम्) हा! हन्त! महानङ्कुरितो यमातङ्कः।

पद्यम्- **यदि प्रसभमीदृशं यदुकुलावतीर्णशिशु-**
**र्विचित्रबलडम्बरे विरचयत्ययं शम्बरे।**
**ततः किल वितर्कये किमपि दैवमेवाधुना**
**हिनस्ति वितथोदयं ह ह समस्ति न स्वस्ति नः।। ५।।**

---

1. M. Gr.1 सचिवानुपनयेति तन्मया
2. M. Gr.1 कंजुइअ
3. M. Gr.1 तन्मयामहलाअशंबळे चिंठिदि। T. Gr.1 महालाअशंबळे चिंठिदि।
4. M. Gr.1 कञ्चुकि!
5. M. Gr.1 कथमिदानीं
6. M. Gr.1 केअलं लधकेअणा
7. M. Gr.1 विंशंदं, T. Gr.1 पंउंमेण वीशंदं
8. M. Gr.1 लंकशा
9. M. Gr.1 कीणाशशदणं
10. M. Gr.1 णिवेदेदुं गंचामि।
11. M. Gr.1 निवेदितुं

**राक्षसः** **:-** लधंगअ[1] ! किं भणीयदि अदिस्ट[2]पुलवे खु पय्युम्माह आहवम्मि तत्तालिशे पलक्कमे।[3] शुणशु-

पद्यम्- **शुलयणशवणाहं शाशडःकेमकाली**
**घणदणुयकुलाहं कण्णदोग्गादमीअ।**
**अवि शुमलिदमेत्ते अय्यपय्युम्मशिस्टे**
**कुणदि हिअयकंपं[4] चापटंकालघोशे।। ६।।[5]**

*(रथाङ्गक! किं भण्यते ? अदृष्टपूर्वः खलु प्रद्युम्नस्य च आहवे[6] तत्तादृशः पराक्रमः। शृणु-*

***सुरजनश्रवणानां शाश्वतक्षेमकारी***
***घनदनुजकुलानां कर्णयुग्मदुःखकारी च।***
***अपि स्मृतमात्र आर्यप्रद्युम्नसृष्टः***
***करोति हृदयकम्पं चापटङ्कारघोषः।। ६।।***

*(शिष्टे इत्यत्र सस्सशोस्संयोगेऽग्रीष्मे इति सकारः।)* [7]

**कञ्चुकी** **:-** अरे! आस्तां नामैतदधुना पुनरनेनैव दुर्मनायमानो महाराजशम्बरो मन्त्रिणामागमनं प्रतीक्षमाणो भद्रासनमध्यमध्यास्ते। तत्सत्वरं गत्वा तस्मै निवेदयैनमुदन्तम्। अहमपि सचिवानचिरादेवानेष्यामि - (इति निष्क्रान्तौ।।)

**।। मिश्रविष्कम्भः।।**

---

1. M. Gr.1 लहंगअ!
2. M. Gr.1 अदिंठ
3. M. Gr.1 **आहवम्मि तत्तालिशे पलक्कमे।** इति स्थाने **अंतंताति शेपळं कमे** इति अस्ति।
4. M. Gr.1 हिअअकंपं
5. M. Gr.1 **शुलअणशवणाहं शंशदंके मकाली**
**घणदणुअकुलाहं कंणदोगावमीअ।**
**अवि शुमळिदमेंते अंअपंयुंमसीसे**
**कुणदि हिअअकंपं चापटंकालघोशे।। ६।।**
6. M. Gr.1, My. Tel. Print. **आहवे** इति नास्ति।
7. M. Gr.1 **रथाङ्गक! किं भण्यते ?** ..... **मिश्रविष्कम्भः** इति **छाया** नास्ति।

*(।। ततः प्रविशति भद्रासनमध्यमध्यासीनः[1] शम्बरो यथोचितासनोपवेशिनो मन्त्रिणश्च[2] ।।)*

**शम्बरः** :- अपि श्रुतं युष्माभिरनार्यचेष्टितं प्रद्युम्नहतकस्य ?

**दुर्धरः** :- (सविस्मयम्।) महाराज! जीवति किमद्यापि प्रद्युम्नः। मज्जितो यस्त्वया मध्ये सागरम्।

**शम्बरः** :- न केवलं जीवति। किन्तु-

पद्यम्- **हित्वा साध्वसमेष रोषपरुषः कृत्वा च धैर्यं परं**
**मुक्त्वा तीव्रशिखान् जवेन विशिखान् हत्वा च दोषाचरान्।**
**भित्वा सालमनुप्रविश्य नगरं हत्वा ततस्स्यन्दनं**
**भूयो हन्तुमथाप्यमर्ष[3]मधिकं पुष्णाति कृष्णात्मजः।। ७।।**

**दुर्धरः** :- न तर्हि जीविष्यति भवान् स एष महाराज! यद्येवं कुप्यति।

**केतुमाली** :- (आत्मगतम्) हा! कष्टमन्तराळे भवत्पदमाधाय कथमयमश्लीलमावेदयति। अथवा- न सर्वथा नः कल्याणोदर्कमेतत्। तथा हि-

पद्यम् **(२)** **उज्जृम्भते[4] पुनरुदन्वति पातितोऽपि**
**तेजो वहन् किमपि कृष्णगतिस्स्वयं यः।**
**दग्धुं क्षमस्सपदि दैत्यवनं स एष**
**स्वल्पेन शाम्यतु कथं ननु शम्बरेण।। ८।।**

तथा हि[5]- **राज्ञश्छन्दानुरोधेन स्थातव्यं राजसेविभिः।**
**न चिरात् खलु खिद्येत नदीस्त्रोतः प्रतीपगः।। ९।।**

(प्रकाशम्) महाराज! न किञ्चिदेतद्येन भवानपि दुर्मनायते। पारे गिरां हि विजयते तव पराक्रमसमृद्धिः।

---

**२.** कृष्णस्य गतिरिव गतिर्यस्य कृष्णगतिः, कृष्णसदृशः प्रद्युम्नः। कृष्णा = नीला गतिस्सञ्चारमार्गो यस्य स कृष्णवर्त्मा अग्निरिति चार्थः। शम्बरमुदकम् असुरेन्द्रश्च।

---

1. M. Gr.1 भद्रासनमध्यासीन 2. M. Gr.1 वेशिनस्सचिवाश्च।
3. M. Gr.1 हन्तुमिवाप्यमर्ष 4. M. Gr.1 उज्जृम्भिते 5. M. Gr.1 तथापि

पद्यम्- **(३) भवता बत! शम्बरेण जातु प्रतिरुद्धे नगरे पुरन्दरस्य।**
**असुरेन्द्रसहस्रमीक्षणानामपि तस्याजनि शम्बरोपरुद्धम्।। १०।।**

**प्रमर्दनः** **:-** देव! कथयति यथाभूतमेव।

**केतुमाली** **:-** तथा हि-

पद्यम्- **(४) त्वङ्ग[1]त्तुङ्गतरङ्गभीषणमहाहेषाविशेषार्पित[2]-**
**प्रौढिम्नः पटहध्वनींस्तव जयप्रस्थानकर्णे जपान्।**
**आरात्तर्हि निशम्य बर्हिरसहन्नध्यानन[3] साध्वसात्**
**प्रख्याता विबुधास्तदादिनियतं बर्हिर्मुखाभिख्यया।। ११।।**

**शम्बरः** **:-** (सक्रोधोत्साहम्) **(५)**

**समित्सम्पन्नसत्वेन[4] प्रकृष्टेन शराग्निना।**
**परकीलालसद्भासा धक्ष्यामि तृणवद्रिपुम्।। १२।।** (पुनरालोच्य)

मम सुरजितश्शश्वद्विश्वस्य जेतुरयं[5] कियान् स्वयमिममहो! हन्तुं किन्तु त्रपा हृदि बाधते। हरिरिभघटाकुम्भालम्भात्तमौक्तिकतारकाधवलितं न[6] व्योमा गोमायुना विवदेत किम्।

---

**३.** हे असुरेन्द्र! शम्बरेण = उदकेनेव शम्बरनामकेन भवता स्वपुरे रुद्धे सति इन्द्रस्याक्षिसहस्रं शम्बरेण उदकेनोपरुद्धं बहिः प्रसरशून्यम् अश्रुपूर्णमिति यावात्।

**४.** आनने अध्याननं विभक्त्यर्थेऽव्ययीभावः। बर्हिः = दर्भतृणम्। प्राणभीतेरवहन्। अतः बर्हिः दर्भतृणं मुखे येषामिति व्युत्पत्त्या तादृशाभिधया प्रसिद्धा इत्यर्थः।।

**५.** समिति = युद्धे, सम्पन्नं = प्राप्तं, सत्त्वं = बलं, यस्य = शरस्य, समिद्भिः = काष्ठैस्सम्पन्नमुत्पन्नं सत्त्वं स्वरूपस्थितिः यस्याग्रेः। परस्य = शत्रोः कीलालेनासृजा, सती = विद्यमाना, भाः = कान्तिर्यस्य शरस्य परया = कीलया ज्वालया, लसन्ती = प्रकाशमाना भाः = कान्तिर्यस्याग्रेः शर एवाग्निस्तेन तृणवद्रिपुं धक्ष्यामीत्यर्थः।।

---

1. M. Gr.1 त्वङ्गां
2. M. Gr.1 विशेषार्पत
3. M. Gr.1 बर्हिरवहन् मध्याननं
4. M. Gr.1 समित् प्रसरसम्पन्नप्रकर्षेण शराग्निना।
5. M. Gr.1 नेतुरयं
6. M. Gr.1 धवलितवनव्योमा

**दुर्धरः** **:-** देव! एवमेवैतत्।[1] न खलु कार्याण्येतादृशानि भवत्पर्यन्तमागन्तुं प्रभवन्ति जाग्रति युवराजे चित्रसेने -

पद्यम्- **यावद्दृशौ न कुरुषे परुषे रुषेह**
**तावद्रिपून् विदळयेत् तव सूनुरेव।**
**अन्धन्तमस्स्वकिरणैररुणो रुणद्धि**
**प्रागेव वासरपतेरुदयात् प्रभाते।। १३।।**

**केतुमाली** **:-** महाराज! युक्तमेवाह दुर्धरः। तदद्यचित्रसेनेनैव स्वानुजसहायेन निराकर्तव्यश्शत्रुः।

**शम्बरः** **:-** (अभ्युपगम्य, नेपथ्याभिमुखमवलोक्य) कस्कोऽत्र भोः।

***।। प्रविश्य कञ्चुकी।।***

**कञ्चुकी** **:-** महाराजायमस्मि।

**शम्बरः** **:-** रथाङ्गक! सत्वरमाहूयन्तां शतमपि पुत्राश्चित्रसेनादयः।

**केतुमाली** **:-** सह समरसन्नाहसाहसभीषणैरसुरराक्षसभटैः।

**कञ्चुकी** **:-** यदाज्ञापयति महाराज! (इति निष्क्रान्तः।)

***(।। ततः प्रविशति सह सहोदरैश्चित्रसेनः।।)***

**चित्रसेनः** **:-** (प्रियानुजं कुम्भसेनमवलोक्य) वत्स! कुम्भसेन! धिगस्मान्नाममात्रेण पुत्रान्। यदिह जीवत्स्वप्यस्मासु चिन्ताक्रान्त इव लक्ष्यते तातपादः। निगदन्ति खल्वित्थं नीतिविदः -

पद्यम्- **तावत् पिता न सुतवांस्तनयेषु याव-**
**न्निश्शङ्कमर्पितभरो न सुखादुदास्ते।**
**उत्पत्तिरेव न हि पुत्रपदे निमित्तं**
**न व्याधयः किमुदयन्ति नृणां शरीरात्।। १४।।**

(इति सविनयमुपसृत्य सहानुजैः प्रणमति।।)

**शम्बरः** **:-** (सस्नेहमवलोक्य)[2] वत्साः! प्रविशदयशसः स्वस्थाश्च भूयास्त।

---

1. M. Gr.1 एवमेतत्। 2. M. Gr.1 (सस्नेहमवलोक्य) इति नास्ति।

**केतुमाली** :- (प्रमर्दनं प्रत्यपवार्य) अये! कथमयशः प्रवेशस्य स्वर्गस्थितेश्च सूचकमश्लीलमाशीर्वचनमारचयति ?

**प्रमर्दनः** :- सखे! मैवं वोचथाः।

**चित्रसेनः** :- तात! तदावेदय स्वयमाहूता यदर्थं वयममी सर्वे।

**प्रमर्दनः** :- (जनान्तिकम्) सखे! पितुर्वचनमेवानुसरति पुत्रोक्तिरपि।

**केतुमाली** :- (अपवार्य) शृणोम्येव यमाहूता इति च[1]।

**शम्बरः** :- वत्स! कस्यचिद्गोपालकस्य शिशुश्शूरमानी देवानांप्रियः प्रद्युम्नः - इति कश्चिद्दुश्चेष्टितमनुतिष्ठति। स तावद्भवता समवर्तिवर्तनीं नेतव्यः।

**चित्रसेनः** :- कियदेतद्भवद्गर्भोद्भवानाम्। आज्ञापय तावत् साधयामः।

**शम्बरः** :- (सप्रेमातिरेकम् सानन्दं च परिष्वज्य) भो! भो! वत्साः! -

पद्यम्- **महानिष्टार्थलाभो नस्स्यान्नः[2] परममङ्गळम्।**
**तनुध्वंसं प्रति क्षिप्रं प्रयात समराङ्गणम्[3]।। १५।।**

**दुर्धरः** :- (आत्मगतम्) प्रतिहतममङ्गळम्।। २।। शान्तं पापम्।। २।।[4] आभिस्तावदमङ्गळोपहताभिराशीर्भिर्वयमुद्वेजिता स्मः। तथापि नैतत् प्रकाशयितुमसाववसरः। तर्कयामि तावद्दुर्लभैव स्यादमीषां पुनरावृत्तिः।

**चित्रसेनः** :- यदाज्ञापयति तातः! (इति सहानुजैर्निष्क्रान्तः।।)

**दुर्धरः** :- (श्रवणमभिनीय) हन्त! कथमचिरादेव रथमारुह्य कृतमेव विजयप्रस्थानं कुमारचित्रसेनेन। यत इदानीम्-

पद्यम्- **धिक्कर्तुं द्विषमुन्मिषत्यतितरां तत्कालभीतिक्रिया**
**फक्कद्दिक्करिमुक्तभूमिभरणस्विद्यत्फणीन्द्राङ्ककः।**
**अर्कस्यन्दनवाजिनस्तरळयन्नाक्रम्य शाक्रं पुरं**
**दिक्चक्रे रथ-चक्र-चङ्क्रमणज-क्रेङ्कारकोलाहलः।। १६।।**

2. M. Gr.1 **च** - इति नास्ति।
3. M. Gr.1 वस्स्यान्नः
4. M. Gr.1 समराङ्कनम्।।
5. M. Gr.1 शान्तं पापम्।। २।। प्रतिहतममङ्गळम्।। २।।

**केतुमाली** **:-** न केवलं प्रस्थितं कुमारचित्रसेनेन। प्रक्रान्तमेव प्रद्युम्नेनापि भयङ्करं समरम्। तथा ह्यद्य-

पद्यम्- **कर्णे घूर्णति तूर्णमेव परुषः कार्तान्तदंष्ट्राद्दृषत्**
**सङ्घर्षप्रकटोन्मिषत्कटकटारावच्छटाबान्धवः।**
**रक्षो बृन्दकबन्धभक्षणघनाहङ्कारकङ्कारव-**
**प्राग्भारद्विगुणो भयङ्करधनुष्टङ्कारतुङ्गारवः।। १७।।**

**शम्बरः** **:-** (निपुणमाकर्ण्य, सवात्सल्यम्, सखेदञ्च।) हा! वत्स! चित्रसेन! मदर्थे कथमिदानीमतिभयङ्करैस्सङ्गरव्यापारैः परिश्राम्यसि ?

**केतुमाली** **:-** किं तादृशे महावीरे कुमारेऽपि चिन्तामसृणमन्तःकरणं महाराजस्य।

**शम्बरः** **:-** केतुमालिन्! किमहं करवाणि ? स्वयमेव समुत्पन्नचिन्तं भवति मम सम्प्रति स्वान्तम्। पश्य —

पद्यम्- **अकाण्डे हा! कष्टं रुरुदिषति मे लोचनयुगं**
**गळार्थे विश्रान्तं गळति च वचो गद्गदतया।**
**न जातु प्रागेवं ननु मनसि कातर्यमुदितं**
**न जानीमः किं वा नटयितु[1]मिहास्ते हतविधिः।। १८।।**

**दुर्धरः** **:-** अलमलमक्षुण्णैरधीरजनैकसमुचितैरीदृशैरकाण्डचिन्तासन्तापैः। अथवा नूनमतिधीराणामप्यधिहृदयमादधाति पापशङ्कामतिस्नेहः।।

**शम्बरः** **:-** एवमेवैतत्।[2]

**प्रमर्दनः** **:-** (सविस्मयखेदम्) कष्टमहो! महाराजस्यापि कथमधुना प्रत्यनीकनिबन्धना चिन्ता। अहह! गहना खलु दैवीगतिः।

1. My. Tel. Print.1 नटयतु 2. M. Gr.1 एवमेतत्

**शम्बरः** :- (विहस्य)

**(६) शिवस्तावद्द्विषाक्रान्त-गळोरुदरभृत्स्वभूः।**
**ब्रह्मापि वारिजातेना-सनवान् किमु मादृशः।। १९।।**

***(।। सर्वे हसन्ति।।)***

**शम्बरः** :- दुर्निमित्तं सूचयित्वा। कामपि शङ्कामङ्कुरयति कथमसौ मम वामनयनस्पन्दः।

(पुनस्सावज्ञम्) न किञ्चिदेतत्। महता प्रतापेन निर्वापितसकलगीर्वाणगणगर्वस्य ममापि नाम दुर्निमित्तानि शङ्कावहानि। व्याहरन्ति खल्वेवं वस्तुयाथार्थ्यविदः -

पद्यम्- **ज्योतिश्शास्त्रं शकुनगतयस्स्वप्नसन्दर्शनं**
**वाचारस्सूर[1]क्षितिसुततमःपूर्वकाणां ग्रहाणाम्।**
**चक्षुस्पन्दप्रभृति च फलं सौतिनैकान्ततो नः**
**कार्योत्पादः क्वचिदपि पुनः काकतालीय एव।। २०।।**

**दुर्धरः** :- सत्यमेतत्।

***(।। नेपथ्ये।।)***

**गृह्णाति मुञ्चति निकृन्तति मस्तकानि**
**भो! भो! भटा ! हितमितस्तु पलायनं नः।**
**हा तात! हा जननि! हा सुत! हा! हतोऽस्मि**
**हा! ताडिताय विशिखेन पयः पयो मे।। २१।।**

***(।। सर्वे ससम्भ्रममाकर्णयन्ति।।)***

**६.** शिवः तावद्द्विषा = शत्रुणा, आक्रान्तः गळः = विषेण गरळेनाक्रान्तगळ इति चार्थः। स्वभूः = विष्णुः। अरिभ्यः = शत्रुभ्यः, दरम् = भयम् अराण्यन्ये पत्त्यरिचक्रम्। दरः = शङ्खः तदुभयभृदिति चार्थः। चतुर्मुखोऽपि अरीणां = शत्रूणां जातेन समूहेन असनं निरसनं तद्वान् तैर्निरस्त इति यावत्। वारिजातेन = कमलेन, आसनवान् = पीठवान् इति चार्थः।।

1. M. Gr.1 वाचारस्सूतः

**केतुमाली** :- अधुना नूनमस्मद्बलेन प्रद्युम्नवलाहकपरिकलितशरवर्षदुस्थाद्रणांकणस्थलात् पलायमानेन भवितव्यम्।

***(।। सर्वे चिन्तां नाटयन्ति।।)***

***(।। ततः प्रविशति पटाक्षेपेण शरप्रहारसम्भ्रान्तो राक्षसः।।)***

**राक्षसः** :- पलिलःकदु पलिलःकदु महालाये!।[1] *(परिरक्षतु।। २।। महाराजः!*[2]*)*

**शम्बरः** :- (सधैर्यावष्टम्भम्) राक्षस! मा भैषीः।। २।।

**दुर्धरः** :- समावेदय तावत् समराङ्गणगतस्य वृत्तान्तं[3] कुमारचित्रसेनस्य।।

**राक्षसः** :- (सत्रासश्वासम्) शुणदु[4] शामी। *(शृणोतु स्वामी)*

पद्यम्- **पय्युम्मेण[5] कुमाल अम्मि समले घोला विशिस्टाशला**
***(प्रद्युम्नेन कुमारे समरे घोरा विसृष्टाश्शराः)***

**शम्बरः** :- (सक्रोधम्) अरे! गोपालशिशो! कथमतिवीर्यस्य[6] वत्सस्याप्युपरि तथा प्रगल्भथाः[7]। ततः।। २।।

**राक्षसः** :- **लोशी येण शलेहि शेवि दळिदेशत्तू कुमालाह दे[8]।**
***(रोषी येन शरैस्सोऽपि दळितश्शत्रुः कुमाराणां ते।)***

**शम्बरः** :- (सश्लाघम्) साधु वत्स! साधु। ततः।। २।।

**राक्षसः** :- **णं शत्तू तुहीअ तेण[1] विशिहा कस्टं विमुक्कातदो[2]**
***(एनं शत्रुस्त्वलभत तेन विशिखाः कष्टं विमुक्तास्ततः)***

**शम्बरः** :- (सभयम्) अहह! किमुपरिष्टाद्वक्ष्यमाणमशुभमपि स्यात्।।

---

1. M. Gr.1 पलिलंकदु पलिलंकदु महालाओ।
2. M. Gr.1 छाया नास्ति।
3. M. Gr.1 समराङ्कणवृत्तान्तं
4. M. Gr.1 शुणादु
5. T. Gr.1 पंउंमेण
6. M. Gr.1 कथमिति वीरस्य
7. M. Gr.1 प्रागल्भधाः
8. M. Gr.1 कुमालाण दे।
9. M. Gr.1 तुळहीअतेण
10. M. Gr.1 वमुं तातदो

**राक्षसः** :- (सभयगद्गदम्)

**(७)** **एहिं हंत! शशेणिअं[1] तुहवि तालिःशं[2] शुदाहं शदं।। २२।।**
***(एभिर्हन्त! ससैनिकं तवापि तादृक्षं सुतानां शतम्।। २२।।[3])***

(इति सशेषमुच्चार्य विरमति।)

**सचिवाः** :- (आत्मगतम्) किमन्यदत्र हतमित्येव शेषस्स्यात्।

**शम्बरः** :- अतिवेलशोकानलपरवशो भद्रासनात् पतति।

**दुर्धरः** :- महाराज! समाश्वसिहि[4]।। २।।

**केतुमाली** :- (सशोकविस्मयम्)

पद्यम्- (२) **वार्तापेतास्सुभग भवता वम्य-नीवार्त-नंसाद्यार्तिं[5]**
**नीता भुवि नृपतयो हन्त! सर्वेऽपि पूर्वे।**
**जन्तोः कस्मादपि तव हरिज्ज्वालजङ्गालकीर्ते-**
**र्हा![6] धिक्कष्टं हर हर हठादापदापत्तिरित्थम्[7]।। २३।।**

(पुनस्सधैर्यम्) भो! भो! दनुजवंशमुक्ताफलमहावीर! न खलु मोहान्धानां पन्थानं भवादृशोऽपि धीराः प्रतिपद्येरन्।

पद्यम्- **अहह! मार्गमधीरनिषेवितं महितविक्रममास्मगमद्भवान्।**
**ननु विदन्नखिलञ्च भवादृशो न खलु कश्मलमीदृशमृच्छते।। २४।।**

---

**७.** वम्यसंज्ञो नीवार्तसंज्ञो नंससंज्ञश्च राजा। एते वार्तायाः कथाया अपेताः तेषां नामानि यथा न श्रूयेत तथा कृता इति।

---

1. M. Gr.1 शशेशअं 2. M. Gr.1 तीरीकं

3. M. Gr.1 छाया नोपलभ्यते। किन्तु पाठकानां सौलभ्याय एकत्र दीयते।

*प्रद्युम्नेन कुमारे समरे घोरा विसृष्टाश्शराः*
*रोषी येन शरैस्सोऽपि दळितश्शत्रुः कुमाराणां ते।*
*एनं शत्रुस्त्वलभत तेन विशिखाः कष्टं विमुक्तास्ततः*
*एभिर्हन्त! ससैनिकं तवापि तादृक्षं सुतानां शतम्।। २२।।*

4. M. Gr.1 समाश्वसिहि 5. M. Gr.1 नीवार्त-नंसाद्यार्त

6. M. Gr.1 हा 7. M. Gr.1 हठादाप दापत्तदित्थम्।

**शम्बरः** :- (कृच्छ्रादीषल्लब्धसंज्ञः) हा! वत्स! चित्रसेन! हा! दानवान्वयोदन्वज्जैवातृक! हा मद्वदनराजीवमित्र! क्व गतोऽसि ? (इति पुनर्मोहमुपगच्छति।)

**प्रमर्दनः** :- हा[1] महाराज! कृतमतिवेलेन शोकावेगेन धैर्यं तावदवलम्बस्व[2]। आपत्सु दैन्यं खलु पुंसामधैर्याभिधानं महान्तं दोषमाविष्कुर्यात्। गायन्ति खल्वेवम्-

पद्यम्- **ते दातारस्त्रपन्ते कलयितुमिह ये याचकान् मे चकास्यान्**
**प्राहुस्तान् पण्डितान् ये प्रमुदितमनसस्सादरं वादरङ्गे।**
**ते शूरा ये त्वभीता विदधति हृदयं विद्विषामुद्विषादं**
**धीरानाचक्षते तान् विपदि च दधते दीनतां येन तावत्।। २५।।**

**शम्बरः** :- (कथमपि पुनस्संज्ञां लब्ध्वा सनिर्वेदम्)

पद्यम्- **पुत्रान् शतमपि प्राप्य पुत्रीणां सदृशं हि यत्।**
**नैवापं वारि नैवापं तदन्तर्दन्दहीति माम्।। २६।।** (इति बाष्पं मुञ्चति।)

**केतुमाली** :- (आत्मगतम्)

**हिंसा दारुणकर्मभिर्मदभरादेकैव लोकैः कृता**
**सन्तन्वीत फलानि हन्त! शतधेत्युक्तिस्सतां नानृता।**
**पाकद्वेषिण एकमेव सहसा निर्भिन्दतो[3] (८) नन्दनं**
**गोविन्दात्मभुवास्य नन्दनशतं केनापि हा! नाशितम्।। २७।।**

(प्रकाशम्) सहस्व महाराज! सहस्व।

**शम्बरः** :- केतुमालिन्! किमुच्यते सहस्वेति ?

पद्यम्- **सुतव्यापत्तिसम्भूतस्समिन्धानोऽधिमानसम्।**
**असौ शोकानलो धिङ्मामदग्ध्वा[4] न प्रशाम्यति।। २८।।**

---

८. नन्दनं = नन्दनसंज्ञमुद्यानं पुत्रमिति च प्रतीयते।

---

1. M. Gr.1 हा इति नास्ति।
2. M. Gr.1 तावदालम्बस्व।
3. M. Gr.1 निर्भन्दतो
4. M. Gr.1 लोकानदग्ध्वा

(पुनस्सक्रोधमधरोष्ठं दन्तैस्सन्दश्य)

**अहमहह करिष्ये भूतलं प्रेतलक्ष-**
**प्रचितमथ दिनं वा ख्यातये पातयेयम्।**
**क्षुभितमसुरयूथं वर्धयेयं[1] धयेयं**
**रिपुवपुरनुषक्तां रक्तधारामुदाराम्।। २९।।**

**दुर्धरः** :- महाराज! तवापि कियदिदं नाम।

पद्यम् **(९)** **समरोदयस्फुरितबाहुमदो य-स्समरोदयस्त्वमखिलं सुरसेनम्।**
**अवधीरये रिपु[2]चमूस्स इदानी-मवधीरये मम सुरेशितरेकम्।। ३०।।**

**प्रमर्दनः :-** (साग्रहम्)[3] कष्टं भोः! कष्टम्। अस्माकमपि सचिवानामनासादितनिर्याणेषु प्राणेषु कथमधुना महाराजस्य कथयति कापुरुषसङ्गरङ्गप्रसङ्गम्।

(सावष्टम्भं शम्बरमवलोक्य) भो भो महाराज! दनुजकुलभागधेय!

पद्यम्- **पुरस्ते यातानां शरविषयलाभात् पुलकिनां**
**रणं नः प्रेक्षेथा (१०) रणरणकहेतुं क्रतुभुजाम्।**
**स्वयं वीर! क्षिप्रं वयमुपहरन्तो रिपुशिर-**
**स्तनिष्यामः कामं तव तनयशोकापनयनम्।। ३१।।**

**शम्बरः** :- साधु भो सचिवोत्तंस! साधु। क्व खलु भवादृशेष्वपि सचिवेषु कृताभियोगेषु नः प्रतिपक्षमुखप्रेक्षणावकाशः। (इति सोत्साहं नेपथ्याभिमुखमवलोक्य) कोऽत्र भोः!

---

९. समरस्य = युद्धस्य, उदये = आविर्भावे, स्फुरितः = प्रकाशमानः बाहुमदो यस्य तादृशो यस्त्वं सुराणां सेना सुरसेनम्। **विभाषा सेने**त्यादिना नपुंसकत्वम्। समरोदयः सम्यक् रोदनवदकरोः। अये! असुरे! शितः दैत्यप्रभो! रिपुचमूः अवधीः = संहतवान्, सः = तादृशस्त्वम् इममेकं शत्रुं = प्रद्युम्नम्, अवधीरय = निराकुरु जहीति यावत्।

१०. रणरणकं भयम्।

---

1. M. Gr.1 यूथं वर्तयेयं 2. M. Gr.1 नृप 3. M. Gr.1 (साग्रहम्) इति नास्ति।

***(।। प्रविश्य कञ्चुकी।।[1])***

**कञ्चुकी** **:-** आज्ञापयतु देवः!।

**शम्बरः** **:-** झडिटि[2] रथमुपस्थापय जयप्रस्थानाय।

**कञ्चुकी** **:-** यदाज्ञापयति देव! (इति निष्क्रान्तः।)

***(।। ततः प्रविशति रथमुपस्थापयन् सूतः।।)***

**सूतः** **:-** विजयतामायुष्मान्।

**शम्बरः** **:-** अपि सूत! सज्जीकृतो रथः।

**सूतः** **:-** आयुष्मन्नवलोकय **(११)**

पद्यम्- **ध्वजवत्त्वमपि प्रथयन्नध्वजवत्त्वञ्च राजति रथोऽयम्।**
**सवितानोऽप्यवितानस्सवाजिमुख्यो न वाजिमुख्योऽपि।। ३२।।**

तदेनमारोहयत्वायुष्मान्।[3]

**शम्बरः** **:-** तथा - (इति नाट्येन रथमधिरोहति।)

**सचिवाः :-** (यथा स्वं रथमधिरुह्य सोत्साहम्।) महाराज! यावदेव भवता सङ्गराङ्कण[4]-भूरलङ्करिष्यते तावदेव तव पादमूलमानयामो वैरिणश्शिरः। आज्ञापय तावदस्मान् पुरः[5] प्रस्थातुम्।

---

**११.** ध्वजवत्त्वं = केतनवत्त्वं, प्रथयन् = विस्तारयन्नपि, अध्वजवत्त्वं = ध्वजाभाववत्त्वं प्रथयन्निति विरोधः। अध्वनि = मार्गे, जवो = वेगी, तस्य भावस्तत्त्वमिति परिहारः। सवितानोऽपि = ऊर्ध्वप्रसारितवस्त्रोऽपि, अवितानः = तद्रहित इति विरोधः। नः = अस्माकम्। अविता = रक्षक इति परिहारः। सवाजिमुख्योऽपि = अश्वश्रेष्ठसहितोऽपि, न वाजिमुख्यः = तद्रहित इति विरोधः। न वा यामाजौ = युद्धे मुख्यस्साधनभूत इति परिहारः।

---

1. M. Gr.1*। कञ्चुकी प्रविश्य।। 2. M. Gr.1, T. Gr.1 झटिति
3. M. Gr.1 तदेनमारोहत्वायुष्मान् 4. T. Gr.1 सङ्गराङ्गण
5. M. Gr.1 पुरतः

**शम्बरः** :- (सादरम्) **(१२)**

**अभियात सङ्गराङ्गण[1]मुद्भासितमरणरीतयोऽभवत।**
**अर्पयत शिरश्शत्रोरचिरेण मयापि भज्यतां खेदः।। ३३।।**

**सचिवाः :-** (आत्मगतम्) हा! धिक्कष्टम[2]यममङ्गळालिङ्गितमेव वाक्यमनुवर्णयति। तथापि कियदेतत्तृणीकृतप्राणानां हि जलनिधिरपि जान्ववधिः। (प्रकाशम्)

महाराज! साधयाम (इति सत्वरं निष्क्रान्ताः।)

**शम्बरः** :- सूत! मन्दमेव तावच्चारय स्यन्दनं यावन्मम सकलमपि सैन्यं सन्निधास्यति।

**सूतः** :- यथाज्ञापयत्यायुष्मानिति तथा कुर्वन्त्समन्तादवलोक्य, सोत्साहम्) आयुष्मन्नासन्न एव तव सैन्यमहार्णवः। पश्य।। २।।

पद्यम्- **फेनोल्लसन्मुखतुरङ्गतरङ्गशाली**
**शैलीभव[3]च्चटुलकुञ्जरपुञ्जरम्यः।**
**गर्जन्निहोल्बण[4]कृपाणकपीनमीनो[5]**
**राज्ञि त्वयि स्फुरति नन्दति सैन्यसिन्धुः।। ३४।।**

किञ्च- **(१३) अप्रच्युतोन्नतस्थानादभङ्गाभ्युदयाधुना।**
**हन्तानुज्जृम्भिता सेयमदोषा भाति वाहिनी।। ३५।।**

---

**१२.** अत्यन्तमुद्भासिनी उद्भासितमारणरीतिः रणप्रकारो येषां ते। उद्भासिता = प्रकाशिता, मरणस्य = मृते रीतिर्येषामिति च शत्रुसम्बन्धिशिरः मे अर्पयतेति प्रकृतः। शत्रूद्देशेन स्वशिरस्समर्पयतेति च प्रतीयते। मयाऽपि खेदः दुःखं भज्यतां नाश्यताम्। भञ्जो आमर्दन इति धातुपाठात्। भज-सेवायामिति धातोः भज्यतां सेव्यतामिति च प्रतीयते।

**१३.** उन्नतस्थानादूर्ध्वप्रदेशादुत्तमपदव्याश्चाप्रच्युता। भङ्गानां = तरङ्गाणां पराजयस्य च अभ्युदय = आविर्भावो नास्ति यस्या इति च बहुव्रीहिः। अनुज्जृम्भिता = अनुत्कूलिता आपो जलानि यस्यामिति बहुव्रीहौ **'ऋक्पूरब्धूरि'**त्यादिना समासान्तो प्रत्ययः। अनुज्जृम्भी = अनुदितः, तापः = युद्धजन्यसन्तापो यस्या इति च। अकालुष्या = कालुष्यरहिता स्वामिद्रोहपैशुन्यादिदोषरहिता च। वाहिनी = शरत्कालनदी सेना च भातीत्यर्थः।

---

1. M. Gr.1 सङ्गराङ्कण 2. M. Gr.1 धिक्कथम 3. M. Gr.1 खेलीभव
4. M. Gr.1 गर्जन्निहोत्बण 5. M. Gr.1 कवीनमीनो

अपि च - **मदान्धमधुपच्छटोल्बण[1]विराजिघोषोज्ज्वला**
(१४) **सुशोभनगजालसद्घनपलाशसान्द्रान्तरा।**
**प्रकाममविपल्लवा भुवि वराहवत्त्वादियं**
**भियं वितनुते नृणां बत! वरूधिनी तेऽवनी।। ३६।।**

**शम्बरः** :- (समन्तात् सैन्यमवलोक्य) सूत! सुष्ठु भवानाचष्टे।

**सूतः** :- (पुनर्निर्वर्ण्य)

**नन्दद्गन्धर्वगर्वाहितकठिनखुराघातवेगोत्थितानि**
**प्राप्तान्युज्जृम्भिकुम्भिश्रुतिपवनरयादन्तरिक्षं रजांसि।**
**अश्रूण्युष्णानि पुष्णन्त्यनिमिषसुदृशामक्षिलग्नानि पूर्वं**
**तान्येवाम्रेडयेयुः परमथ विविधास्तावकीनास्तु बाणाः।। ३७।।**

(पुनस्सोत्सहं दुन्दुभिशब्दश्रवणमभिनीय) आयुष्मन्! पश्य-

**प्रोदञ्चत्यद्य घूर्णत्प्रति निनदसमाकर्णनोदीर्णशङ्का**
**निर्यद्धर्यक्षयूथाः कुलशिखरिगुहास्सर्वतः कुर्वतीभिः।**
**गर्भं निर्भिन्दतीभिर्भयविवशदिशा दन्तिसीमन्तिनीनां**
**प्रौढध्वानच्छटाभिः प्रतिभटहृदयग्रन्थिभिद्दुन्दुभिर्नः।। ३८।।**

**शम्बरः** :- सूत! यथाभूतमेव निवेदयसि। त्वरिततरमेव रथश्चार्यतां सङ्ग्रामाङ्गणं[2] यावत् सत्वरमेव प्रतिपत्स्ये।।

---

**१४.** मदान्धा मधुपच्छटा = भ्रमरसमूहो यस्यां सा। उल्बणः = अधिकः, वीनां = पक्षिणां, राजेः = पङ्क्तेः घोषशब्दः तेनोज्ज्वला। सुशोभानां नगानां = वृक्षाणां जाले समूहे यानि घनपलाशानि बृहत्पर्णानि अत्युन्नतत्वाद्वृक्षाग्रस्थिता घना एव पर्णानीति वातैस्सान्द्रं निबिडमन्तरमवकाशो यस्यास्सा। सिंहवनगुप्तिन्या येन वराहविशिष्टत्वान्मानुषादिकृतविपल्लेशरहिता च वनी। मधुपानां मद्यपायिनां छटायास्समूहस्य उल्बणः विराजी प्रकाशमानश्च यो घोषस्तेनोज्ज्वला। सुशोभना = अत्यन्तमनोज्ञाः गजा यस्यां सा। लसन्तो घनाश्च पलाशा = राक्षसाः तैर्निबिडमध्यभागा। वरः = श्रेष्ठः, आहवो = युद्धं येषां तत्त्वाद्युद्धकौशलादपाय-लेशशून्या सेनेति चार्थः।।

---

1. M. Gr.1 च्छटोत्बण 2. M. Gr.1 सङ्ग्रामाङ्कणं

**सूतः** :- आयुष्मन्नवहितेन मया चार्यमाणोऽप्यतिवेलप्रतिकूलानिलप्रतिबद्धगतिशक्ति-कतया[1] धूर्वहाणामर्वतां मन्दमेव स्पन्दते स्यन्दनः। अतिमर्यादमेतदननुकूलचण्डानिलविजृम्भणं पश्य।

पद्यम्- **पान्थानां सान्द्रमन्धं करणमिह रजः प्रक्षिपन्नक्षिपङ्क्तौ**
**बृन्दं भिन्दन् द्रुमाणां मुहुरतिविपुले विभ्रमन्नभ्रमध्ये।**
**मन्दीकुर्वन्नखर्वध्वनिचयमुदयञ्चण्डिमा डिण्डिमानां**
**ध्वानैर्दिक्षूज्झिहानैर्मृदितजलघनोद्गारवान् घोरवातः।। ३९।।**

**शम्बरः** :- (समन्तादवलोक्य सविस्मयम्) सूत! न कदापि दृष्टचराणि नापि श्रुतचराण्येता-दृशान्युत्पातवातोज्जृम्भणानि। पश्य-

**वेदो[2]दीर्णार्णवोर्मिस्नपितहयमदाकर्षनृत्यद्रथान्तः**
**क्षुब्धब्रध्नान्युदञ्चटनशकुनगरुद्वक्रचक्रभ्रमीणि।**
**प्रौढब्रह्माण्डभाण्डोद्दळनभयपरिभ्रान्तधातॄणि बाढं**
**हन्ताक्रान्ताम्बराणि प्रबलतरमरुड्डम्बराणि प्रथन्ते।। ४०।।**

**सूतः** :- (साशङ्कम्) कष्टं भोः! कष्टम्। कथमधुना कथयन्त्यनिमित्तानि भाविनमनर्थं नः। तथा हि —

**श्लथयति गतिमश्वमण्डलीनां**
**सपदि निपातयति ध्वजं च भूमौ।**
**शिथिलयति मनोरथं रथं च**
**प्रहित इव प्रतिपक्षिणाऽनिलोऽयम्।। ४१।।**

अपि च- **कष्टं केतुरधिष्ठितो बत! निरातङ्केन कङ्केन ते**
**द्रुह्यन्ति स्वनवैकृतेन परितोऽक्षेमाय गोमायवः।**
**देवीभूस्त्रिदशद्विषां क्षितिधरैस्सा कम्पते बद्ध-**
**स्पन्दमदक्षिणं च कुरुते भीसूचनं लोचनम्।। ४२।।**

1. T. Gr.1 शक्तितया
2. M. Gr.1, T. Gr.1 वेगो

**शम्बरः** **:-** (सगर्वक्रोधम्) बालिश! किमित्थं प्रलपसि। किं नाम पामर! मह्यमपि द्रुह्यन्ति[1] दुर्निमित्तानि। शृणु भीरो!

पद्यम्- **चेतश्चलति धीराणां न निमित्तैरभावुकैः।**
**ज्वाला हि मणिदीपस्य चण्डवातैर्न कम्पते।। ४३।।**

तदद्य त्वरयैव चारय रथमायोधनाङ्गण[2]मासादयितुम्।

**सूतः** **:-** यदाज्ञापयत्यायुष्मान् - (इति तथा करोति।)

***(।। नेपथ्ये महाकलकलः।।)***

**शम्बरः** **:-** (श्रुत्वा ससम्भ्रमम्) अये! क एष भीषणोद्घोषो युद्धाजिरादुज्जिहीते।

**सूतः** **:-** आयुष्मन्नास्माकीनसचिवसङ्ग्रामावसानसङ्क्षोभसङ्घोषैर्भवितव्यम्।। अवधारयावस्तावत् - (इत्युभाववदधाते।)

***(।। पुनर्नेपथ्ये।।)***

पद्यम्- **भो भो! रात्रिचराः! पलायनपरा धिक्तान् भवद्यूथगां-**
**स्तूर्णं येहि मया तृणीकृतशरा दग्धा मदीयेषुभिः।**
**शक्तिं वस्तु ननु स्तुवे निजमुखासक्तैस्तृणैरेव यद्**
**बाणान् मे प्रतिरुध्य युद्धकृपणान् प्राणान् स्वयं रक्षथ।। ४४।।**

**शम्बरः** **:-** (श्रुत्वा सक्रोधशोकम्) कष्टमये! दुर्धरादिसचिववर्गनिर्गन्धनसन्धुक्षितोत्साहस्य हतशेषदोषाचरबलपलायनपरिहसनविनोदप्रागल्भ्यस्य प्रद्युम्नहतकस्यैव प्रलपितमिव श्रूयते।।

**सूतः** **:-** (निपुणं विभाव्य) आयुष्मन्नेवमेतत्। अद्य[3] पुनस्स्यन्दनत्वरातिशयादासन्नमेव रणाङ्गणम्[4]। आरचय तावत् पलायनपराणामस्मद्दलानामभयप्रदानम्।

**शम्बरः** **:-** (यथाह भवानिति पुरोऽवलोक्य) भो भो दैत्यभटाः! कान्दिशीका! मा भैष्ट।। २।। अयमहमखिलनिलिम्पपक्षरम्भावनदळन[5]गन्धसिन्धुरश्शम्बर एव सङ्ग्रामाङ्गणं[6] तावदलङ्करोमि। (इति प्रतिघोर्धतो युद्धाजिरमध्यमासाद्य[7] सावष्टम्भं नेपथ्याभिमुखमवलोक्य)

---

1. M. Gr.1 मह्यमपद्रुह्यन्ति 2. M. Gr.1 रथमायोधनाङ्कण 3. M. Gr.1 अस्य
4. M. Gr.1 रणाङ्कणम् 5. M. Gr.1 **दळन** इति नास्ति। 6. M. Gr.1 सङ्ग्रामाङ्कणं
7. M. Gr.1 युद्धराजिरमासाद्य

अरे दुरात्मन्! गोपार्भक!

पद्यम्- **मद्बलजितं भवन्तं पुण्यजना वीक्ष्य नन्दन्तु।**
**आयोधनाङ्गणे[1]ऽस्मिन्नसुरहितोऽयं भवेयमचिरेण।। ४५।।**

***(।। नेपथ्ये।।)***

(साधु दैत्य! साधु। सत्यमेव तव सम्भावयामि वचनम्।)

**शम्बरः** **:-** अये! कष्टमात्मनाशमभ्युपगच्छन्नागच्छतीव पशुपालशिशुः।

**सूतः** **:-** (विभाव्य)

पद्यम्- **रणाङ्गणे[2] सम्प्रति रौक्मिणेयो रथं समं सारथिना[3]ऽधिरूढः।**
**पराक्रमी प्रत्यवतिष्ठतेऽसौ सन्नह्य तूर्णं समरोत्सवाय।। ४६।।**

**शम्बरः** **:-** यदाह[4] भवानिति सन्नह्यति।

***(।। ततः प्रविशति यथानिर्दिष्टो युद्धारम्भोद्यतः प्रद्युम्नः।।)***

**प्रद्युम्नः** **:-** (सोपहासम्) अरे! दिष्ट्या सत्यमेव मद्बलजितमित्यादिनिर्गळितं तव वदनात्। यतस्त्वद्बलजयिनं मामवेक्ष्य नन्दिष्यन्त्येव पुण्यकृतो जनाः। भविताऽसि च त्वमस्मिन्नेव रणाङ्गणे[5] परासुः।

**शम्बरः** **:-** (सरोषं सानुतापं च) अरे! वृथाजल्पाक! गोपालपाक! कस्तवोपालम्भः ?

किन्तु- **शौरौ पुरो जाग्रति शैशवे त्वं माया प्रभावेन मया गृहीतः।**
**मुक्तो यया मूर्ख! महापयोधौ[6] कार्यस्य हन्त्रीं करुणां धिगेनाम्।।४७।।**

**प्रद्युम्नः** **:-** (सहासम्) अहह! रे! शिशुदशायामस्माकमम्बुनिधौ[7] पातनमेव तवानुकम्पा-मकम्पां व्याचष्टे। किन्तु-

1. M. Gr.1 आयोधनाङ्कणे 2. M. Gr.1 रणाङ्कणे 3. M. Gr.1 सारधिना
4. M. Gr.1 यथाह 5. M. Gr.1 रणाङ्कणे 6. M. Gr.1 मुधापयोधौ
7. M. Gr.1 मम्भोनिधौ

पद्यम्- **उपशममृदुलं कुलं मुनीनां विषयजिहासु शुहासुलब्धवासम्**
**अनघमनपराधिबाध[1]मानं स्फुरदुदयानदयारुणद्धि किं त्वाम्।**
**अतश्च (१५) उज्ज्वलजपानुरक्तः पलाशसमिदाहृतिव्रतविदग्धः**
**यमिन इव मे करोऽयं चापं पुष्णाति शापमिव तुभ्यम्।। ४८।।**

**शम्बरः** :- (सामर्षम्) अरे! रुक्मिणीयौवनवनपरशो! पशुपालशिशो! प्रद्युम्नपशो!।

पद्यम् **(१६) शम्बरस्य ममाप्यन्तर्जृम्भितश्शोकपावकः।**
**सुतापायसमुत्पन्नोऽप्यसुतापाय ते भवेत्।। ४९।।**

अपि च **उद्वेजको दन्तविशेषयोगस्फुरद्द्विषद्वारभयङ्करोऽयम्।**
**(१७) मन्यूरगस्साधु मदीयचेतो वल्मीकवासी दशति स्वयं त्वाम्।। ५०।।**

**प्रद्युम्नः** :- अरे! असुरापशद[2]!

**लक्ष्यालाभादति[3]चिरममी हन्त! लब्धोपवासा-**
**स्सुस्नातास्त्वत्सुतशतवपुर्गर्तकीलालजालैः।**
**आतिथ्यं द्रागसुरकुणपैराचरन्तो द्विजानां**
**बाणाश्श्रान्तायुधि विदधतां पारणं[4] प्राणतस्ते।। ५१।।**

**१५.** उज्ज्वलः = प्रकाशमानः, जपः = मन्त्रोच्चारणं, तत्रानुरक्तः = तत्संख्यागणनपर इति यावत्। पलाशसमिधां = किंशुककाष्ठानामाहृतिराहरणं तत्र यद्व्रतं नियमः तस्मिन् विदग्धस्समर्थः। यमिनो = मुनेः, करो = हस्तः विरोधिविषये शापमिव। उज्ज्वलजपानुरक्तः = विकसितजपाकुसुमपाटलः, पलाशानां = मांसादानां राक्षसानां, समिति = युद्धे, आहृतिः = आहरणं समापनं तदेव व्रतं तत्र समर्थः मे करः, चापं = धनुः पुष्णातीत्यर्थः।

**१६. शम्बरमुदकं नीरक्षीराम्बुशम्बरम्** इत्यमरः। जलस्याप्यन्तर्मध्ये तादृशशम्बरसंज्ञकस्य ममापि हृदये सुतानां = पुत्राणाम्, अपायेन = नाशेन समुत्पन्नस्सुष्ठु, तापाय = दहनाय समुत्पन्नश्शोक एव पावकोऽग्निः ते असूनां = प्रणानां, तापाय = नाशनाय भवेदित्यर्थः।

**१७.** उद्वेजकः = भयकम्पजनकः, उदन्तविशेषः = वृत्तान्तभेदः तद्योगेन स्फुरतां = द्विषतां, वारस्य = सङ्घस्य, भयङ्करः = भीतिजनकः, मन्युः = क्रोधः। उद्वेजकः = स्वभावादेव भयकम्पहेतुः। दन्ते = रदने विशेषयोगेन अधिकसम्बन्धेन स्फुरता = विषेणैव द्वारेण= उपायेन, भयङ्करः = भयकारी उरग इति चार्थः।

1. My. Tel. Print **'मुनीनां विषयजिहासु शुहासुलब्धवासम्। अनघमनपराधिबाधमानं'** इति नास्ति।
2. M. Gr.1 अरे सुरापशद 3. T. Gr.1 लक्ष्याभावादिति 4. M. Gr.1 पारणं

किञ्च- **अखिलदनुजकूटध्वंसकात् कंसकाला-**
**दधिगतजनुषो मे त्वादृशास्स्युः[1] कियन्तः।**
**जगति हरिकिशोरो जम्बुकं हन्त! जीर्यत्**
**कुणपनिगरणान्धं किं नु लक्षीकरोति।। ५२।।**

**शम्बरः** :- (सावज्ञम्) अरे! दुरात्मन्नतुलदैत्यकुलतिलकस्य शम्बरस्यापि किं नाम त्वादृशो नरपाशोऽपि लक्ष्यम्।

पद्यम्- **तेजस्विनो हि कार्येण दर्शयन्ति स्वविक्रमम्।**
**त्वादृशाः कत्थनं व्यर्थं कुर्वते खर्व तेजसः।। ५३।।**

**प्रद्युम्नः** :- अरे! किमधुनाऽपि कार्यं नोपलभसे। अहो! तव मतेरतिमांसलता। यत एतादृशं रणाङ्गण[2]मालोकयतोऽपि ते न विवेकोदयः। पश्य इह हि-

पद्यम्- **जिह्वाचापलबंभ्रमत्खगचमू विक्षिप्तपक्षानिल-**
**क्षिप्रोत्सारितमक्षिकं नवनवोन्मिलद्वसा[3] वासनम्।**
**दन्तग्राम[4]नवास्थिघर्षणरयोद्भिन्नस्फुलिङ्गच्छटापक्कं**
**द्राक्कपिशं[5] पिशाचशिशवः खादन्ति खण्डामिषम्।। ५४।।**

इतश्चावलोकय —

**छिद्रोत्सृत्वरकोष्णशोणितरसोन्मत्तोग्रगृध्रच्छटा**
**भुक्तोच्छिष्टकया तया मदिति जप्रेताङ्गगूढं पलम्।**
**गाढालीढकरोटिघट्टनभवक्रांकारघोरस्फुटद्दंष्ट्रं[6]**
**क्रोष्टुशतेन चापलवता हा! कष्टमुत्पाट्यते।। ५५।।**

इतश्च दक्षिणतश्चक्षुराधीयताम्-

पद्यम्- **प्रत्यग्रामिषवर्गमार्गणविधौ लग्नः पदाग्रेष्वहो!**
**ग्रन्थिः पत्रिनिकृत्तनैर्वृतवपुर्नाडीशतैर्गुम्भितः।**
**दुर्मोचो विकृतं स्वनद्भिरधुना भासैर्नटत्त्रोटिभि-**
**र्विस्त्रप्रस्त्रवदस्त्रपानबलिभिर्विस्त्रस्यते यत्नतः।। ५६।।**

1. M. Gr.1 त्वादृशस्स्युः 2. M. Gr.1 रणाङ्कण 3. M. Gr.1 नवनवोन्मीलद्वसा
4. M. Gr.1 दन्तग्रावा 5. M. Gr.1 द्राकपिशं 6. M. Gr.1 स्फुटद्दंष्ट्र्यं

उत्तरतश्चेह प्रहिणु दृष्टिम्-

**अस्मन्मुक्तैः पत्रिसारैर्निकृत्तास्तत्ताद्दक्षास्तावकीनास्तनूजाः।**
**व्यादायास्यं शेरते मीलदक्षं कंकारूढास्पष्टदंष्ट्रं[1] क्षमायाम्।। ५७।।**

**सूतः** :- (स्वगतम्) कष्टमसौ व्यापारान्तरव्यासङ्गविस्मृतामपि पुत्रविपत्तिं[2] पुनः पुनरनुस्मारयति।।

**शम्बरः** :- (सबाष्पं निर्वर्ण्य) मुहूर्तमिव ध्यायन् मोहमुपगच्छति।।

**प्रद्युम्नः** :- (सूतमुद्दिश्य) यावदयं पापः पुनरपि संज्ञामासादयिष्यति तावद्वयमपि समरश्रमापनयनं करवामः।।

**सूतः** :- तदायुष्मन्! साम्प्रतं नातिदूरलक्षितमारामं समया गमयामि स्यन्दनमिति तथा करोति।

**प्रद्युम्नः** :- (पुरोऽवलोक्य) अये! केयमस्मत्सम्मुखी वा सत्वरा परापतति।

**सूतः** :- आयुष्मन्! नूनमसौ मायावत्याः पादमूलोपसेविनी कलकण्ठी।

**प्रद्युम्नः** :- (सहर्षवितर्कम्) अपि नूनमियमतिभयानकरणारम्भश्रवणाद्दुर्मनायमानया तयैव प्रियतमया प्रहिता स्यात्।।

**सूतः** :- प्रणयातिशयः खलु प्राप्तसविशेषदर्शनानामपि पापशङ्कादायी[3]।

**प्रद्युम्नः** :- एवमेवैतत्।[4]

***(।। प्रविश्य कलकण्ठी।।)***

**कलकण्ठी** :- अय्य![5] पणमामि। *(आर्य! प्रणमामि।)*

**प्रद्युम्नः** :- भद्रं भवतु भवत्यै। अयि! कलकण्ठि! कस्तव साम्प्रतमत्रागतौ हेतुः।

**कलकण्ठी** :- देवीए माआवदीए[6] णिओओ। *(देव्या मायावत्या नियोगः।)*

**प्रद्युम्नः** :- तत्र वा को हेतुः ?

---

1. M. Gr.1 कंकारूढस्पष्टदंष्ट्रं
2. M. Gr.1 पुत्रविवर्तं
3. M. Gr.1 पापशङ्काध्यायी
4. M. Gr.1 एवमेतत्
5. M. Gr.1, T. Gr.1 अंअ
6. M. Gr.1 माआवईए

**कलकण्ठी** :- विविह-माआ-विअक्खण-सम्बर-रणारम्भ-सवणादो दुम्मणायमाणाए ताए[1] तावईण क्खेम जिण्णासा। *(विविधमायाविचक्षणशम्बररणारम्भ-श्रवणाद्दुर्मनायामानाया-स्तस्यास्तावकीन[2] क्षेमजिज्ञासा।)*

**प्रद्युम्नः** :- कलकण्ठि! कं प्रदेशं सा कृतार्थयति ?

**कलकण्ठी** :- अय्य! एदं[3] एव्व कीळारामं। *(आर्य! एतमेव[4] क्रीडारामम्।)*

**प्रद्युम्नः** :- (सहर्षरोमाञ्चम्)

पद्यम्- **वनमिदं व्रजताश्रमशान्तये**
**प्रियतमापि मया परिरप्स्यते।**
**कुतुकिनः कुसुमादळि[5]सङ्ग्रहे**
**करपुटे तदिदं मधुसेचनम्।। ५८।।**

(नाट्येनावतीर्य सूतं प्रति) अये! यावदि ममारामदेशमासाद्य निर्धूतश्रमेण मया पुनरागम्यते तावदेषां[6] धुर्याणां हरीणां स्नपनादिभिश्श्रमशमनमाचरतु भवान्।

**सूतः** :- यदादिशत्यायुष्मान्! (इत्यश्वान् मोचयति।)

**प्रद्युम्नः** :- अयि! प्रदर्शय तावदुपवनपदवीम्।।

**कलकण्ठी** :- अय्य![7] इदो इदो।। *(आर्य! इतः।। २।।)*

**प्रद्युम्नः** :- (परिक्रम्य पुरोऽवलोक्य सश्लाघम्)

पद्यम् **(१८)** **मरुदर्भकाभिरामो मांसाशं क्लेशयन्नतनुबाणैः।**
**सामोदभूमिजाप्तस्स पुष्पको राजते महारामः।। ५९।।**

---

**१८.** मरुभिः = दर्भकैर्दर्भैः, मरुतः अर्भकेन = मन्दमारुतेन वा आञ्जनेयेन चाभिरामः = मनोज्ञः। अतनुबाणैः = मन्मथबाणैः, तद्रूपकुसुमैस्साशं कान्तासङ्गाभिलाषिणं मां क्लेशयन् = पीडयन्, अधिकबाणैर्मां साशं राक्षसमन्दयंश्च, सामोदैः = कुसुमसौरभयुतैः, भूमिजैः = वृक्षैः, सामोदया = सन्तुष्ट्या, भूमिजया = सीतया चाप्तः, सपुष्पकः = पुष्पसहितः पुष्पकाख्यविमानसहितश्च। महानारामः। महान् रामश्च राजते इत्यर्थः।

---

1. M. Gr.1 सवणदो दुंमणाए ताए, T. Gr.1 सवणादो दुंमणाअमाणाए ताए
2. M. Gr.1 श्रवणदुर्मनायमानया तया तावकीन
3. M. Gr.1 अंअ एअं, T. Gr.1 अंअ एदं
4. M. Gr.1 एनमेव
5. M. Gr.1 पुनरास्यते तावदेतेषां
6. M. Gr.1 कुसुमावळि
7. M. Gr.1, T. Gr.1 अंअ

(पुनस्सोत्कण्ठम्) इह हि-

**शक्यं क्रीडामृदितयुवतिश्रान्तिहारिप्रचारा-**
**स्तोकोन्मीलद्वकुळमुकुळोदारसौभाग्यधन्याः।**
**मल्लीच्योतन्मधुरसझरीमज्जनोन्मज्जनाभ्यां**
**प्राप्तास्वादाः पवनकणिकाः पातुमालिङ्गितुं वा।। ६०।।**

(इत्यारामं प्रविश्य) कलकण्ठि! कस्य वा विटपिनश्छायामपि सफलयति दयिता ?

**कलकण्ठी** :- अय्य![1] तुह जअसिद्धिकदे[2] णिहिलभुवणजणणिं णळिणवणवासिणिं भत्तीए णिज्झाअंती कमलिणीतडालंकार-वउळतरुमूलवेइअं कदत्थेदि देवी। इदो भअं आअच्छदु। अहन्तु[3] अग्गदो एव्व गदुअ तुह आअमण संदोस[4]-णिवेअणेण देवीए सलाहणिज्झा[5] होज्झा।

*(आर्य! तव जयसिद्धिकृते निखिलभुवनजननीं नळिनवासिनीं[6] भक्त्या निध्यायन्ती[7] कमलिनीतटाकालङ्कार-[8]वकुळतरुमूलवेदिकां[9] कृतार्थयति देवी। इतो भवानाच्छतु। अहं त्वग्रत एव गत्वा तवागमनसन्तोषनिवेदनेन देव्या श्लाघनीया भविष्यामि।।*

(इति सत्वरं निष्क्रान्ता।)

**प्रद्युम्नः** :- (परिक्रम्यावलोक्य च) अत्र हि-

पद्यम्- **तुङ्गस्तनभरनम्रं वितस्ति विस्तीर्णलोचनं किमपि।**
**नयनासेचनकमिदं नास्तिकमध्यं चकास्ति पुरतो मे।। ६१।।**

(पुनर्निर्वर्ण्य सश्लाघम्)

**अस्याश्चेदधरः किमस्ति सुषुमासं[10] पल्लवैः पल्लवै-**
**स्सल्लापो यदि ना ऋते बहुमतिं सद्यस्तनी गोस्तनी।**
**वक्त्रश्रीर्यदि[11] वारिजद्युतिरिहोन्निद्रा[12]दरिद्राति सा**
**रूपं चेदभिरूपवस्तु रसिके रम्भा न सम्भाव्यते।। ६२।।**

1. M. Gr.1, T. Gr.1 अंअ
2. M. Gr.1 जअसिंधीकए
3. M. Gr.1 मूलवेदिअं किदंथेइ इदो भवं आगच्छदु अहंदु
4. M. Gr.1 आगमण संतास
5. M. Gr.1 सिलाहणिंजा
6. M. Gr.1, T. Gr.1 नळिनवनवासिनीं
7. M. Gr.1 निदिध्यायन्ती
8. M. Gr.1 तटालङ्कार
9. M. Gr.1 मूलवेदिकं
10. M. Gr.1 किमस्त सुषमासं, T. Gr.1 किमस्ति सुषमासं
11. M. Gr.1 वक्तृश्रीर्यदि
12. M. Gr.1 द्युतिरिहोनिद्रा

यद्वा- **अस्याश्चेदधरामृतं मधुरता मन्दो मरन्दोऽभवे-**
**दास्य प्राभवदर्शिनां हिमरुचेर्धामापि धूमायते।**
**तन्वङ्ग्याः कुचकुम्भतत्त्वविदुषां मेरुर्न चारुर्भवे-**
**द्दन्ताळीमहिमैकगोचरधियां कुन्दोऽपि निन्दोचितः।। ६३।।**

(किञ्चिदन्तरं गत्वा सहर्षम्) अधुना किल! हर्षभरसुप्रसन्नमुखी सह सखीभ्यां प्रत्युद्गच्छति मां प्रियतमा। तद्यावदेव देवी प्राभातिककोकनदपरिपाटलं जातिकुसुममृदुलं चरणयुगळं भूयसा भूतलन्यासेन क्लेशयेत्तावदेव मया द्रुततरमभिगन्तव्यम् - (इत्यभिगच्छति।)

***(।। ततः प्रविशति मायावती सख्यौ च।।)***

**सख्यौ** **:-** अम्ह! हे राअउत्त! दूसह-विरहादव-प्पमुसिद[1]-प्पसाअस्स सहीए हिअअ-कुमुअस्स तुह मुहसुहा अरालोएण दाणिं खु[2] विआसो होदि[3]।।

*(अहो! राजपुत्र! दुस्सहविरहातपप्रमुषित[4]प्रसादस्य सख्या हृदयकुमुदस्य तव मुखसुधाकरालोकेन इदानीं[5] खलु विकासो भवति।)*

**मायावती** **:-** (सबाष्पनयना जोषमास्ते।)

**प्रद्युम्नः** **:-** अयि! क्षत्रियाणि! कृतमस्मास्वरिपक्षतः[6] पापापत्तिशङ्कया। शृणु तावत्।

पद्यम्- **मदविधुतनिलिम्पं मंक्षुसैन्यं व्यलुम्पं**
**सचिवगणमजैषं शत्रुपुत्रान् व्यनैषम्।**
**द्रुहिणललितसृष्टे द्विड्जयेऽल्पावशिष्टे**
**मनसि तव भृशं का मत्कृते पापशङ्का।। ६४।।**

परन्तु- **शत्रुपत्रिपटलैः क्षतगात्रं साम्प्रतं च सुमुखि! स्मरबाणैः।**
**स्नेहमञ्जुलकुचोष्मनि वेशान्निर्व्रणं[7] कुरु नितम्बिनि! मां त्वम्।। ६५।।**

---

1. M. Gr.1 पमुसिअं 2. M. Gr.1 अरालोअ एणे हिं खु 3. M. Gr.1 होइ
4. M. Gr.1 विरहदवप्रमुषित 5. M. Gr.1 करालोकनेन
6. M. Gr.1 कृतमस्मस्वप्यरिपक्षतः, My. Tel. Print. कृतमुस्मास्वरिपक्षतः
7. M. Gr.1 वेशानिर्घ्रणा

**मायावती** **:-** (नखाग्रैरश्रूण्यपनीय) अय्यउत्त![1] मह पावाए कदे[2] तुमं सि दुम्मरिस-दइच्च-संगाम-व्यावारपडीसंतो[3]। ता अज्ज तामरसिणी सलिलकणाकरिसण-सिसिरदाहिण[4]-समीरणंदोळिद-वउळविडवि-समोप्पिद-पोप्फ[5]विट्ठिसुहअं एदं[6] वेदिआमज्झं विबूसेहि।।

*(आर्यपुत्र! मम पापायाः कृते त्वमसि दुर्मर्षदैत्यसङ्ग्रामव्यापारपरिश्रान्तः। तस्मादद्य[7] तामरसिनी सलिलकणाकर्षणशिशिरदक्षिणसमीरणान्दोळितवकुळविटपि[8] समर्पितपुष्पवृष्टि-सुभगमेतं वेदिकामध्यं विभूषय।*

**प्रद्युम्नः** **:-** मदगजगमने! त्वमपि मदभिगमनायासपुनरुक्तपदकमलपरिपाटलिमा सह सखीभ्या-मधिवकुळतरुमूलवेदिकमुपविश।

***(।। इति सर्वे नाट्येनोपविशन्ति।।)***

**प्रद्युम्नः** **:-** (मन्दानिलस्पर्शमभिनीय) मन्दस्मिते! मन्दानिलोऽयं न केवलं श्रमापनयनेन ममोपकर्ता। किन्तु-

पद्यम्- **दिगन्तानाकीर्णैर्घुमुघुमयति स्मेरकुसुमै-**
**गृहीतैः कासारादवनिमुदकैश्शीतलयति।**
**नियुङ्क्ते लास्याय प्रसभमनिलस्सुभ्रुलतिका**
**ममैष त्वत्पाणिग्रहमहमिह प्रक्रमयति।। ६६।।**

(समन्तादवेक्ष्य) मदिराक्षि! मदनमहोत्सवमुहूर्तश्च सम्प्रति सन्निधत्ते। यतः- परिणतप्रायमेव दिवसम्। पश्य-

पद्यम्- **कामी रविः कमलिनीं सुचिरोपभुक्तां**
**निद्रावतीं परिहरन्विदितावकाशः।**
**रागाविलोऽभिसरति च्यवदंशु कोऽयं**
**प्राचेतसीं दिशमहोपरिरब्धुकामः।। ६७।।**

---

1. M. Gr.1, T. Gr.1 अंअउंत 2. M. Gr.1 कए 3. M. Gr.1 संगामं वावारपडिसंतो
4. M. Gr.1 कंडणसिसिरदंखिण, My. Tel. Print. करिसणसिसरदाहिण
5. M. Gr.1 दोळिअ-उवळविडवसमंपिदपुंफ
6. M. Gr.1 एअं 7. M. Gr.1 तदद्य 8. M. Gr.1 विटप

**मायावती** :- (सलीलं निर्वर्ण्य सस्मितम्) अय्यउत्त![1] कहं कमलिणी-वल्लहस्स सङ्गामभीमसत्तुपत्थिव-विसिट्ठसरसद-विअळिद-सरीरंस वीरस्स[2] भवारिसस्स विअएत्ताहे[3] अदिमेत्तं मुत्तीए अरुणत्तणम्[4]।

*(आर्यपुत्र! कथं कमलिनीवल्लभस्य सङ्ग्रामभीमशत्रुपार्थिवविसृष्टशरशतविदळितशरीरस्य[5] वीरस्य भवादृशस्येव इदानीमतिमात्रं मूर्त्यामरुणत्वम्[6]।।)*

**प्रद्युम्नः** :- प्रिये! पर्यनुयोज्यमेवैतत्। यदेतावन्तं कालमनालक्षितं सावित्रे गात्रे[7] साम्प्रतमेव प्रत्येति कमपि रक्तिमानं जनः। इत्थमत्रोल्लिखामि। **(१९)**

पद्यम्- **भूतोद्वेगकरैः करैः कुवलयं तीक्ष्णैरुपक्लेशय-**
**न्नुद्दण्डः परिक्लृप्तपङ्कजरुचिः पातासुराणामसौ।**
**प्रध्वस्तद्विजराजदीप्तिरधुना प्राप्ते शरीरात्यये**
**नूनं सानुशयो दधाति जरठः पूषाकषायांशुकम्।। ६८।।**

**मायावती** :- (निपुणं निर्वर्ण्य) अय्यउत्त![8] एव्वं एद्ध सम्भावेमि।

पद्यम्- **मत्तण्डमत्थसेले घेत्तुमणा मंसपेंडबुद्धीए।**
**चलिदापरजलहित्तो झिज्झदि संझातदुत्थ विअणाए[9]।। ६९।।**

---

**१९.** भूतानां = प्राणिनां पिशाचादीनां च, करैः = राजग्राह्यद्रव्यैः किरणैश्च। कुवलयम् = भूमण्डलं नीलोत्पलं च। पङ्के = पापे जाता रुचिः, पङ्कजेषु = कमलेषु रुचिरनुरागश्च। सुराणां = मद्यानां पातापिबः। सुराणां = देवानां रक्षकश्च प्रध्वस्ता = नाशिता, द्विजराजस्य = ब्राह्मणश्रेष्ठस्य, दीप्तिर्वर्चः यस्येति। प्रध्वस्ता द्विजराजस्य = चन्द्रस्य दीप्तिर्येनेति च। सानुशयः = पश्चात्तापसहितः। सानु निशेते इति सानुशय इति चार्थः।

---

1. M. Gr.1, T. Gr.1 अंअउंत!
2. M. Gr.1 विसिंठसरसअ-विअळिअ-सरीरंस-वीरंस, My. Tel. Print. सरीसस्य वीरस्स
3. M. Gr.1 विअंताहे
4. M. Gr.1 आरुणंतणम्।
5. M. Gr.1 शत्रुपत्रिव्यसृष्टशरशकलितशरीरस्य
6. M. Gr.1 इवात्रातिमात्रं मूर्तेः अरुणत्वम्।
1. M. Gr.1 गोत्रे
2. M. Gr.1, T. Gr.1 अंअउंत!
3. M. Gr.1 **चलिआपरजलहि झाओ संपेंझातदुंथ विअणाए।**

*(आर्यपुत्र! एवमत्र सम्भावयामि।*

***मार्तण्डमस्तशैले गृहीतुमना मांसपिण्डबुद्ध्या।***
***चलिताऽपरजलधेः क्षीयते सन्ध्यतदुत्थवेदनया।। ६९।।[1])***

**प्रद्युम्नः** :- पश्य दयिते! परिपाटलमर्धमण्डलं चाण्डकरम्।

पद्यम्- **वरुणदिशा हरिणदृशो वक्षोजे नियतमस्तगिरिरूपे।**
**शङ्के नखपदरेखां शोणं चण्डकरमण्डलीखण्डम्।। ७०।।**

(परितोऽवलोक्य सचमत्कारम्) अद्य हि **(२०)**

पद्यम्- **साकं शाखिकुलैः पतङ्गपतनक्षुब्धं समुद्रोदरम्।**
**सन्ध्याभूमिसुधान्धसां परिषदा सार्धं जपोद्यद्रुचिः।**
**कासारैस्समुच्चकैरवजुषो भृङ्गास्सरोजत्यज-**
**स्सत्राघूकवि[2]लोचनैर्वियदिदं स्वैरं स्फुरत्तारकम्।। ७१।।**

**मायावती** :- (पुरोऽवलोक्य सहर्षम्) कहेहि अय्यउत्त![3] का इमाओ कालुम्मीलिदसिदार[4]-विंदकिसरकअंब-विडंबणलद्धवण्णवण्णाओ पहाओ हरिहरिआए मुहं अलंकरंदि[5]।।

*(कथयार्यपुत्र! का इमाः कालोन्मीलितसितारविन्दकेसरकदम्बविडम्बनलब्धवर्णवर्णाः[6] प्रभाः हरिहरितो मुखमलङ्कुर्वन्ति[7]।)*

---

**२०.** शाखिनां = वृक्षाणां, कुलानि पतङ्गानां = पक्षिणां सूर्यस्य च। भूमिसुधान्धसो भूदेवाः = ब्राह्मणाः। जपे = मन्त्रजपे उद्यन्ती रुचिरभिलाषो यस्यास्सा जपाकुसुमवदाविर्भूतरागेति चार्थः। भृङ्गाः उच्चकैरधिको रवश्शब्दस्तज्जुषः उच्चानि कैरवाणि जुषन्तीति तादृशाः कासाराश्च। स्फुरन्त्यस्तारका = नक्षत्राणि अक्षिकनीनिकाश्च।

---

1. M. Gr.1 इयं छाया नास्ति।
2. M. Gr.1 स्साकं घूकवि
3. M. Gr.1 अंअउंत
4. M. Gr.1 कालंमीलिअसिआर
5. M. Gr.1 अलंकुणंति।
6. M. Gr.1 लब्धवर्णाः
7. M. Gr.1 मुखमलङ्करोति।

**प्रद्युम्नः** :- शृणु शशिवदने!

पद्यम्- **नवकुवलयश्रेणीहासप्रदानविदूषका-**
**नळिनविततेर्नूनं मौनव्रतार्पण-ऋत्विजः।**
**घनतमतमो[1]वेताळौघ प्रतारण[2]भूतयो**
**ददति हृदये हर्षाङ्कुरं कराः प्रथमे विधोः।। ७२।।**

(क्षणमवलोकयन्नङ्गुळ्या निर्दिश्य) विलोकयैतत्तलोदरि! विलोचनयोरासेचनकम्। यदिदमिदानी-मुदयते।

पद्यम्- **अन्तस्सन्ततरूढबाडबशिखाप्रौढज्वरप्रज्ज्वलत्**
**पारावारशरीरपुष्टिघटनागोक्षीरधारामयैः।**
**विश्वा स्कन्दनतस्कर[3]स्मरमहावीराट्टहासायितै-**
**र्लोकानन्दकरैः करैर्दश दिशः प्रौर्णोति[4] पूर्णो विधुः।। ७३।।**

किञ्च- **कोकीनामपमृत्युरध्वगगतेः कर्पूरसारोच्चयो**
**नेत्रान्धं करणस्स्मरस्य जयिनो[5] नीराजना भाजनम्।**
**आमिक्षा निचयश्च कोरसुदृशामक्ष्णोः फलं**
**मादृशां सीदत्कैरवबोधसिद्धघुटिका[6]शीतांशुरुज्जृम्भते।। ७४।।**

अपि च- **अभाग्यं पद्मानामचरमरसद्रोणकलश-**
**स्सुधाब्धेरानन्दस्सुरगणसुधासोमचमसः।**
**प्रहर्षं पूर्णेन्दुः प्रथयति मनोभूमखविधेः**
**पुरोडाशः पूर्वक्षितिधरशिरोवेष्टनपटी।। ७५।।**

किं बहुना- **कुठारः कोकानां कुमुदशिवरात्रिव्रतगुरु-**
**र्निलिम्पश्रेणीनां नियतममृता सारकरकाः।**
**महेन्द्राशादीपो मदननृपजैत्रध्वजपट-**
**स्सुधाभानूराका सुकृतपरिपाको विजयते।। ७६।।**

---

1. M. Gr.1 घनतरतमो  2. M. Gr.1 प्रतारुण  3. M. Gr.1 स्कन्दनतत्पर
4. M. Gr.1 प्रोर्णोति  5. M. Gr.1 जयतो  6. M. Gr.1 सिद्धमुळिका

**मायावती** **:-** (निपुणं विभाव्य) को नु सो अय्यउत्त! कुमुअबन्धुणो मण्डलमज्झम्मि सदमहमणि[1]-सअलपुंजसच्छाओ[2] काळिमाणो लक्खीयदि[3]। *(को नु स आर्यपुत्र! कुमुदबन्धोर्मण्डलमध्ये शतमखमणिशकलपुञ्जसच्छायः[4] कालिमालक्ष्यते।)*

**प्रद्युम्नः** **:-** सुधाकरवदने तदनेकधा बुधाः कथयन्ति। तथा हि-

पद्यम्- **सारङ्गीति पयोधिकर्दम इति च्छाया धरित्र्या इति**
**क्रुध्यद्राहुरदाभिघातकिण इत्यन्तर्नभश्रीरिति।**
**मन्थानाचलघर्षणप्रणमिति ज्योत्स्नीषु[5] पीतं तमः**
**कुक्षौ लक्ष्यत इत्यपि क्षितितले लक्ष्मेदमुत्प्रेक्ष्यते।। ७७।।**

अस्माकं पुनरित्थमत्र प्रतिभाति-

**पित्रापत्यसहिष्णुना हिमरुचा पाथोनिधेश्शोषक-**
**स्सप्तार्चिः कबळीकृतस्तदमृ[6]तैरिङ्गालतां प्रापितः।**
**तत्कुक्षावभिलक्ष्यते सखि! न चेत्तस्योदये तोयधिः**
**कामं कामपि वृद्धिमेति नियतं कस्मादकस्मादसौ।। ७८।।**

**विचक्षणा** **:-** राअउत्त! एदं एव्व जुत्तिजुत्तं। *(राजपुत्र! एतदेव युक्तियुक्तम्।)*

**मनोरमा :-** (निरूप्य) सहीओ अहं एद्ध इत्थं संभावेमि।

पद्यम्- **पहामिसादो पअसाअरस्स ससंकसंखं घण[7]दुद्धसारम्।**
**पिदामहो[8] पूरिअ सो च ओरकिसोरवत्तेसु सअं पदेदि[9]।। ७९।।**

*(सख्यावहमत्रेत्थं सम्भावयामि।*

***प्रभामिषात् पयस्सागरस्य शशाङ्कशङ्खं घनदुग्धसारम्।***
***पितामहः पूरयित्वा स च कोरकिशोरवक्त्रेषु स्वयं प्रददाति।। ७९।।[10])***

---

1. M. Gr.1 सअमहमणि
2. M. Gr.1 सअलपुंजसरिंछसुं छाओ
3. M. Gr.1 लंखीआदि।
4. M. Gr.1 पुञ्जसदृशसुच्छायः
5. M. Gr.1 ज्यौत्स्नीषु
6. M. Gr.1 कृतस्तदनु
7. M. Gr.1 खण
8. M. Gr.1 विदामहो
9. M. Gr.1 पदेइ।।
10. M. Gr.1 इयं छाया नास्ति।

**प्रद्युम्नः** :- (विभाव्य सानन्दम्)

**लोकलोचनसुधौघशीकराः कोककोकनदशोकभीकराः।**
**उन्मदत्कुवलयाकराः करास्सम्मदं ददति शार्वरीकराः।। ८०।।**

**(२१) अत्रिलोचनभूस्सोऽयं यस्त्रिलोचनभूरपि।**
**अमारजन्यप्रकाशो मारजन्यप्रकाशकः।। ८१।।**

**(२२) अप्येतन्मण्डलं चान्द्रमन्धकारातिमण्डनम्।**
**आहुस्तन्वि! कथंकारमन्धकारातिखण्डनम्।। ८२।।**

(पुनस्सविस्मयम्।)

**(२३) तुषारभानौ त्रिपुरारिचूडापीडाकृतिख्यातिविराजमाने।**
**कृष्णान्तरङ्गे कथमर्जुनेऽस्मिन्नक्षत्रनेतेति ननु प्रवादः।। ८३।।**

(निरूप्य मायावतीं प्रति।)

**धात्रा दैवतभागकल्पनकृते दुग्धाम्बुधेरुद्धृतं**
**सन्ध्यापावकतश्शृतं नवपयस्तारादधिश्लेषणात्।**
**आमिक्षा हविरात्मना परिणतं मन्ये विधोर्मण्डलं**
**जातं नूनमिदं ततः प्रसरति ज्योत्स्नामयं वाजिनम्।। ८४।।**

यद्वा- **मन्दस्मिते! मण्डलमेतदिन्दोः कन्दर्पकौक्षेयकशाणचक्रं।**
**मध्ये तु तद्घर्षणतो विलग्नं मालिन्यमेतन्मदिराक्षि! मन्ये।। ८५।।**

---

**२१.** सोऽयं चन्द्रः त्रिलोचनश्शिवः भूराश्रयो यस्य तादृशोऽपि त्रिलोचनभूर्नेति विरोधः। अत्रिमहर्षिनयनसम्भव इति परिहारः। मारस्य = मन्मथस्य, जन्यं = युद्धं सुरतमिति यावत्। तस्य प्रकाशकः उद्दीपिकत्वादिति भावः। तादृशोऽपि मारजन्यप्रकाशको न भवतीति विरोधः। अमावस्या = रात्रावप्रकाशक इति परिहारः।

**२२.** अन्धकारातेश्शिवस्य मण्डनं = शिरोभूषणम्। अन्धकाराणामत्यन्तपरिहारकमिति चार्थः।

**२३.** त्रिपुरारेश्शिरोभूषणरूपाकारजन्यख्यात्या चूडायाः = शिरसः पीडायाः कृतिः धनुषा व्रणोत्पादनं तज्जन्यख्यात्या च। कृष्णान्तरङ्गे = नीलमध्यभागे श्रीकृष्णप्रियमित्रे इति चार्थः। अर्जुने = धवळे। तन्नामके पार्थे च। नक्षत्रनेता = तारानाथः क्षत्रियनायको नेति च प्रवाद इत्यर्थः।

**मायावती** **:-** (साशङ्कम्) अय्यउत्त[1]! कहं सहोअर[2]-राओदअ-समएसु णिअमेण णिअभवण-दुवारसंवरणं करेदि देवीकमलवासिणी[3]।। *(आर्यपुत्र! कथं सहोदरराजोदयसमयेषु नियमेन निजभवनद्वारसंवरणं करोति देवी कमलवासिनी[4]।)*

**प्रद्युम्नः** **:-** अरविन्दमुखि! यद्यपि दुर्वचोत्तरोऽयमनुयोगः तथाप्यत्रैवमभिदधामि।

पद्यम्- **विच्छिन्नमब्दशतकव्यवधानतो यत्**
**सन्दर्शनं सह भुवश्शशिनः कदाचित्।**
**तस्माद्रमा तदवलोकनवर्जनाय**
**तस्योदये स्वगृहमन्वहमावृणोति।। ८६।।**

(जोत्स्नातिशयं विभाव्य-)

**तुहिनमयूखमण्डलतुषारमहीधरतः**
**प्रसृमरकौमुदी सुरनदी[5] बहुळोर्मिकणाः।**
**हततमसो गिरीशमकुटीसुभगंकरणा**
**जगदवदातयन्ति शरणीकृतविष्णुपदाः।। ८७।।**

**मायावती** **:-** (अनुमोदते।)

**प्रद्युम्नः** **:-** (सानुरागम्।)

**इह जोत्स्नावीचीपरिचयवदिन्दूपलकुल-**
**क्षरत्साराकर्षक्षपितपरितापस्सुवदने!।**
**स्मराध्यायाचार्यः स्मितकुवलयाश्लेषसुरभि-**
**र्मरुड्डिम्भः कुम्भस्तनि! हृदयमेतन्मदयति।। ८८।।**

(सादरातिशयं चान्द्रमेव बिम्बमवलोकमानां दयितामुद्दिश्य सतृष्णोद्रेकम्) मुग्धे! कृतमेतस्य मुखसौष्ठवद्रोहिणो दोषाकरस्य मुहुरवलोकनेन किन्तु-

1. M. Gr.1 अंअउंत
2. M. Gr.1 सहोदर
3. M. Gr.1 करेइ देईकमलवासीणी।
4. M. Gr.1 कमलवासीनी।
5. M. Gr.1 सुरधुनी

पद्यम्- **मुखं कुरु मदुन्मुखं मुकुरमित्रवक्त्रे मुहुः**
**विपक्षभयसङ्कुचद्वपुरयं शशीमास्म भूत्।**
**अपाङ्गपदमातनुस्वयमनङ्गतप्तं तु मां**
**कळङ्कहरिणः पुनः कुमुदिनी सखान्मापगात्।। ८९।।**

(कान्तामुखारविन्दमिन्दुं चावलोक्य)

पद्यम्- **चिरं वक्त्रेणास्याश्चिकुरभरकान्तिप्रणयिना-**
**ऽतुलां चेदारोढुं तुहिनकरकामं स्पृहयसे।**
**तदा गाढं सख्यं तिमिरनिकरैराचर जवा-**
**दवाप्नुह्यब्दानां ततिभिरविनाभावमथवा।। ९०।।**

**मायावती** **:-** (लज्जावनतमुखीजोषमास्ते[1]।)

**प्रद्युम्नः** **:-** (सोत्कण्ठम्) अद्य खलु-

पद्यम्- **एणाङ्कः कुमुदं करैर्दळयति क्रूरस्मरो मां शरै-**
**स्सुस्निग्धं द्रवतीन्दुकान्तपटलं चेतश्च मुग्धे मम।**
**आलेढुं मुहुरभ्युदञ्चति रसं ज्यौत्स्नं चकोरीगणो**
**मद्वक्त्रञ्च तवाधरामृतरसं मन्दस्मिते! लक्ष्यताम्।। ९१।।**

***।। नेपथ्ये दुन्दुभिध्वनिः।।***

**मायावती :-** (ससंभ्रमोद्वेगम्) अय्यउत्त![2] परित्ताअसु।। २।। *(आर्यपुत्र! परित्रायस्व।। २।।[3])*

(इति गाढमाश्लिष्यति[4]।)

**मनोरमा** **:-** (साभ्यर्थनम्) संरक्खदु महावीर! सहिं संबरादो भवम्।
*(संरक्षतु महावीर! सखीं शम्बराद्भवान्।।)*

---

1. M. Gr.1 जोषं भवति।
2. M. Gr.1. T. Gr.1 अंअउंत!
3. M. Gr.1 इयं छाया **आर्यपुत्र परित्रायस्व।। २।।** इति नास्ति।
4. M. Gr.1 सुगाढमाश्लिष्यति।

**प्रद्युम्नः** :- (सावज्ञम्) मनोरमे! मा भैषीः। कियदेतदस्य हरिकिशोरस्य। किन्तु मदीयमनोरथबन्धुरेवैष दुन्दुभिघोषः। पश्य-

पद्यम्- **चटुभिरसकृन्नर्मालापैरयाचितया भयात्**
**कलवलयनिक्वाणं कण्ठग्रहस्सहसा कृतः।**
**उरसि च कुचामर्दो दत्तस्सुमुद्रितमौक्तिकं**
**स्वयमपगतद्वैतं तन्व्या परिष्वजमानया।। ९२।।**

(मायावतीमुद्दिश्य सस्मरपारवश्यम्)

**प्रकृत्या वासन्ती प्रसवमृदुलायास्तव दृढं**
**परिष्वङ्गं कर्तुं प्रणयिनि! विभीतौ मम भुजौ।**
**तथापि त्वत्पीनस्तनसरभसामर्दविवशं**
**नियुङ्क्ते कामो मां निबिडपरिरम्भाय विदयः।। ९३।।**

(इति[1] गाढं परिष्वज्य) शृणु सुश्रोणि!

पद्यम्- **दृढतर[2]परिष्वङ्गोत्कण्ठा दृशोश्च निमीलनं**
**मनसि मसृणो मोहो बाहीक[3]वस्तुपराङ्मुखः[4]।**
**तव शशिमुखि! त्रासावेगादिदं किल वैकृतं**
**मम तु मदनोन्मादात् साधारणं भवति द्वयोः।। ९४।।**

**विचक्षणा** :-
**केसवकुमार! ण[5] एसो ओसरो तुह सिंगार वा वाराणम्[6]।**
**संणिहिदं खु पिसुणेदि[7] सत्तुणो रहं एसो दुन्दुहिणिग्घोसो[8]।। ९५।।**

***(केशवकुमार! नैषोऽवसरस्तव[9] शृङ्गारव्यापाराणाम्।***
***सन्निहितं खलु पिशुनयति शत्रो रथमेष दुन्दुभिनिर्घोषः।। ९५।।)***

---

1. M. Gr.1 **इति** इति नास्ति।
2. M. Gr.1 दृढतम
3. M. Gr.1 बाह्यैक
4. M. Gr.1 मुखम्।
5. M. Gr.1 ण इति नास्ति।
6. M. Gr.1 वाराणा।
7. M. Gr.1 विसुणेइ
8. M. Gr.1 दुंदुभिघोसो।।
9. M. Gr.1 एष अवसरस्तव

**प्रद्युम्नः** :- (विहस्य) अयि ! विचक्षणे ! कथमधुनाऽपि त्वां न मुञ्चति शङ्कापिशाची।

पद्यम्- **भयानकरणार्भटीविदळदम्बरश्शम्बरः**
**परासुरभिदृश्यतां[1] परुषसायकैर्मामकैः।**
**सुकीर्तिसुदती परिग्रहमहोत्सवे साम्प्रतं**
**प्रमोदितधराजनां मम विधेहि नीराजनाम्।। ९६।।**

**मनोरमा :-** (जनान्तिकम्) अइ ![2] विअक्खणे ! अण्णारिसं एदस्स सलाहणिज्जं[3] धीरत्तणम्। अज्ज जं जंभसासणप्पमुह-णिहिलसुरसंघदुलंघ-सासणस्स तस्स संबरस्स[4] निग्गहं एद्ध णिक्कंपं ठिदो एव्व सिद्धं विअ मंतेदि[5]।।

*(अयि ! विचक्षणे ! अन्यादृशमेतस्य श्लाघनीयं धैर्यम्। अद्य यज्जम्भशासन[6]-प्रमुखनिखिल-सुरसङ्घदुर्लङ्घशासनस्य तस्य[7] शम्बरस्य निग्रहमत्र निष्कम्पं स्थित एव सिद्धमिव मन्त्रयते।[8])*

**विचक्षणा** :- एदस्स[9] खु लोउत्तरं वीरत्तणं अण्णेसिं विअ ण वाअमेत्तेण। किन्दु कय्यादो एव्व ओगदं[10]। *(एतस्य खलु लोकोत्तरं वीरत्वम् अन्येषामिव न वाङ्मात्रेण। किन्तु कार्यादेवावगतम्[11]।)*

**प्रद्युम्नः** :- (सवितर्कम्) सूनुहननजनितमोहेनापि दानवेनाधुना लब्धसंज्ञेन भवितव्यम्।

**विचक्षणा** :- वीरविहावरी खु विअंभण[12]कालो असुर-रक्खस-पिसाआणं।
*(वीरविभावरी खलु[11] विजृम्भणकालः असुरराक्षसपिशाचानाम्।)*

---

1. M. Gr.1 परासुरभिगृश्यतां
2. M. Gr.1 अयि !, My. Tel. Print. ऐ
3. M. Gr.1 एअंससिलाहणिंजं
4. M. Gr.1 विसंबरंस
5. M. Gr.1 मंतेइ।
6. M. Gr.1 धीरत्वम्। अद्य जम्भशासन
7. M. Gr.1 तस्यापि
8. M. Gr.1 निग्रहः अत्र निष्कम्पस्थित एव सिद्धमिव मन्त्रय।
9. M. Gr.1 एअंस
10. M. Gr.1 गअ, T. Gr.1 किन्दु कंआदो एंव ओगदं
11. M. Gr.1 अन्यस्मिन्निव न वाचामात्रेण, किन्तु कार्यादेव।
12. M. Gr.1 विलंभणकालो
11. M. Gr.1 **वीरविभावरी खलु** इति स्थानं ताळपत्रे रिक्तम् अस्ति।, T. Gr.1 विभावरी खलु

**प्रद्युम्नः** :- एवमेतदिति ससम्भ्रममुत्थाय[1] आस्यतां भवतीभिरस्य तावदसुरहतकस्य छिन्नेन शिरसा तरसा भवतीराराधयिष्यामि (इति सकोपाटोपं गृहीतकार्मुकः परिक्रम्य निष्क्रान्तः।)

**मायावती** :- (उदास्रा आदृष्टिगोचरं दयितमवलोकमाना सचिन्तमास्ते[2]।)

**विचक्षणा** :- माआवदि![3] महावीरमहिसीए तुह मा भुवीअ एद्ध सङ्का।
*(मायावति! महावीरमहिष्यास्तव माभूदत्र शङ्का।)*

***(।। नेपथ्ये महान् कलकलः।।)***

**विचक्षणा** :- अम्हो! एत्ताहे असुर-णरिंदाणं परोप्फरं महंतेण जुज्झेण[4] होदव्वं।
*(अहो! इदानीमसुरनरेन्द्राणां[5] परस्परं महता युद्धेन भवितव्यम्।)*

**मायावती** :- भद्दं होदु अय्यउत्तस्स[6]। *(भद्रं भवत्वार्यपुत्रस्य।)*

***(।। पुनर्नेपथ्ये।।)***

पद्यम्- **सिद्धा मायाप्रभा वैरविरळगरळोद्गारिणो वैरिणोऽमी,**
**वेगान्नागादिहिंस्रा हरिसुतमभितस्साम्प्रतं सम्पतन्ति[7]।। ९७-अ।।**

**मायावती** :- कहं उण एदेसिं पडीकारो अय्यउत्तेण कादव्यो। तहवि मह सुहं एव्व कहेदि[8] वामलोअणचलणं। *(कथं पुनरेषां[9] प्रतीकार आर्यपुत्रेण कर्तव्यः। तथापि मम सुखमेव कथयति वामलोचनचलनम्।)* (कर्णं दत्वा अवधत्ते।)

***(।। पुनर्नेपथ्ये।।)***

**देवैस्तोष्टूयमानो वियति समुदितैर्दक्षिणो रौक्मिणेयो,**
**मायाक्लृप्तैर्गरुत्मत्प्रभृतिभिरथ तानद्भुतं निर्भिनत्ति।। ९७-आ।।**

1. M. Gr.1 ससंरम्भमुत्थाय
2. M. Gr.1 सचिन्तमुदास्ते।
3. M. Gr.1 माआवइ
4. M. Gr.1 जुंधेन
5. M. Gr.1 असुरनृणां
6. M. Gr.1, T. Gr.1 अंअउंतंस
7. M. Gr.1 सुपतन्ति।
8. M. Gr.1 कहं पुण एएसिं पडिकारो अंअउंतेण कादंवो। तहवि मह एएसिं सुह एंव कहेइ
9. M. Gr.1 पुनः एतस्मिन्

**विचक्षणा** :- सहि! इदो वरं[1] पडिट्ठिदं दे हिअअं होदु।
*(सखीतः परं प्रतिष्ठितं ते हृदयं भवतु।)* (पुनस्तत्रैव।)

**दत्तां मृत्युञ्जयेन प्रसभमथ गदां प्राहिणोद्रोहिणोऽस्य,**
**च्छेदायादाय मायानिरसनकुपितो दानवो दीनवक्त्रः।। ९८-अ।।**

**मायावती** :- एसा खु सअल-सुरवीरभआवहा गआ कहं अय्यउत्तेण ओणेदव्वा[2]।
*(एषा खलु सकलसुरवीरभयावहा गदा कथमार्यपुत्रेणापनेतव्या।)* (पुनस्तत्रैव।)

**अस्त्रं नारायणीयं रणभुवि विसृजन्नच्छिनत्तां पतन्तीं,**
**पश्चाद्दैत्यस्य शीर्षं तदनु च जगतामापदं रौक्मिणेयः।। ९८-आ।।**

किञ्च- **कार्ष्णिर्विशुद्धपार्ष्णिर्दैत्यस्य पाति तेन भुवि।**
**अमृताशांश्च मृताशानानन्दं नयति यौगपद्येन।। ९९।।**

अपि च- **कबन्धं देवारेर्नटति निचयश्च द्यु सुदृशां**
**निहन्यन्ते भेर्यो दिवि निहतशेषाश्च रिपवः।**
**प्रसन्नात् स्वर्लोकात् पतति सुमनोवृष्टिरभितः**
**प्रकीर्णाश्च क्रन्दद्दनुजवनिताकुन्तलभरात्।। १००।।**

**मायावती** :- (सादरमाकर्ण्य, परमानन्दभरादितिकर्तव्यता मुग्धा तिष्ठति।)

**विचक्षणा** :- हळा! तुह उवरिं[3] सुप्पसण्णो देव्वो[4]। जेण तुह मणोरहाणोअहो अज्ज फलदि[5]। *(हळा! तवोपरि सुप्रसन्नो देवः। येन तव मनोरथानोकहोऽद्य[6] फलति।)*

**मायावती** :- (सहर्षोन्मेषं संस्कृतमाश्रित्य)

**विस्रब्धं जिष्णुरद्यव्यपगतविमतक्षिप्तबाणक्षतस्सन्**
**पौलोम्याः केळियुद्धेष्वनुभवतु तरां हन्त! दन्तक्षतानि।**
**निश्शङ्कं सञ्चरन्तां नभसि सुमनसस्पन्दमानैर्विमानै-**
**र्दीर्घं दीक्षोपसद्भिः क्रतुगणमृषयो वीतचिन्तं[7] यजन्ताम्।। १०१।।**

---

1. M. Gr.1 परं
2. M. Gr.1 अंअउंतण अवणेदंवा, T. Gr.1 अंअउंतेण ओणेदंवा
3. M. Gr.1 उवरि
4. M. Gr.1 देवो
5. M. Gr.1 फलइ।
6. M. Gr.1 मनोरथानोकहहः अद्य
7. M. Gr.1 वीतचिन्ता

**मनोरमा** **:-** हळा! किं एद्ध विलम्बेसि राअउत्तस्स जअलच्छीपाणिग्गहण-महूसवम्मि मङ्गळाअरणं कादुं तुवरसु[1]।। २।।

*(हळा! किमत्र विलम्बयसि[2] राजपुत्रस्य जयलक्ष्मीपाणिग्रहणमहोत्सवे मङ्गळाचरणं कर्तुं त्वरस्व[3]।)*

**मायावती** **:-** तह *(तथा।)* (इति सखीभ्यां सह निष्क्रान्ता।।)[4]

**।। इति वेङ्कटाचार्ययज्वना विरचिते**
**प्रद्युम्नानन्दनाम्नि नाटके**
**चतुर्थोऽङ्कः।।**[5]

1. M. Gr.1 तुवरह। 2. M. Gr.1 विलम्बसे
3. M. Gr.1 त्वर 4. M. Gr.1 (सखीभ्यां सह) तह (इति निष्क्रान्ता)
5. My. Tel. Print., T. Gr.1* **। इति चतुर्थोऽङ्कः।।** इति अस्ति।

# पञ्चमोऽङ्कः

*।। ततः प्रविशति नारदशिष्यश्च।।*

**नारदः** :- (समन्तादवलोक्य) अये! विभातप्रायैव विभावरी। सम्प्रति हि-

पद्यम्- **तमो लेशालिप्ते नभसि परिमज्जन्ति शनकै-**
**रुडुव्यूहाः पिण्डीभवदुदधिडिण्डीरसुहृदः।**
**गतच्छायं तोयव्ययपरिणमत्खण्डजलद-**
**प्रभापाण्डुव्योम्नः पतति शशिनो मण्डलमिदम्।। १।।**

**शिष्यः** :- (विभाव्य)

**प्रचण्डे सप्ताश्वे परिकलितनाळीकविभवे**
**प्रवृत्ते निर्गन्तुं कृतविगमनक्षत्रनिवहः।**
**अतेजा राजाऽसावपसरति पश्चात्सरभसं**
**सदन्तर्मालिन्ये सति जगति वृद्धिं व्रजति कः।। २।।**

यद्वा **(१)** **प्रभ्रश्यदम्बरस्थितिरध्यक्षतमस्तिरस्कृतालोकः**[2]**।**
**प्रचलत्करः परगिरावाप्तगतिः पतति तारकेशोऽयम्।। ३।।**

---

१. प्रभ्रश्यन्ती अम्बरस्थितिः = वस्त्रस्य स्थितिः अन्तरिक्षे स्थितिश्च यस्य सः। अक्षिणि अध्यक्षं विभक्त्यर्थेऽव्ययीभावः। अक्षिगतमालिन्येन तिरोहितपदार्थदर्शनः प्रत्यक्षतमसा = तिरस्कृतस्वप्रकाश इति चार्थः। प्रचलन्तौ करौ हस्तौ यस्य। प्रचलन्तः = गळन्तः, कराः = किरणाः यस्येति चार्थः। परस्य गिरा = वाचा, अवाप्ता = प्राप्ता गतिर्गमनं येन वार्धके चक्षुर्वैकल्यादन्यवचनानुरोधेन गमनवानिति यावत्। परगिरौ = अस्तपर्वते, आप्ता = प्राप्ता गतिर्येनेति चार्थः। ताराः केशा यस्य तारकाणामृक्षाणामीशश्चेत्यर्थः।

---

1. M. Gr.1 स्थितिरद्य तमोभिस्तिरस्कृतालोकः।     2. M. Gr.1 पाण्डरिम

**नारदः** :- (प्रतीचीमवलोक्य) हन्त! मन्दभाग्यता पश्चिमाशायाः। यदियं कलानिधिना पलायितयौवनेनैव नियतं परिष्वज्यते। (पुरोऽवलोक्य) अत एव हि-

पद्यम्- **रमणीयतरुणिमजुषो यूनः परिरम्भसुखमजानानाम्।**
**पाण्डुरिमकैतवेन प्राची हसतीव पश्चिमामाशाम्।। ४।।**

(पुनरवलोक्य)[1] शृणु वत्स! पुण्डरीक !

**ऐरावतद्युतिचयैरुपचीयमान-माखण्डलीयहरितः परिपाण्डिमानम्।**
**निश्शेषविश्वविजयोपनतं निशायां मन्ये यशस्समुदयं मकरध्वजस्य।। ५।।**

(परितो निर्वर्ण्य)

**क्षेत्रज्ञा इव षट्पदा रसभुजो मोहेन बद्धाः**
**(२) पुरा सूर्यालोकलवैस्तमस्यपगते सद्यश्चिदुन्मेषदैः।**
**संसारादिव निर्गळन्ति विगतक्लेशास्सरोजोदरा-**
**दानन्दादहमन्नमित्यविरतं सामेन[2] गायन्ति च।। ६।।**

**शिष्यः** :- (निरूप्य) **(३)**

**निस्सम्मदा निशि निजप्रियविप्रयोगा-दन्तर्धृता तनुशिलीमुखवेदनेयम्।**
**आमोदमद्य दयितस्य करावमर्शात्, कोकाङ्गना वहति कोकनदावळी च।।७।।**

---

२. क्षेत्रज्ञा इव जीवात्मान इव षट्पदा = भ्रमराः, पुरा मोहेन रस्यन्त इति रसाः विषयाः मकरन्दश्च तदनुभवेन संसारबद्धाः मुकुलितकमलान्तर्निरुद्धाश्च सद्यस्तत्कालं चितो = ज्ञानस्य, उन्मेषदैः = उद्बोधकैः, सूरीणां = विदुषाम्, आलोको = दर्शनं, सूर्यस्यादित्यस्य, आलोकः = प्रकाशश्च तल्लेशैः तमस्यान्तराज्ञानान्धकारे बाह्यान्धकारे च अपगते = नाशिते सतीत्यर्थः। अविद्या-स्मिता-राग-द्वेषाभिनिवेशाख्यक्लेशपञ्चकरहिताः कमलान्तर्बन्धनजन्यश्रमत्यागिनश्च संसाराज्जनन-मरणप्रवाहादिव सरोजोदरात् = कमलमध्यान्निर्गळन्ति = बहिर्गच्छन्ति, तदनन्तरमात्मज्ञानजन्यसन्तोषात् "**अहमन्नम् ...**" इत्यादि साम सततं गायन्तीव सततं ध्वनन्तीत्यर्थः।।

३. निजप्रियः = कोकस्सूर्यश्च, तद्वियोगात् = सन्तोषरहिता विकासरहिता च। अत एव धृतमन्मथबाणवेधा मुकुळनादन्तर्निरुद्धाधिकभ्रमरसम्मर्दा च उषः काले कोकहस्तस्पर्शात् कोकाङ्गना सन्तोषं वहति। सूर्यकिरण-सम्पर्काद्रक्तोत्पलावळीपरिमळं वहतीति चार्थः।

---

1. M. Gr.1 पुनरवलोच्य 2. M. Gr.1 सामेव

(चन्द्रास्तमयं विभाव्य सनिर्वेदम्) **(४)**

**पद्मिन्यो मधुपगणैर्वृताः प्रमत्तै-**
**रामोदैः कुवलयमुज्झितं न भाति।**
**न प्राप्नोत्यहह सुखस्थितिं हि मानी**
**सञ्जातो यदयमराजकः प्रपञ्चः।। ८।।**

**नारदः** :- (पुरतो निर्वर्ण्य सादरम्)

**अद्य स्वैरं ग्रहपतिमणिष्वग्निदानाततायी[1]**
**श्रेयान् दूतो युवतिघटने सीदतां कोकयूनाम्।**
**ध्वान्तश्रेणी निबिडविपिनध्वंसने दावशुष्मा-**
**भाग्योन्मेषः प्रथमहरितो भानुमानुज्जिहीते।। ९।।**

(पुनस्सादरं निर्वर्ण्य प्राञ्जलिश्शिष्यमुद्दिश्य)

**अन्तर्मण्डलदिव्यमण्डपगतश्रीकान्तबाहान्तर-**
**क्रीडन्निस्तुलकौस्तुभद्युतिलहर्यभ्यस्ततेजोभरः।**
**अध्यर्को पलमाहिताग्निरुदयन्नुन्मीलदिक्सौरभो**
**देवस्त्वा सविता पुनातु भगवान् पादैस्सहस्रेण सः।। १०।।**

(समन्ताद्विभाव्य) अमी खलु -

**जाते भास्वति बाले! सन्तोषवता पितामहेन भृशम्।**
**आरात् पङ्कजकारा मन्दिरबन्धाद्विमोचिता मधुपाः।। ११।।**

---

४. यतः कारणादयं लोकः चन्द्ररहितः भूपालरहितश्च सञ्जातः। अतः पद्मिन्यः = कमललताः, प्रमत्तैर्मधुपगणै-र्भ्रमरसङ्घैर्वृताः, पद्मिनीजातिस्त्रियश्च मद्यपायिसङ्घैराक्रान्ताः। नीलोत्पलं परिमळराहित्यान्न भाति। भूमण्डलं च सन्तोषराहित्यान्न भाति। हिमानी = हिमसंहतिः, सुष्ठु खे = आकाशे स्थितिं न प्राप्नोति। मानवांश्च सुखावस्थानं न प्राप्नोति हीति चार्थः।

---

1. M. Gr.1 दानातदायी

**शिष्यः** **:-** (साङ्गीकारम्) अत एव हि —

**नवप्रसूतेर्मघवद्दिशो मुखे भृशं महत्यर्क[1]मयूखमेदुरे।**
**चिरं मुहुश्चर्वितचारुवीटिका रसावसेकादिव भाति रक्तिमा।। १२।।**

अथवा- **स्फुटस्फटिकमण्डले स्फुरति पूर्वशैलोल्लस-**
**ज्जपाकुसुमलौहिती जलजबन्धुबिम्बात्मनि।**
**उपर्युपरि निर्गळद्ध्रुवमुपाध्यपाया[2]दिदं**
**यदद्यतन रक्तिमव्यतिकरं परित्यक्ष्यति।। १३।।**

किञ्च- **बालार्कद्युतिपटलाप्तिपाटलानि**
**प्रौढस्त्रीकुचतटहारमौक्तिकानि।**
**तत्पाणिस्थलगतकेळिकीरडिम्भा-**
**श्चुम्बन्ति प्रतिनवदाडिमभ्रमेण।। १४।।**

**नारदः** **:-** अलं विलम्बेन त्वरस्व वत्स! द्वारकामुपागन्तुं प्रणष्टलाभावेदनेन भगवतो वासुदेवस्य बहुमन्तव्यास्स्याम।

**शिष्यः** **:-** कस्सम्प्रति प्रणष्टलाभो नाम भगवतः।

**नारदः** **:-**

**क इतरः कालसदृशा शम्बरेण**
**गृहीतस्य प्रद्युम्नस्य पुनस्समागमात्।**
**पुत्रस्य खलु चिराददृष्टस्य पुन-**
**रागमनं पुमर्थेभ्यश्चतुर्भ्योऽपि प्रकृष्यते।। १५।।**

**शिष्यः** **:-** किमुत विपक्ष[3]विजयोपनतकीर्तिकामिनी पाणिग्रहणस्सः[4]। अपि भगवन्! प्रास्थितद्वारकामसौ रुक्मिणीपुत्रः।।

1. M. Gr.1 भृशमर्क
2. M. Gr.1 मुपाद्धृपाया
3. M. Gr.1 पक्ष
4. M. Gr.1 पाणिग्रहणस्य

**नारदः** :- वत्स ! किं न श्रुतम् ? अदीनदानवप्रधान[1]विधूननसन्धुक्षितानन्दसन्दोहस्सक्रन्दन[2] **(५)**स्सौवंस्यन्दनं मातलिसूतचातुरीप्रसूतविचित्रगतिशक्तिकं **(६)** सौवरमप्यसौवरं भासुरहार[3]केयूर-किरीटकुण्डलमुखं रुचिरमरीचिवीचिवीचिकारचित[4]तरणिकोटिकिरणतिरस्करणमाभरणगणम् अतुल्यानि मन्दारमाल्यानि च क्षणसन्दर्शनमात्रसमुत्सारितसकलजननयनव्यसनानि दिव्यवसनानि च शम्बरदुर-सुरशरीरपरिक्षरद्रुधिरकुङ्कुमक्षोदानुलिप्तदृप्तविशिखाय तस्मै **(७)** प्रजिघाय[5]।।

**शिष्यः** :- पाकशासनः किमेतानि धर्मार्थं प्राहिणोत्[6]। ततः।। २।।

**नारदः** :- तदेव मातलिना तत इतश्चार्यमाणं विमानं माघवनमधिरुह्य तत्तादृशदिव्यपुरीगिरि-सरित्पुण्यारण्यादिसौभाग्यावलोकनार्जितविलोचनानन्दः मन्दं मन्दं सखीसमेतया देव्या च मायावत्या गात्रशोभाकृतार्थी कृतदिव्याभरणसार्थया सार्थं मुहुर्विदूषकनिवेद्यमानविनोदसमुदञ्चदामोदः सादरं मुकुन्दवन्दनाय स्पृहयाळुः द्वारकां प्रति प्रातिष्ठत[7] प्रद्युम्नः।

तदेहि विहितमिहिरोपासनविधयस्तरसैव वासुदेवस्य तनयसमागममहोत्सवप्रचारं सर्वं निर्वर्णयिष्याम - (इति तूर्णं निष्क्रान्तौ।।)

**।। शुद्धविष्कम्भः।।**

---

**५.** स्वस्यायं सौवः।

**६.** स्वः भवं सौवरम्। दिव्यमित्यर्थः। स्वशब्दात् स्वर्शब्दाच्चाणि द्वारा दित्वादुभयोरैजागमः। सौवरमपि सौवरं नेति विरोधः। असौ वरम् इति पदच्छेदेनार्थवर्णनात् परिहारः।।

**७.** प्रजिघाय = प्रेषयामास। हि-गतौ वृद्धौ चेति धातोर्लिटि हेर चङीत्यभ्यासात् परस्य हकारस्य कुत्वेन घः।

---

1. M. Gr.1 दानवप्रथान्त
2. M. Gr.1, T. Gr.1 संक्रन्दन
3. M. Gr.1 भासुरभार
4. M. Gr.1 रुचिरमरीचिवीचिकारचित
5. M. Gr.1 विजिघाय
6. M. Gr.1 प्रहिणुयात्
7. M. Gr.1 प्रातिष्ठ

***।। ततः प्रविशन्ति तारापथसञ्चारि (८) तौ रासाहं विमानमधिरूढः प्रद्युम्नो मातलिर्विदूषको मायावती सख्यौ च।।***

**प्रद्युम्नः** :- (अधस्तादवलोकयन्नङ्गुळ्या निर्दिश्य विदूषकं प्रति)

वयस्य! भवानितः पश्यतु-

पद्यम्- **अत्रैव प्रसभं मदीयविशिखैः कालोग्रदंष्ट्रा**
**सखैर्दर्पोद्रेकतृणीकृतत्रिभुवनो दैत्येशिता नाशितः।**
**यत्रामी दनुजाङ्गजाङ्गलभुजः कङ्काः किलैतं**
**रथं व्योमन्युन्नमयन्ति[1] पक्षयुगळीविक्षेपचण्डानिलैः।। १६।।**

**विदूषकः** :- (विमुखो जोषमास्ते।)

**प्रद्युम्नः** :- वयस्य! कुपित इव किमिति न प्रत्यालपसि ?

**विदूषकः** :- (सरोषाहरणम्) मित्त! कय्यविहादपरेण[2] तुए ण कादव्वम् खु संभासणं।

*(मित्र! कार्यविघातपरेण[6] त्वया न कर्तव्यं खलु सम्भाषणम्।)*

**प्रद्युम्नः** :- वयस्य! कस्य वा तावकस्य कार्यस्याचरितो मया विघातः ?

**विदूषकः** :- दइच्च-सइण्णवहकाले[3] खु गिद्धा विअ अम्हे वि संपुण्णभक्खणलोलुवा ठिदम्ह। *(दैत्यसैन्यवधकाले खलु गृध्रा इव वयमपि सम्पूर्णभक्षणलोलुपा स्थिता स्मः।[7])*

**मातलिः** :- (सोपहासम्) मौञ्जायन! दैत्यसैन्यवधे मांसभुजां गृध्राणामिव तव को भक्षणावकाशः?

**विदूषकः** :- सदमहसूदसद्धभोअणं[4] खु अम्हाणं कुलधम्हो। संपदं तु सपुत्तपोत्तं दइच्चं संहरंतेण वअंसेण सद्धकत्ताराणं सुण्णदा-संपाअणादो अम्हाणं मुहेसु मण्हा दिण्णा[5]।

---

८. तुरा साहं इन्द्रस्येदं तौरासाहम्।।

---

1. M. Gr.1 व्योमन्तमयन्ति
2. M. Gr.1 कंजविहाअकरेण, T. Gr.1 कंअविहादपरेण
3. M. Gr.1 कार्यविघातकरेण
4. M. Gr.1 सेंणवहकाले
5. M. Gr.1 इयं छाया नास्ति।
6. M. Gr.1 संदहोअणं
7. M. Gr.1 भ्रंरंदिंणा

*(शतमखसूतश्राद्धभोजनं खल्वस्माकं कुलधर्मः। साम्प्रतं तु सपुत्रपौत्रं दैत्यं संहरता वयस्येन श्राद्धकर्तॄणां शून्यतासम्पादनादस्माकं मुखेषु मृत्स्ना दत्ता।।[1])*

**प्रद्युम्नः** :- वयस्य![2] क्षमस्वैनमार्द्रापराधम्।

**।। सर्वे हसन्ति।।**

**मायावती** :- (अधस्तादवलोक्य सभयकम्पं मातलिं प्रति) भो! सुत्तामसूदअदि विअ कोणवकुणवकबन्धकरंकभअंकरादो इमादो देसादो सिग्घं एव्व णिग्गदो[3] होदु विमाणराओ।

*(भो! सुत्रामसूतातीव कोणपकुणपकबन्धकरङ्कभयङ्करादस्माद्देशाच्छीघ्रमेव निर्गतो भवतु विमानराजः।[4])*

**मातलिः[5]** :- यदाह देवि! - (इति तथा करोति।)

**प्रद्युम्नः** :- (विस्मयमानो विमानवेगातिशयं विभाव्य) पङ्कजनयने! पश्यतु भवती।

पद्यम्- **पुरतस्तरुभूधरा स्फुरन्तो रथवेगादिह जङ्गमा इवामी।**
**अवधीरितदैत्यपुङ्गवं मामभिगच्छन्ति नितान्तमादरेण।। १७।।**

**मायावती** :- (पार्श्वतोऽवलोक्य) अय्यउत्त![6] खोणीहरस्स एदस्स[7] तडम्मि कोणु सो महंन्तो सरो[8] लक्खीअदि। *(आर्यपुत्र! क्षोणीधरस्यैतस्य तटे किन्नु तन्महितं सरो लक्ष्यते[9]।)*

**प्रद्युम्नः** :- (विमानमवस्थाप्य निपुणं विभाव्य च) तलोदरि! भृगुमतश्शैलस्य तटोपकण्ठमण्डनं **'मज्जदुज्जीवनम्'** नाम महातीर्थमिदम्। (सानुस्मरणरोमाञ्चम्) प्रथमं हि-

पद्यम्- **अत्र त्वयाऽङ्कुरदनङ्गविनोदतुङ्गै-**
**रङ्गीकृतः प्रणयिनि! स्तिमितैरपाङ्गैः।**
**आनन्दमादिमरसव्यतिकीर्णमन्त-**
**स्तादात्विकं कमपि[10] तादृशमन्वभूवम्।। १८।।**

---

1. M. Gr.1 इयं छाया नास्ति।
2. M. Gr.1 (सस्मितम्) वयस्य
3. M. Gr.1 णिंगओ
4. M. Gr.1 इयं छाया नास्ति।
5. M. Gr.1 मातलिः इति स्थाने सूतः इति अस्ति।
6. M. Gr.1 अंअउंत
7. M. Gr.1 एअंस
8. M. Gr.1 को एसो महंतो कासारो
9. M. Gr.1 तटे क एष महान्तः कासारः लक्ष्यते।
10. M. Gr.1 किमपि

अपि च- **मयि सति कृतशङ्के मन्युना पाटलानां**
**कुटिलिमजटिलानां कूणितभ्रूलतानाम्।**
**तरळमुकुळितानां तावकालोकितानां**
**कमलसहचराणां कातराणां स्मरामि।। १९।।**

(मातलिं प्रति) सहस्रनयनसारथे! साम्प्रतमुन्नमय विमानराजमुद्वेलाद्भुतमाहात्म्य-***मुष्टोधनतीर्थं*** तावदुदीक्षतामुत्पलाक्षी[1]।।

**मातलिः** :- यदाज्ञापयत्यायुष्मान् - (इत्युन्नमयति।)

**प्रद्युम्नः** :- दयिते! दक्षिणेन पुष्करारण्यम्, दीयतां दृष्टिः।

पद्यम्- **उद्दामहेममयतामरसाभिराम-*मुष्टोधनं* जगति तीर्थमिदं वदन्ति।**
**आस्वादयं यदमृता च मनावबुद्ध-प्राग्जन्मवृत्तिरचिरादधरामृतं ते।। २०।।**

**मायावती** :- (सादरमवलोकते।)

**विदूषकः** :- अमुणो खु उब्बोहणतित्थस्स माहप्पं वाआणं अगोअरो। जं पदंदट्ठूण[2]।

पद्यम्- **जम्मम्मि पुव्वम्मि[3] जणेहि बद्धो[4], चोरत्तणं पेक्खिअ ताडिअंतो।**
**जं जं खु तक्कालभवं[5] अतं तं, सोहं चिरादो सुमरेमि[6] दाणिम्।। २१।।**

*(अमुष्य खलूष्टोधनतीर्थस्य माहात्म्यं वाचामगोचरः। यदेतद्दृष्ट्वा।*

***जन्मनि पूर्वस्मिन् जनैर्बद्धश्चोरत्वं दृष्ट्वा ताड्यमानः।***
***यद्यत् खलु तत्कालभवं च तत्तत्सोहं चिरात् स्मरामीदानीम्।। २१।।[7])***

***।। सर्वे हसन्ति।।***

**मायावती** :- (दक्षिणतो दत्तचक्षुरुद्ग्रीवं पश्यति।)

---

1. M. Gr.1 मुत्पलाक्षि
2. M. Gr.1 जं एअंदंठूण वि।, T. Gr.1 जं एदंदंठूण।
3. M. Gr.1 पुंवथ
4. M. Gr.1 बंधे
5. M. Gr.1 ताळानुभुवि
6. M. Gr.1 सुमरामि
7. M. Gr.1 इयं छाया नास्ति।

**विचक्षणा** **:-** (मायावत्या इङ्गितमुन्नीय) हो मादलि! **सेदुबंधप्पमुहा** पुण्णदेसा पेक्खिदुमुक्कण्ठदि सही[1]। ता तं एव्व देसं णेदव्वमेदं[2] विमाणं। *(भो मातले! **सेतुबन्धप्रमुखान्** पुण्यदेशान् द्रष्टुमुत्कण्ठते सखी। तस्मात्तमेव देशं नेतव्यमेतद्विमानम्।[3])*

**मातलिः** **:-** "एवमस्त्विव"(ति विमानं दक्षिणतस्सरयं चारयति।)

**प्रद्युम्नः** **:-** पुरुहूत! सूत! कोऽयं तोयनिधिकृतानुबन्धो बन्धोद्राघीयानक्ष्णोः कन्दळयत्यानन्दम्।

**मातलिः** **:-** आकर्णयत्वायुष्मान् -

पद्यम्- **तत्तादृग्ग्रामभद्रप्रभुपदकमलन्यासतो धन्यजन्मा**
**त्रैलोक्यातङ्कलङ्कापुरपतिकुलविध्वंसने कालदण्डः।**
**जानक्याः प्राणनाडीजलनिधिवपुषश्चारुयज्ञोपवीतं**
**जीवातुर्जीवलोके गुरुतरदुरितैरातुरे सेतुरेषः।। २२।।**

**राशेरशेषपयसां परमं हसां च**
**सन्तारकाणि सरतामभिपश्यतां च।**
**धर्मावनाय कुहना मनुजस्य विष्णोः**
**कर्माणि पश्यत मुहुः करुणाकृतानि।। २३।।**

**प्रद्युम्नः** **:-** (प्राञ्जलि[4]स्सचमत्कारं सविस्मयं च)

**श्रीमान् पुष्यतु जानकीप्रियतमश्श्रेयांसि भूयांसि नः**
**पादाम्भोजरजः कणैरपि शिलां प्रागारचय्याबलाम्[5]।**
**एनां प्लावयतैव येन जलधावश्मप्लवालापिनो[6]**
**वेदस्याप्यसदर्थवाद इति तन्निर्यापितं दुर्यशः।। २४।।**

---

1. M. Gr.1 माअलि! सेइबंधपमुहापुंणदेसा पेंखिदुमुंकंठइ सही।
2. M. Gr.1 दिसं णेदंवं एदं
3. M. Gr.1 इयं छाया नास्ति।
4. M. Gr.1 साञ्जलि
5. M. Gr.1 प्रागारचर्याबलाम्।
6. M. Gr.1 प्लवोल्लापिनो

**मातलिः** :- आयुष्मन्! किं नाम रामभद्रस्य न विस्मयकरं चरितम्।

**मैत्री यस्य निषादयूधपतिना भुक्तिश्शबर्या गृहे**
**पात्रं (९) त्यक्तकुटुम्बको निशिचरो दाने कुबेरानुजः।**
**अस्त्रं यस्य तृणं बलं कपिकुलं लङ्कापतेस्सङ्गरे**
**तस्मिन् विस्मयकारि दिव्यचरिते देवे मनोदीव्यति।। २५।।**

**प्रद्युम्नः** :- (प्रियामवेक्ष्य सचमत्कारम्) **(१०)**

**सोऽव्याद्यस्य हि धर्मो[1] नाळीकाळीकमोचननिदानम्।**
**जनको हेतुः प्राप्तावप्यवनीभूवनीभुवोश्चित्रम्।। २६।।**

अपि च – **निगदति यजमानं प्रस्तरं नित्यवाणी**
**(११) तदिह तु विपरीतं तन्वि! कामं प्रतीमः।**
**पदकमलपरागैः प्रस्तरं हन्त! पत्नीं**
**प्रभुरकृत रघूणां भाग्यतः पश्यदङ्घ्रेः।। २७।।**

**मायावती** :- (सप्रश्रयं नमस्करोति।)

***।। सख्यावनुनमस्कुरुतः।।***

**मातलिः** :- (विमानमन्यतस्सञ्चारयन्नङ्गळ्या निर्दिश्य-)

पद्यम्- **असौ तटतरुव्रातैरनभिज्ञा रवित्विषाम्।**
**तनोति दृष्ट्योः कल्याणं *ताम्रपर्णी* तरङ्गिणी।। २८।।**

---

**९.** पुत्रदारादिपरित्यागपूर्वकं शरणागताय कुबेरानुजाय राक्षसाय विभीषणाय राज्यं दत्तवानिति भावः। श्रोत्रियाय दरिद्राय दातव्यं च कुटुम्बिने इत्यादिशास्त्रोल्लङ्घनं च प्रतीयते।।

**१०.** यस्य रामस्य धर्मः धनुः नाळीकस्य = बाणस्य, मोचने = मोक्षणे, निदानं = हेतुः। धर्मः = स्वभावः, आळीकस्यावृत्तस्य, मोचने = त्यागे निमित्तमिति चार्थः। जनकः = जनकराजः। अवनीभुवस्सीतायाः जनकः, पिता = दशरथः, वनीभुवः = अरण्यभूमेः प्राप्तौ हेतुरिति चार्थः।

**११. यजमानः प्रस्तर** इति वेदवाक्येन प्रस्तरस्य स्तुत्यर्थं यजमानत्वमुक्तम्। अत्र तु प्रस्तरं पत्नीमकृतेति वैपरीत्यम्। प्रस्तरं = शिलां पश्यदंघ्रेर्गौतमस्य पत्नीमहल्यामकृतेति वास्तवार्थः।

---

1. M. Gr.1 धर्मे

**प्रद्युम्नः** :- (विभाव्य सश्लाघम्) **(१२)**

**विरजासरितोऽप्येषा सुतरामतिरिच्यते स्रवन्ती यत्।**
**आविर्भवति जलानामपि मुक्ताकृतिरिमां प्रविष्टानाम्।। २९।।**

**विदूषकः** :- वअंस! कारणादो वि कय्यस्स[1] अदिसओ एद्ध दीसदि। तह हि[2]।

पद्यम्- **ओसरदि[3] तम्बवण्णि सेवलिणी सेलसिंगादो।**
**मुत्ता ओसे पसवा आरोहिज्जा[4] वहूण थणसेलं।। ३०।।**

*(वयस्य! कारणादपि कार्यस्यातिशयोऽत्र दृश्यते। तथा हि-*

***अपसरति ताम्रपर्णीशैवलिनी शैलशृङ्गात्।***
***मुक्ता अस्याः प्रसवा आरोहन्ति वधूनां स्तनशैलम्।। ३०।।)***

**मायावती** :- (सस्मितमग्रतो दृष्ट्वा) मादलि! को णु खु सो मणहर-तम्बपण्णीकल्लोल-सीहरकस्स णसिसिर-तरुणपवणविहूणिदासमो आसमो अच्छीणं लच्छिं आवहदि।[5]

*(मातले! को नु खलु सः मनोहरताम्रपर्णीकल्लोलशीकरकर्षणशिशिरतरुणपवन-विधूवितश्रम-आश्रमोऽक्ष्णोर्लक्ष्मीमावहति।[8])*

**मातलिः** :- देवि! दृप्तवातापि[6]-राक्षसभक्षणानुरूपा कूपारात्मकपेयतो यस्य परुषभाषण-कलुषनहुष-कुण्डलीकरणशौण्डप्रचण्डकोपस्य विपुलावलेपभराद्विकर्तनवर्तनी[7]मुपरुन्धति विन्ध्यवसुन्धराभृति-स्वशरीरपरिमाणमारोपितवतो भगवतो लोपामुद्राविद्रावितप्रथमाश्रमस्य महर्षेराश्रमपदमिदम्।।

---

**१२.** ताम्रपर्णीं प्रविष्टानां लडयोरभेदाज्जडानामपि मुक्तस्य मोक्षं प्राप्तस्याकृतिर्जायते। विरजाप्रवेशे बुधानामेव मुक्तिः, अत्र तु अज्ञानामपि मुक्तिरित्यतिशयः। ताम्रपर्णीप्रविष्टानां जलानामुदकानां मौक्तिकत्वसम्भव इति भावः। अत एव ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेरिति रघुवंशे उक्तम्।

---

1. M. Gr.1 कंजंस, T. Gr.1 कंअंस
2. M. Gr.1 दीसइ। तथा हि
3. M. Gr.1 ओअरइतं
4. M. Gr.1 आरोहेंजा
5. M. Gr.1 माअलि को एसो मणहर-तंबपंणीकंलोल-सीअरकंठण-सिसिर-तलुणपवण-विहूअंसमोअंसमो अंछीणिं लंछिं आवहइ।
8. M. Gr.1 इयं छाया नास्ति।
6. M. Gr.1 देवि दृप्तवातापि
7. M. Gr.1 द्विकर्तवर्तिनी

**प्रद्युम्नः** :- (निपुणं विभाव्य सानन्दम्।)

***गद्यम्-*** प्रयतमुनिशतहुतघृतसौरभसुभगं भावुकधूमसमाघ्राणाविक्रियमाण[1]विवेकविहगानीकानूद्यमानसामिधेनीकेषु सुभटेष्विव (१३) महाहवीरोपापादिता[2]ज्याकलनजाज्वल्यमाननिस्समानतेजस्सु प्रशस्तशस्त्रशालिषु च पाण्डवेष्विव (१४) परमध्वर्युपोषितधनञ्जयदत्तदीप्तिषु महाहवोपसम्पन्नमहिमसु च पर्वतनितम्बेष्विव (१५) प्रस्तरास्तीर्णप्रदेशेषु साकेतनिकेतनेष्विवा(१६)ग्रेसरयूपशालिपार्थिवेषु सितेतरपक्षनिशानिचयेष्विव (१७) सुमनोजनपरिपीयमानसामेषु[3] शुभोपवनेष्विव (१८) सुशोभनवषट्-पदमुखरितेषु मुनिभिरनिशं प्रतायमानेषु सवनेषु प्रत्यग्रहविर्ग्रहणकौतुकतः प्रसारितैः अभिनवदाडिम-भ्रमकरकङ्कणपद्मरागशकलोपवञ्चितशुकलोकैः दिवौकसां पाणिकिसलयैराम्रेडितफुल्लपल्लवाभि-रनोकहमालिकाभिरविज्ञातचण्डातपवेदनानुभवं प्रत्यग्रमञ्जुळं मुञ्जसूत्रं परिस्तरणदर्भपुञ्जीलमिव बिभ्राणैः (१९) उत्तरलोमतोपनतपिशङ्गवर्णामजिनमालिकाम् (२०) आघारधारामिव परिदधानैः अच्छिन्नाग्रतयापरिचलदेकद्विपल्लवम् अभिनवभावादनुज्झितश्यामलिमानं पर्णमयदण्डम् उद्गत-स्फुलिङ्गसंवलितशिकरामभिराममधूमरेखामिवावलम्बमानैः तरुणतरणिकिरणारुणतनुभिर्मुनिमाणवकैर्जङ्गमैरिव ज्वलद्भिराहवनीयाग्निभि[4]रुपशोभमानं निर्दयशार्दूलसौहार्दोपनतनिस्संशयशयनजातपरितोषमेषपोतं वाजिराजिरचितवालविक्षेपप्रतिक्षिप्त-

१३. महानाहवो = युद्धं, तद्वत्या मिरायां = भूमौ, उपापादितमुत्पादितं यदाजेर्युद्धस्याकलनं तेन प्रकाशमाना प्रतिमपराक्रमेषु महतो हविषोपपादेः रोपेण = प्रक्षेपेण, आपादितं = सम्पादितं यदाज्यस्य घृतस्याकलनं तेनातिज्वलदसमकान्तिष्विति चार्थः।

१४. परः मधोर्दैत्यस्यारिश्शत्रुः कृष्णः तदुपोषितः तत्समीपवर्ती धनञ्जयोऽर्जुनः तेन सम्पादितप्रकाशेषु। परमत्यन्तमध्वर्युणा पालितो यो धनञ्जयो वह्निस्तेन दत्तकान्तिष्विति चार्थः।

१५. प्रस्तराः = पाषाणाः। परिस्तरणदर्भाश्च।

१६. सरयूनदीसमीपराजद्राजवत्सु श्रेष्ठयूपस्तम्भप्रकाशमानपृथिवीभागेष्विति चार्थः।।

१७. सुमनोजनाः = देवजनाः, यज्ञकुशला = ऋत्विगादयश्च। सोमश्चन्द्रः सोमलता च।

१८. सुशोभैर्नवैष्षट्पदैर्भ्रमरैः सुशोभनेन वषडिति पदेन च शब्दवत्स्वित्यर्थः।

१९. उत्तराणि = ऊर्ध्वमुखानि, लोमानि = तनूरुहाणि येषां तेषां भावस्तत्तातया, उपनतः = प्राप्तः पिशङ्गपर्णो यस्यास्तामजिनमालिकां यज्ञोपवीतवद्धृतकृष्णाजिनपरम्परामित्यर्थः।

२०. आघारधाराम्। वायव्यादाग्नेयान्तमित्यादिरीत्या कोणेषु त्यज्यमानाज्यधारामित्यर्थः।

1. M. Gr.1 वक्रियमाण
2. M. Gr.1 महावीरो पपातिता
3. M. Gr.1 मानसोमेषु
4. M. Gr.1 राहवनीयादिभि

मक्षिकोपद्रवतया सुखसुषुप्तिनिर्वृतनिराकुल-लुलायकुलं मनोहरमयूरगीताकर्णनसमुत्पन्न-सान्द्रानन्दभर-परिस्पन्दमानफणामण्डलकुण्डलिगणं समुदितमदगरिमकरिमण्डलशुण्डागृहीत-मुक्तसलिलशीकराभिषेकराजमानप्रचण्डकण्ठीरवं निसर्गेण सततमपधाभिसर्पणतत्परस्य चित्तसप्तेर्निग्राहिकाभिरिव कशाभिः प्रौढतपः प्रभावलब्धप्रकाशातिशयायाः प्रबोधदीपकलिकाया अन्तरमानाद्[1]बहिर्निगताभिरिव मयूखरेखाभिः तपस्तैक्ष्ण्यनिरोधादशनाया[2] पिपासादिनिग्रहेण परिवर्जितेऽपि[3] पयसामपि पाने परित्यज्य जठरं कालत्रयेऽपि नियतमभितन्यमानेषु स्नानकर्मसु सलिलपानलाभलोभान् मूर्धानमुपाश्रयन्तीभिरबिन्धनज्वलनशिखाभिरिव द्राघीयसीभिर्जटा-च्छटाभिरभिरामान् जपसमयेष्वाशयेन शयेन च (२१) पद्माक्षधारणं कुर्वाणान् (२२) अकोपकारिणोऽपि नाकोपकारिणः। यज्ञप्रियानपि न यज्ञप्रियान् दूरीकृतयमानप्यदूरीकृतयमान्[4] कटाक्षमात्रकलित-भवपाशमथनान् शमधनांत्सर्वतो[5] दधानं ***तपोवनमिदं*** तनोति मुदम्।।

**मायावती** **:-** (निपुणं विभाव्य सविस्मयम्) अय्यउत्त![6] **कलससम्भवेण** महेसिणा कल्लोलिनीवल्लहा अमणसमअम्मिकिं अदिवेलपय्या[7] उलत्तणं आवण्णो लोओ।।

*(आर्यपुत्र! कलशसम्भवेन महर्षिणा कल्लोलिनी वल्लभाचमनसमये किमतिवेलपर्याकुलत्व-मापन्नो लोकः ।[8])*

**प्रद्युम्नः** **:-** देवि! तत्किमुच्यते-

पद्यम्- **गूढा ये गिरयस्सुरेन्द्रकुलिशात् पक्षच्छिदा शङ्कया**
**तैर्वातापि नयात् स्वरूपविलयत्रस्तैः परं चुक्षुभे।**
**गङ्गामङ्गळसूत्रभङ्गचकिता कष्टां दशामानशे**
**रुष्टे योगिनि सिन्धुमूर्मिनिचयैर्वाचालमाचामति।। ३१।।**

---

२१. पद्माक्षः = पुण्डरीकाक्षो विष्णुः। पद्माक्षाः = कमलमणयश्च।

२२. तपः क्षयभीतेरपराधिषु कोपमकुर्वाणानपि अकोपकारिणो नेति विरोधः। हविर्दानेन नाकीनामुपकारकानिति परिहारः। नयज्ञाः = शास्त्रज्ञाः। यमो वैवस्वतः योगाङ्गेन्द्रियनियमनादिकम् च।

---

1. M. Gr.1 अन्तरमानाद्
2. M. Gr.1 तपस्तैक्ष्यनुरोधादशनाया
3. M. Gr.1 परिवर्जिते
4. M. Gr.1 दूरीकृतयमानपदूरीकृतयमान्
5. M. Gr.1 शमधनान् सर्वतो
6. M. Gr.1, T. Gr.1 अंअउंत!
7. M. Gr.1 अदिवेलपंजा, T. Gr.1 अदिवेलपंआ
8. M. Gr.1 इयं छाया नास्ति।

किं बहुना – **तत्तादृक्करपद्मसम्पुटनटत्सिन्धूनिसन्धूनित-**
**प्रेङ्खद्विन्ध्यवसुन्धराधरघनाहङ्कारशङ्कानि च।**
**क्रुध्यत्कुक्षिपुटाशुशुक्षणिकणीभूताङ्गवातापिका-**
**न्याश्चर्यञ्जनयन्त्यगस्त्ययमिनस्स्तुत्यानि कृत्यानि नः।। ३२।।**

**मातलिः** :- (रथमन्यतस्सञ्चारयन्नग्रतो निर्दिश्य)

पद्यम्- **अयं मलयभूधरः कलयति श्रियं चक्षुषो-**
**रुपेत्य यदुपत्यकामुदितचन्दनस्पन्दनाः[1]।**
**भ्रमत्कुसुमनिस्सरन्मधुपृषद्भिराप्यायिताः**
**दिशन्ति दशके दिशां तरुणमारुताश्चारुताम्।। ३३।।**

**प्रद्युम्नः** :- (विभाव्य, देवीमवलोक्य) प्रिये! पश्यत्विह भवती -

पद्यम्- **एलाचन्दनमाला वेलातिगसौरभानुकूलासु शाला।**
**स्वमी विशालास्वालापसुधां पिबन्ति बालानाम्।। ३४।।**

**विदूषकः** :- एद्ध खु एलालदिआहिं[2] परिरद्धा चन्दणद्दुमा तंबोलवेल्लीहिं गाढासिलिट्ठा[3] कमुअपाअवा विरदिसमएसु[4] मअणादुराए बम्हणीए पसहं आलिङ्गिदस्स मह सोहग्गं हरन्दि* ता एद्ध ण ठादव्वं। मादलि! माहिन्दं[5] विमाणं वेएण दूरं पट्ठावेहि।

*(अत्र खल्वेलालतिकाभिः परिरब्धाश्चन्दनद्रुमाः ताम्बूलवल्लीभिर्गाढाश्लिष्टाः क्रमुकपादपा अपि रतिसमयेषु मदनातुरया ब्राह्मण्या प्रसभमालिङ्गितस्य मम सौभाग्यं हरन्ति। तस्मादत्र न स्थातव्यम्। मातले! माहेन्द्रं विमानं वेगेन दूरं प्रस्थापय।[6])*

**।। सर्वे स्मयन्ते।।**

**मातलिः[6]** :- अनतिलङ्घनीया खलु श्रोत्रियोत्तमस्य[7] तवेयमाज्ञा - (इति तथा करोति।)

1. M. Gr.1 स्यन्दनाः
2. M. Gr.1 एललेइआहिं
3. M. Gr.1 तंबोलवंलीहिं गाढं आसिंठा
4. M. Gr.1 विरहसमएसु
5. M. Gr.1 आलिंगिअंस मह सोभंगं हरंति। ता एंध णं ठादंवं। माअलि! माहिंद
6. M. Gr.1 इयं छाया नास्ति।
7. T. Gr.1 **मातलिः** इति स्थाने **सूतः** इति अस्ति।
8. M. Gr.1 श्रोत्रियोक्तस्स्य

**प्रद्युम्नः** :- दूरतो दृष्टिं दत्वा मातले! भूतले प्रहिणु लोचने[1]।

पद्यम्- **पुरस्स्फुरति किं द्वयोः पुरमिहान्तं[2] स्त्रोतसोः**
**करम्बितमनोकहैः कनकगोपुरालङ्कृतम्।**
**उरस्तटमिवायतं मुररिपोरुपोढेन्दिरं**
**तरङ्गितघनप्रभं तरळतारहारोज्ज्वलम्।। ३५।।**

**मातलिः** :- (निपुणं निरूप्य) आकर्णयत्वायुष्मान्।

**मधुमथनकळत्रवृत्तरङ्गं मधुरविसृत्वरसह्यजातरङ्गम्।**
**रघुपतिकुलदैवतान्तरङ्गं पुरमिदमक्षियुगं पुनाति रङ्गम्।। ३६।।**

अत्र खलु- **यज्ञास्वादिनिकृत्रिमेतरगिरां यत्रैककण्ठ्यं विदुः**
**कल्याणः करुणामुखो गुणगणः काष्ठां च यत्रा ह्रुते।**
**शश्वद्विश्वजनिप्रतिष्ठितिलयांश्छंसन्ति[3] यत्क्रीडितं**
**शान्तं ब्रह्म तदेव जिह्मगपतौ जागर्ति निद्राच्छलात्।। ३७।।**

(पुनस्सभक्त्युन्मेषम्)

**नाभीकञ्जविरिञ्चिडिम्भवदनोदञ्चच्छ्रुतिश्लाघ-**
**नव्यालोलत्फणताळ[4]वृन्तपवनव्याधूतकेळिश्रमः।**
**तल्पे व्याकृतिसारसौरभजुषे स्वैरं सुखस्वापनां**
**श्छ्रेय[5]स्सोऽयमनामयं वितरतु *श्रीरङ्गधामा* पुमान्।। ३८।।**

**प्रद्युम्नः** :- (साञ्जलिबन्धं समन्तादवलोक्य) इह पुनः कतिचन-

पद्यम्- **उदीतरङ्गेश महानुकम्पा नदीतरङ्गेण कृताभिषेकाः।**
**(२३) सामोदयज्ञाहुतिवासिताशास्सामोदयज्ञास्समयं नयन्ति।। ३९।।**

**२३.** आमोदसहितयागियाज्यपुरोडाशान्याहुतिसुरभीकृतदिशः। साम्नामुदयं जानन्तीति सामोदयज्ञाः।

1. M. Gr.1 प्रणियेहि विलोचने
2. M. Gr.1 पुरमिहांतरे
3. M. Gr.1 प्रतिष्ठितिलयं शंसन्ति
4. M. Gr.1 फणिताळ
5. M. Gr.1 सुखस्वापवान् श्रेय

(अन्यतश्चक्षुर्विन्यस्य देवीं प्रति) लज्जाधने! लगतामितस्तावकीने नयने-

पद्यम्- **रतिषु मुदितस्वान्तैः[1] कान्तैस्स्वसौधविहारिभि-**
**श्श्रममनुदिनं नीता वातायनेषु कृताननाः।**
**कुवलयदृशः पश्यन्त्येतां चिरं कनकापगा-**
**महनि च ततः पुष्यत्येषा स्मितोत्पलिनीरपः।। ४०।।**

**विदूषकः** :- (कवेरजामवेक्ष्यमाणस्सहासं संस्कृतमाश्रित्य) (२४) वयस्य! कथमस्या रङ्गराजतस्फूर्तिमत्याः कनकापगेत्यभिधानम्।

पद्यम्- (२५) **शोभिताम्रपरिभूषितपार्श्वारङ्गभूषणपरिष्कृतमध्या।**
**स्वर्णवन्तमपि सह्यसुताहो रत्नसान्द्रमनुरञ्जयतीयम्।। ४१।।**

**प्रद्युम्नः** :- (सस्मितम्) सखे! सहजानि खलु चोळदेशस्पृशामीदृशानि प्रायशो भूषणानि।

**मातलिः** :- (सादरम्)
**गम्भीरध्वनिसम्पन्ना कवेरानन्दवर्धिनी।**
(२६) **सेयं प्रसन्नमधुरा[2] दाक्षिणात्यसरस्वती।। ४२।।**

किञ्च (२७) **सतरङ्गा नतरङ्गा सह्यभवा नित्यमप्यसह्यभवा।**
**दुरितं धुनीधुनीते समज्जनानां नमज्जनानां च।। ४३।।**

(इति बद्धाञ्जलिर्विमानमन्यतस्सञ्चार्य सानन्दम्) आयुष्मन्नमी समीक्ष्यन्ताम्-

**कावेरीवारिधारापुलकितपृथिवीमेदुरोदारसस्य**
**स्तोमा श्यामायमानाः कमपि नयनयोर्हन्त! वर्षन्ति हर्षम्।**
**उद्गच्छच्चूतगुच्छप्रकरसुरभितव्योमदिक्चक्रवाळा-**
**श्चोला दोलायमानक्रमुककदळिकापाळिकानाळिकेराः।। ४४।।**

२४. रङ्गम् = वङ्गम्। रतजम् = रूप्यम्।

२५. शोभि। यत्ताम्रम्। शोभिता ये आम्राः चूताश्च। स्वर्णमस्यास्तीति स्वर्णवान् तम्। अर्णांस्युदकान्यस्य सन्तीत्यर्णवः। शोभनमर्णवं स्वर्णवम्। तमिति पृथक्पदं च।

२६. गम्भीरो ध्वनिः घोषः व्यङ्ग्यश्च। कवेरस्य राज्ञः आनन्दः कवेरिति व्यस्तपदं च। सरस्वती नदी वाक्च।

२७. सतरङ्गा = तरङ्गसहिता। नतं रङ्गं यया सा। सह्यात् पर्वताद्भवा = उत्पन्ना, असह्यः भवस्संसारो यस्यास्सा। समज्जनानां स्नानसहितानां नमतां जपानां चेत्यर्थः।

1. M. Gr.1 मदिरस्वान्तैः 2. M. Gr.1 सम्पन्नमधुरा

**प्रद्युम्नः** :- (समन्तादवलोक्य सहर्षम् देवीं प्रति) प्रमदामणि ! निपुणमितः पश्यतु[1] भवती-

पद्यम्- **अनीकमतनु प्रभोरनतिगूढगाढस्तनं**
**कनत्कनकमेखलं करिकरा*भिरामोरुकम् ।***
**परिप्लवविलोचनं प्रविपुलश्रवः कुण्डलं**
**दरिद्रतममध्यमन्द्रमिडयौवतं दृश्यते ।। ४५ ।।**

**मायावती** :- (सस्मितमालोकते[2])

**मातलिः** :- (दूरतो रथमपनयति[3] ।)

**प्रद्युम्नः** :- (पुरतो निर्वर्ण्य) आखण्डलसारथे ! केयं नाम सरभसमग्रतो निर्गलति समग्रतो यशालिनी शैवलिनी ।।

**मातलिः** :- (निर्वर्ण्य)[4]

**उदकैरेनसां राशेर्नोदकैर्जनतामसौ[5] ।**
(२८) **पिनाकिनीधुनीहन्त ! वितनोत्यपि[6]नाकिनीम् ।। ४६ ।।**

(इति सवेगमन्यतः प्रस्थापयति ।)

**मायावती** :- महिन्दसारहि ! का सा इह णअरी[7] मणोरमणईकूलम्मि वेरजडत्तण विणिम्मुत्तेण[8] विअ (२९) बम्माणेण णिम्माणिदा[9] अम्हाणं अच्छीणं[10] कल्लाणं आतणदि[11] ।

*(महेन्द्रसारथे ! का सा इह नगरी ? मनोरमनदीकूले वेदजडत्वविनिर्मुक्तेनेव ब्रह्मणा निर्मिताऽस्माकमक्ष्णां कल्याणमातनोति ।)*[12]

---

**२८.** एनसां = पापानां, राशेस्समूहस्य, निवारकैः = उदकैः, पिनाकिनी = नदी । जनताम् = उपासकजनसमूहम् । यथाक्रतुन्यायप्राप्तपिनाकिनीकरणं विहाय, अपिनाकिनीं पिनाकिनी भिन्नां वितनोतीति विरोधः । नाकोऽस्या अस्तीति नाकिनी = स्वर्गवती तादृशीमपि वितनोतीति परिहारः ।

**२९.** बम्हाणेणेत्यत्र **पुंस्याणोराजवद्वान** इति ब्रह्मन् शब्दस्याणादेशः ।[13]

---

1. M. Gr.1 परिपश्यतु 2. M. Gr.1 सस्मितमवलोकते 3. M. Gr.1 रथमुपनयति
4. M. Gr.1 निर्वर्ण्य इति नास्ति । 5. M. Gr.1 जगतामसौ
6. M. Gr.1 धुनीं हन्त विधुनोत्यपिनाकिनीम् । 7. M. Gr.1 उहाणअरी 8. M. Gr.1 वेदजडंतण विमुंकेण 9. M. Gr.1 णिंमाणिआ 10. M. Gr.1 अंखीणं 11. M. Gr.1 आतणइ । 12. M. Gr.1 इयं छाया नास्ति । 13. M. Gr.1 टिप्पणी नास्ति ।

**मातलिः :-** देवि ! श्रूयताम्-

**गद्यम्-** इयं किल नियतमपङ्किलवेगवती पृथुकूलदुकूलायितद्युतिविततिविबुधतटिनी प्रभवहिमाचलायमानानां स्फटिकसौधावसधानामभिजातेषु वातायनेषु अविरतसुरतपरितापभरहरणाय समर्पितेन मुखचन्द्रमसा हृतसन्तमसाभिः (३०) अभूषितत्वदोषमपनेतुमिव भुवमवतीर्णवतीभिरमरयुवतीभिः (३१) नीरदसङ्गतावरोचकतया विहाय विहायसमिहागताभिरिव विद्युल्लताभिः (३२) अदोषाकलितप्रकाशतामवाप्तुमागताभिरिव तारकाभिः (३३) अशेषलोकमान्यतामधिगन्तुमुद्भिन्नाभिरिव नागकन्याभिः नैसर्गिकसौशील्यावनमितनयनमयूखरेखासंवलितनखकिरणशरणाभ्यां चरणाभ्यां परिभ्रमद्भ्रमराभिरामप्रसूनपरिष्वङ्गिणीं पारिजातकिसलयश्रियं परिहसन्तीभिर्निजोन्मथनबद्धकङ्कणमातङ्गकरावलेपभङ्गायमकरकेतननिकेतनमण्डनस्तम्भतया अवतीर्णाभ्यामिव कदळीकाण्डाभ्यामूरुभ्यामुल्लसन्तीभिः[1] कनकमेखलाखचितकमनीयमणिगणकान्तिस्रोतसो नाभीबिलावर्तशालिनः पुलिनायमानेन जघनेन महनीयकौशेयधारणानुमेयवस्तुभावेनावलग्नेन च रोचमानाभिः मनोहरसौन्दर्य[2]-लक्ष्मीवेणिकया मदनवीरकृपाणिकया कुचकरटिकुम्भतटोज्जृम्भमाण[3]दानधारया रोमरेखया विशोभितकृशोदरीभिः बाणघर्षणसमुपनतचूचुकापदेशमालिन्यालिङ्गितैकदेशाभ्यां पञ्चबाण-बाणशाणशिलाभ्यामिव[4] स्तनाभ्यां परिपूर्णवक्षस्तटाभिः (३४) सद्यस्तनभूभृदभिषेकानुकूल-शुद्धमौक्तिकसरस्निग्धदुग्धधाराधारायितेन गळशङ्खेन विलसन्तीभिः मूर्तिमतीभिरिव मारवीरप्रतापरेखाभिः बिम्बाधरशोभाभिः पाटलतामापन्नतया दाडिमबीजभ्रमजनकैर्दन्तमौक्तिकैः विलासाक्षरपठनदशासु समुत्सुकीकरणात् (३५) उत्पित्साव्यग्रकेळीशुकनियमनायासविशेषारुणपाणिपल्लवाभिः (३६) न भोगत्वदोषप्रहाणाय वदनतयाऽवतीर्णं स्वबन्धुं पूर्णेन्दुं निर्वर्ण्य, दूरतः प्रभामात्रपरिष्वङ्गेष्व-परितोषात् साक्षादेव समाश्लेषलिप्सया कृतावताराभ्यामिव नीलोत्पलाभ्यां

३०. अभूषितत्वं भूवासराहित्यमनलङ्कृतत्वं च। ३१. नीरदः = मेघः दन्तहीनश्च।

३२. दोषा = रात्रिस्तया कलितः दोषेण आकलितस्सम्बद्धश्च।

३३. शेषस्यानन्तस्य लोकः पाताळं तद्भिन्ने लोके समस्तलोके इति चार्थः। उद्भिन्नाभिरूर्ध्वमुद्गताभिः।

३४. स्तनभूभृतः = कुचपर्वतस्यैव, भूभृतो = राज्ञः, सद्यः = सपदि भवस्सद्यस्तनः अभिषेक इत्यादिरर्थः।

३५ उत्पतितुमिच्छा = उत्पित्सा।

३६. नभोन्तरिक्षं गच्छतीति न भोगस्तस्य भावस्तत्त्वं भोगराहित्यं च।

1. M. Gr.1 कदळीकाण्डाभ्यामुल्लसन्तीभिः
2. M. Gr.1 मनोरमसौन्दर्य
3. M. Gr.1 कुम्भतटजृम्भमाण
4. M. Gr.1 पञ्चबाणशाणशिलाभ्यामिव

नयनाभ्यामाक्रान्तकर्णसीमाभिः नासा वंशलतिकापत्राभ्यां नयनकिरणकुवलयवनव्रततिभ्यां प्रसूनास्त्रशास्त्रपुस्तकरक्षादारुशलाकाभ्यां वदनकमलानुविद्धशैवलरेखाभ्यां भ्रूभ्यां व्याख्यात-विभ्रमाभिः उदधिमध्यादुद्गमनसमयेषु[1] शैवालपरिचयशालिनेव शशाङ्कबिम्बेन निर्भरचिकुरभर-मन्दरेण[2] वदनमण्डलेन नेत्रकल्याणवर्षिणीभिः सुधाधाराभिरिव (३७) सुरतानुगुणाभिः तिसृभिर्मूर्तिभिरिव (३८) विश्वमोहनस्थेमोज्ज्वलप्रभवलय-विलसिताभिः सात्त्विकबुधसूक्तिभिरिव (३९) शुभवारणसुगतमदहरक्रमाभिः तरुणतरणिघृणिश्रेणीभिरिव (४०) विशोभितारुण्य-वरेण्यरूपाभिः आपगाभिरिव (४१) समुद्भासितरसिकतारम्याभिः अचलभूमिभिरिव (४२) कान्ताराधिकाभिः नवयौवनदीप्रमदाभिः प्रमदाभिरमरावतीमुपहसन्ती[3] प्रतिसदनमुत्सवेषु[4] समवेताभिर्वारसारसलोचनाभिः प्रपञ्चीकृतविपञ्ची-रुतसमञ्चिता **काञ्ची** नाम नगरी[5]।।

**प्रद्युम्नः** :- (विभाव्य सश्लाघम्) देवि! काममन्वर्थमेवास्याः काञ्चीत्यभिधानम्। पश्य-

पद्यम् (४३) **श्रुतिमञ्जुनादनिचयैरभिरामा सवलग्ननाभिजघनद्युतिहेतुः।**
**सतताभिरूपवरदारमणीभिः परिभूषिता विजयते शुभकाञ्ची।।४७।।**

३७. सुराणां भावस्सुरता देवत्वं सुरतं क्रीडा च।

३८. विश्वस्य = प्रपञ्चस्य मोहनानि स्थेमा = स्थितिः, उज्ज्वलः = प्रकाशमानः, प्रभव = उत्पत्तिः, लयो = नाशः एतद्रूपाणि विलसितानि यासां ताः। विश्वमोहनस्थेम्नि समस्तजनमोहस्थिरीकरणे उज्ज्वला प्रभा कान्तिर्येषां तैर्वलयैर्विलसिताभिः प्रकाशमानाभिरिति चार्थः।

३९. शुभं स्वर्गादिसुखसाधकसञ्चरितं तद्वारणः = तन्निवारकः, सुगतः = बुद्धः तदहङ्कारभञ्जकरीतिभिः। शुभः = श्रेष्ठः, वारणो = गजः, तस्य सुगतं = समीचीनगमनं तन्मदहरः क्रमः पादविक्षेपो यासां ताभिः।

४०. विशोभितमारुण्यं = रक्तिमा, विशोभि = प्रकाशमानं तारुण्यं = यौवनमिति चार्थः।

४१. अत्यन्तप्रकाशमानाभिस्सिकताभिर्वालुकाभिः रम्याभिर्नदीभिः। समुद्भासितया = रसिकतया रम्याभिस्त्रीभिरिति चार्थः।

४२. कान्तारैर्वनैरधिकाभिः। कान्तानां प्रियाणामाराधिकाभिः सन्तोषिकाभिरिति चार्थः।।

४३. श्रुतीनां = वेदानां, ये, मञ्जवो = मनोज्ञा, नादा = वर्णात्मकशब्दाः, श्रुत्योः = श्रोत्रयोः ये मञ्जवो = रम्या, नादा = ध्वन्यात्मकशब्दास्तेषां च निचयैः अभिरामा = रम्या। सवे = यज्ञे, लग्नस्संसक्तो नाभिजश्चतुर्मुखः तस्य घनद्युतेः श्रेयो हर्षजन्याधिककान्तिविशेषस्य हेतुः, वलग्नसहितस्य नाभिजघनस्य द्युतेः हेतुः। सतताभि-रूपवरदा। सदा मनोज्ञ वरदराजा। रमणीभिस्त्रीभिः परिभूषिता सततमभिरूपाः रमणीयाः पराः गुणश्रेष्ठाश्च, दाराः = पत्न्यः मण्य इव ताभिः परिभूषिता शुभा = श्रेष्ठा, काञ्चीनगरी = काञ्चीभूषा च विजयत इत्यर्थः।

1. M. Gr.1 मध्यादुद्गमनसमयेषु 2. M. Gr.1 सुन्दरेण 3. M. Gr.1 रमरावतीमपहसन्ती
4. M. Gr.1 प्रतिसवनमुत्सवेषु 5. M. Gr.1 काञ्ची नगरी

(समन्तादवलोक्य सविस्मयम्) नळिनाक्षि! नगरमिदं खलु शृङ्गारशान्तयोस्समावेशायतनम्।

पश्यात्र हि- **क्रीडासौधविटङ्कसङ्गतिजुषः केचिद्विहङ्गार्भकाः**
**कात्स्न्येनानुवदन्ति पक्ष्मलदृशां कामाक्षराणि स्वयम्।**
**शास्त्राणि क्वचिदीरयन्ति शिशवश्शास्त्राशय[1]व्याक्रिया**
**साक्षिण्यश्च विवृण्वते प्रति गृहम् (४४) शारीरकं शारिकाः।। ४८।।**

**मायावती** :- अय्यउत्त![2] एद्ध खु रोसेण अंभोअ-संभव-जाअकम्मस्स विहादं कादुकामा सरासदी[3] णईरूवं कदुअ समाअदंति सुणीअदि[4] इदिहासो।।

*(आर्यपुत्रात्र खलु रोषेणाम्भोजसम्भवयागकर्मणो विघातं कर्तुकामा सरस्वती नदीरूपं कृत्वा समागतेति श्रूयते इतिहासः।[5])*

**प्रद्युम्नः** :- शृणु देवि! तादात्त्विकं देवस्य कमलागृहमेधिनः करुणावरुणालयस्य शरणागतवात्सल्यम्-

पद्यम्- **अम्भोवेगादध्वरविघ्नोदयभीत्या, देवे खिन्ने पद्मभवे दीनदयाळुः।**
**सेतोर्बन्धे हन्त! विलम्बो भवितेति, क्षिप्रं सेतुस्सेतुकृदेव स्वयमासीत्।। ४९।।**

**मातलिः** :- देवि! न तावतैव[6] विश्रान्तं भगवता भक्तवत्सलेन। अथ पुनरशक्यव्यपोहमख-प्रत्यूहप्रत्यादेशेन परमानन्दनिरङ्कुशे कुशे शयासने भक्तिपरवशे।

पद्यम्- **वपारसं सादरमन्वभूत्क्रता-**
**वपारसंसारसरित्तरिर्हरिः।**
**समस्तवेदान्तनुत(४५)श्श्रियातसी**
**समस्तवेदान्तहृदां कृतादरः।। ५०।।**

४४. शरीरे भवश्शारीर आत्मा तमधिकृत्य प्रवृत्तं शास्त्रं **शारीरकं** = वेदान्तशास्त्रम्।

४५. श्रिया = देहकान्त्या अतस्यास्समस्सदृशः। दान्तहृदां = निगृहीतमानसानां, स्तवे = स्तोत्रे, कृतादरः।

1. M. Gr.1 शिशवश्शस्त्राशय
2. M. Gr.1 अंअउंत!
3. M. Gr.1 सरंसइ
4. M. Gr.1 समागएंति संणिअदि
5. M. Gr.1 इयं छाया नास्ति।
6. M. Gr.1 तावत्येव

अन्यच्चेदमत्र चित्रम्- (४६)

**भेत्ता गोप्ता च हरिर्महासवजुषो[1] हिरण्यगर्भस्य।**
**भयकृदिभस्याभयकृन्मूलाञ्चलयोश्चकास्ति हस्तिगिरेः।। ५१।।**

**प्रद्युम्नः** :- (साञ्जलिबन्धम्-)

**त्रिजगत्तिलकं त्रयीरहस्यं त्रिदशीमङ्गळसूत्रवारवाणम्।**
**कलभाचलकालमेघमीडे कलशोदन्वदपत्यभागधेयम्।। ५२।।**

**मातलिः** :- (वेगेन विमानमुत्तरतः प्रस्थापयति।)

**मायावती** :- देव्वराअ-सारहि! को एसो दक्खिणसुमेरू विअ को वि धराहरो[2] दिट्ठिगोअरो होदि[3] ? *(देवराजसारथे! क एष दक्षिणसुमेरुरिव कोऽपि धराधरो दृष्टिगोचरो भवति ?[4])*

**मातलिः** :- (निर्वर्ण्य देवीं प्रति)

पद्यम्- ***शेषगिरिरेष*[5] किल भूषयति पृथ्वी-**
**मानमतमेनमतिमानमहिमानम्।**
**धाम रमते तदिह पामरमतेर्य[6]-**
**दूरगमुदारगुणनीरनिधिमाहुः।। ५३।।**

किञ्च- **गगनतल[7]व्यापितरौ जगतामीशस्तटे[8] गिरेरस्य।**
**सचिरं परमव्योम्नि स्पृहां विहायैव विहरति[9] स्वैरम्।। ५४।।**

---

४६. महानासवो मद्यं तज्जुषस्तत्पायिनः हिरण्यं = हिरण्यपदं गर्भे यस्य सः हिरण्यपदघटितः हिरण्यकशिपुरिति शब्दः तच्छब्दवाच्यस्य दैत्यस्य भेत्ता = विदारकः, इभस्य भयकृत् हरिः नृहरिः मूले चकास्ति। महान् सवो = यागस्तज्जुषः तत्कर्तुः हिरण्यगर्भस्य = चतुर्मुखस्य, गोप्ता = पालकः, इभस्य = गजस्य अभयकृत् ग्राहभीति निवारको हरिः करीन्द्रवरदः हस्तिगिरेरञ्चले = अग्रे चकास्ति।

---

1. M. Gr.1 छेत्ता भोक्ता च हरिर्महाहवजुषो
2. M. Gr.1 धराधरो
3. M. Gr.1 होइ
4. T. Gr.1 इयं **छाया** नास्ति।
5. M. Gr.1 शेषगिरिरेष
6. M. Gr.1 पामरमतेर्य
7. M. Gr.1 गगतल
8. M. Gr.1 जगतां पितरौ तटे
9. M. Gr.1 सुचिरं परमे व्योम्नि स्पृहां विहायैव विहरत

**प्रद्युम्नः** :- (समन्तादवलोक्य सानन्दं देवीं प्रति)

हन्तेयमनन्यसामान्यापन्नगनगस्य धन्यता। यत एतस्य पर्वतस्य[1] सर्वतस्तटवनेषु यथाभिमतं रूपमुपादाय परं ब्रह्मैव देव्या सह विहरते। पश्य दक्षिणेन पनसवनम्-

पद्यम्- **अद्रेरस्य तटीपटीरविपिने देव्या समं दीव्यति**
**प्रोद्यन्निर्झरशीकरव्यतिकरे स्वैरं पुमानादिमः।**
**शम्पाश्लिष्टनवाम्बुदभ्रमजुषामङ्के चिरं केकिनां**
**नृत्ताडम्बरनुन्नपन्नगतया निर्दोषमन्दानिले।। ५५।।**

पश्य तावदत्यर्थ[2]मुत्तुङ्गतया शशाङ्कबिम्बचुम्बिनि शृङ्गान्तिकेऽस्मिन् शृङ्गारिणश्श्रीनिवासस्य चमत्कारं[3] कमपि।

**दैत्यारेरिह देहकान्तिनिवहे दुर्वारदूर्वाभ्रमा-**
**दङ्कन्यङ्कुरनंकुशं जिगमिषन्नन्तर्विधुं बाधते।**
**सोदर्यार्तिमवेक्ष्य सिन्धुदुहितुः खिन्ने मुखे सस्मितं**
**भावज्ञो वपुरावृणोति भगवान् पीताम्बरेण स्वयम्।। ५६।।**

इतश्च विलासिनि! विलोकय तावदिमं विनोदम्-

**हेमस्थलीषु हरिनीलशिलामयूखैः**
**किम्मीरितं कमपि कोमलमेणशाबम्।**
**दृष्ट्वा मृषामृगधिया चकिता भृशम्**
**श्रीरालिङ्गति प्रसभमञ्जनशैलनाथम्।। ५७।।**

(पुनर्निरूप्य सहर्षम्।) अत्र किल सर्वर्तुनर्तनरङ्गस्थलेष्वञ्जनशिखरिणस्तटोद्देशेषु तत इतस्तामरसवासिनी देवी स्वीकृतबहुविग्रहा स्वयमष्टाभिरपि (४७) नायिकावस्थाभिरभङ्गुर-शृङ्गारधौरेयमरविन्दनाभमानन्दयति[4]।

४७. स्वाधीनपतिकादिनायिकावस्थाभिः।

1. M. Gr.1 पर्वतस्य इति नास्ति।
2. M. Gr.1 तावदर्थ
3. M. Gr.1 चमत्कारम् इति स्थाने च इति अस्ति।
4. T. Gr.1 मानन्दयन्ति।

**मायावती** :- (सादरमालोकते।)

**प्रद्युम्नः** :- नितम्बिनीमणे! निपुणमित एव[1] वकुळतरुमूलवेदिकां निशामयतु भवती।

पद्यम् (४८) **दत्ते देव्याः कमपि तिलकं पाणिना दुर्निवार-**
**स्वेदेनास्याः स्मितवतिमुखे कौतुकी श्रीनिवासः।**
**सा तु स्वेदस्रुति विघटितस्थानविन्यासमेनं**
**वीक्ष्यादर्शे हसति दयितं मोघयत्नं विदग्धा।। ५८।।**

(अन्यतो दर्शयन्) इतश्चेयं तोयधितनयाः

(४९) **अनङ्गार्तैरङ्गैरभिनवपरिष्कारमधुरैः**
**स्पृशन्ती पर्यङ्कं मृदुकुसुमसौरभ्यसुभगम्।**
**करे कर्पूरार्द्रक्रमुकशुभवीटीश्च[2] दधती**
**मुहुः पश्यत्येषा मुकुरमपि नेतुस्सृतिमपि।। ५९।।**

अन्यतश्च जलधिकन्या।।

(५०) **निर्यातं सहसाऽपदिश्य मृगयां नाद्यापि तेनागतं**
**नूनं क्वापि लतागृहे विहरते सोऽयं समं नीळया[3]।**
**मय्येव प्रसभं तनोति मृगयां मन्दानुकम्पस्स्मरो**
**हन्तेत्युष्णमसौ श्वसित्यतितरां[4] दीर्घं च तृष्णातुरा।। ६०।।**

---

४८.**दत्ते देव्या** इत्यादिना **स्वाधीनपतिकावस्था** उक्ता। **"प्रियोपलालिता नित्यं स्वाधीनपतिका मते"**ति लक्षणात्।

४९. **अनङ्गार्तैरि**त्यादिना **वासकसज्जिकावस्था** सूचिता।
**प्रियागमनवेळायां मण्डयन्ती मुहुर्मुहुः।**
**केळीगृहं तथात्मानं सास्याद्वासकसज्जिके।।** ति लक्षणात्।

५०. **निर्यातं सहसे**त्यादिना **विरहोत्कण्ठितावस्था** प्रोक्ता।
**"चिरयत्यधिकं कान्ते विरहोत्कण्ठितोन्मना"** इति लक्षणात्।

---

1. M. Gr.1 नितम्बिनीमणि निपुणमितो
2. M. Gr.1 नववीटीश्च
3. M. Gr.1 समन्नीलया
4. M. Gr.1 श्वसत्यतितरां

इतश्च भार्गवी[1]-

**अलं वन्ध्यैरस्मत्कचभरपरिष्कारविधिभिः**
(५१) **यदर्थं यातस्त्वं[2] वनमतिघनं कण्टकचयैः।**
**क्षताकष्टं मृद्वीतनुरिति गदन्ती किल रुषा**
**न गृह्णीते नाथोपहृतमतुलं कैतकमसौ।। ६१।।**

इह च (५२) **चरणपतितं कोपेनोपेक्ष्य कान्तमसौ पुन-**
**श्शरणमथ तं गन्तुं हन्त! व्यवस्यति कातरा।**
**परिजनपरीहासालम्बाद्बिभेति च लाघवा-**
**द्दिशति पुरतो दृष्टिं भूयः प्रियोपगमाशया।। ६२।।**

(अन्यतस्सन्दर्शयन्)

**क्षणान्मा निर्वेदस्तव हृदयभूरेष हि मृषा**
(५३) **न वक्तीति[3] स्थाने विहितसमये वेतसमये।**
**शयाना विस्रब्धं छदपतनशब्देऽपि कमितुः**
**पदाघातभ्रान्त्या प्रतिदिशमसौ पश्यति मुहुः।। ६३।।** (विप्रलब्धा)[4]।

(अभितो निर्वर्ण्य) अत्र खलु तीर्थतीरेषु तत इतस्तपस्यतां तापसानां कण्टकभङ्गप्रसङ्गाय तदा तदा प्रस्थितस्य भगवतश्श्रीनिवासस्य पञ्चषानपि क्षणान् विरहमसहमाना किमाह देवी कमलवासिनी।

---

५१. **अलं वन्ध्यैरि**त्यादिना **खण्डितावस्था** प्रतिपादिता।

**नीत्वान्यत्र निशां प्रातरागते प्राणवल्लभे।**
**अन्यासम्भोगचिह्नैस्तु कुपिता खण्डितामता।।** इति लक्षणात्।।

५२. **चरणपतितमि**त्यादिना **कलहान्तरितावस्था** गदिता।

**कोपात् कान्तं पराणुद्य पश्चात्तापसमन्विता।**
**कलहान्तरिता नाम सूरिभिः परिकीर्तिता।।** इति लक्षणात्।।

---

1. M. Gr.1 **भार्गवी** इति नास्ति।  2. M. Gr.1 यातास्त्वं
3. M. Gr.1 **००००००००००००००००००च लाघवा-**
**द्दिशति पुरतो दृष्टिं भूयः प्रियोपगमाशया।। ६२।।** (अन्यतस्सन्दर्शयन्)
(३) **क्षणान्मा निर्वेदस्तव हृदयभूरेष हि मृषा**
**न वक्तीति -०००००००००००००००००** इत्येतावत् नास्ति।
4. My. Tel. Print., T. Gr.1 **विप्रलब्धा** इति नास्ति।

पद्यम् (५४) **प्रयास्यति प्रणयिनि पूर्वमेव मे**
**गतं मनः पुनरियतः क्षणानपि।**
**विलम्ब्यते कथमसुभिर्यया सुभि-**
**र्मरुज्जवं जयति मनोजवोऽथवा।। ६४।।** (प्रोषितभर्तृका)[1]

(इत्यन्यतो निर्दिश्य सविस्मयानन्दम्।)

(५५) **न चटुवचनं नो वा नीवीपरिग्रहविग्रहो**
**न च कुचपटाकृष्टिक्षोभो न चापि कचाकचि।**
**प्रसवधनुषो बाणाघातैः श्लथीकृतगौरवा**
**प्रसभमभितः कान्तायासौ ददाति वपुस्स्वयम्।। ६५।।** (अभिसारिका)[2]

**मायावती** :- (सर्वतः पर्वतमवलोक्य विस्मयते।)

---

५३. **क्षणान्मा निर्वेद** इत्यादिना **विप्रलब्धावस्था** कीर्तिता।
**क्वचित् सङ्केतमावेद्य दयितेनाथ वञ्चिता।**
**स्मरार्ता विप्रलब्धेति कलाविद्भिः प्रकीर्त्यत।।** इति लक्षणात्।

तव हृदयभूः = हृदयजन्मा, निर्वेदः क्षणात् = क्षणमात्रवियोगान्मा भूत्। क्षणकालं मद्विश्लेषं सहस्व सत्वरमागमिष्यामीति भावः। स्वोक्तार्थदार्ढ्याय भगवान् प्रतिजानीते। एष इत्यादिना एषः त्वत्प्रियोऽह-मित्यर्थः। मृषा न वक्ति हि। **"अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचने"**ति ह्येतस्य प्रतिज्ञा।

अत्र रामो द्विर्नाभिभाषत इति वत् स्ववचनसत्यताद्रढिमद्योतनाय स्वस्यैवैष इत्येतच्छब्देनान्यतया निर्देशः। इति विहितसमये भगवता कृतसङ्केते वेतसमये = वेतसप्रचुरे स्थाने। तन्निकुञ्ज इत्यर्थः। विस्रब्धम्। मत्प्रियो नानृतं ब्रूयादवश्यमागमिष्यत्येवेति विस्रम्भयुक्तं यथा स्यात् तथा शयाना सती, छदानां = निकुञ्जपर्णानां पतनेन जाते शब्देऽपि कमितुः (कम्पितुः) प्रेयसः पदाघातः = पादन्यासशब्द इति भ्रान्त्या। चलति पतत्रे पतति च पत्रे इत्युक्तविधभ्रमेणेत्यर्थः। असौ नायिका दिशि दिशि प्रतिदिशं यथार्थे वीप्सायामव्ययीभावः। **अव्ययीभावे शरत्प्रभृतिभ्य** इति समासान्तष्टच्। मुहुः पुनः पश्यति। औत्सुक्यातिशयोऽनेन व्यज्यते।

५४.**प्रयास्यती**त्यादिना **प्रोषितभर्तृकावस्था** निर्दिष्टा।
**"देशान्तरं गते कान्ते खिन्ना प्रोषितभर्तृके"**ति लक्षणात्।

५५. **स चटुवचनमि**त्यादिना **अभिसारिकावस्था** दर्शिता।
**"कान्ताभिसरणोद्युक्ता स्मरार्ता साभिसारिके"**ति लक्षणात्।।

---

1. My. Tel. Print., T. Gr.1 **प्रोषितभर्तृका** इति नास्ति।
2. My. Tel. Print., T. Gr.1 **अभिसारिका** इति नास्ति।

**मातलिः** :- (निरूप्य)

**अनन्तः पाताळादधिगतमहीमात्रभरण-**
**स्समुद्धिद्य क्षोणीं सरभसमहार्या कृतिधरः।**
**धृतां वातैरीर्ष्याकलुष इव वाताशनपतिः**
**बिभर्तीवोत्तुङ्गैर्दिवमपि सहस्रेण[1] शिखरैः।। ६६।।**

(अञ्जलिं बद्ध्वा)

**असुरगणराजयक्ष्मा क्षेमं कौमोदकीलक्ष्मा।**
**जगतामपहतपाप्मा फणिगिरिसद्मा[2] करोतु परमात्मा।। ६७।।**

**प्रद्युम्नः** :- (साञ्जलि[3]स्सभक्तिप्रकर्षम्।)

(५६) **भद्रायास्तु धृतो वृषाद्रिपतिना वक्षस्तटे कौस्तुभो**
**यत्रात्मप्रतिबिम्बमम्बुजभवस्सेवाक्षणे लक्षयन्।**
**सामन्तात् प्रतिसृष्टिशङ्किहृदयश्शोकोदयादुत्थितै-**
**रासारैर्नयनाम्भसामभिनयत्यानन्दबाष्पोद्गमम्।। ६८।।**

**मायावती** :- (सप्रश्रयमञ्जलिं बध्नाति।)

पद्यम्- **खेमं पएदु सिरिणाहधदो[4] मणिंदो**
**वच्छम्मि से सह भुवं किर पेच्छिरन्ती[5]।**
**कीळारुसासु कमला चलणप्पहारे**
**डोळाअमाणमणुहोदि[6] मणं घिणाए[7]।। ६९।।**

५६. वृषाद्रिपतिना = वेङ्कटाद्रिनाथेन, वक्षस्तटे धृतः कौस्तुभः भद्रायास्तु। यत्र = यस्मिन् कौस्तुभे अम्बुजभवः = चतुर्मुखः, सेवाक्षणे = परिचर्यावसरे। आत्मप्रतिबिम्बं लक्षयन् पश्यन्। सामन्तात्। स्वसदृशात्। दायादादिति यावत्। शङ्कत इति तच्छङ्किहृदयं यस्य सः। अन्योऽपि चतुर्मुखो भगवद्धृदयाज्ञातः। सोऽयं मम सामन्तः प्रतिसृष्टिं कुर्यादेवेति स्वप्रतिबिम्ब एव सामन्तभ्रान्त्या प्रतिसृष्टिं शङ्कमान इति भावः। अत एव भ्रान्तिमदलङ्कारः। अत एव शोकोदयात् स्रष्टन्तरसम्भावना प्रयुक्तात्। उत्थितैः। नयनाम्भसामासारैः आनन्दबाष्पोद्गम-मभिनयति। दायादोदयसम्भावनाप्रयुक्तशोकोद्गतबाष्पं स्वतुल्यानुजोदयप्रयुक्तानन्दबाष्पतया पर्यवसाययतीत्यर्थः। तेन चतुर्मुखस्याकारगोपनकौशल्यं व्यञ्जितम्। सामन्तादित्यत्र सामस्त्यादिति पाठस्तु लेखकप्रमादकृत इति ध्येयम्।

1. M. Gr.1 सस्रेण 2. M. Gr.1 फणिपतिसद्म 3. M. Gr.1 प्राञ्जलि
4. M. Gr.1 सेमं पदेउ सिरिणाहधओ 5. M. Gr.1 भवं किर पेंछरंजि 6. M. Gr.1 होइ
7. M. Gr.1 खिणाए

***(क्षेमं प्रददातु श्रीनाथधृतो वक्षस्य-***
***स्य सह भुवं किल प्रेक्षणसाधुकारिणी।***
***क्रीडारुट्सु कमलाचरणप्रहारे***
***दोलायमानमनुभवति मनोघृणया।। ६९।।)***

**मातलिः** :- अत्रैव चिरं विलम्बितम् - (इति त्वरया विमानमन्यतः प्रस्थापयति।)

**प्रद्युम्नः** :- (विमानजवं विभाव्य देवीमुद्दिश्य च[1]) पद्ममुखि ! पश्य तावदस्मासु स्थावराणामपि निर्व्याजं प्रेम।

पद्यम्- **नेदीयांसि यथा यथा हि पुरतो वस्तूनि सूक्ष्माण्यपि**
**स्थौल्यं यान्ति तथा तथा सपदि नस्संयोगहर्षादिव।**
**पश्चात्तानि यथा यथा बहुतरे दूरे पतन्ति क्षणाद्रूपं**
**यान्ति तथा तथा कृशतमं विश्लेषदुःखादिव।। ७०।।**

**मातलिः** :- (अग्रतो निर्दिश्य[2])
**वैदेही सखपाद[3]पङ्कजरजोविन्यासधन्या पुर-**
**स्सेयं साम्प्रतमाविरस्ति नयनामोदाय *गोदावरी*।**
**आनीतेन यदम्भसैव शुचिना सङ्गेन गाङ्गे जनै-**
**रुद्धृत्याति चिरं धृतेऽपि सलिले सौरभ्यमारभ्यते।। ७१।।**

(सवेदं विमानमन्यतः प्रस्थाप्य पुरो दर्शयन्)[4]
**साकं देव्यालोकय भूलोकविभूषा-मार्यावर्तं पुण्यविवर्तं नयनानाम्।**
**यत्रोत्पन्नाश्चित्रमिहामुत्र च मर्त्याः, कालक्षेपं कर्मभिरग्र्यैः कलयन्ति।। ७२।।**

(पुनरग्रतः प्रस्थाप्य सहर्षम्।) आयुष्मन्नियं हि -
***काशी* त्रिदिवदेशी या शोभते शाङ्करी पुरी।**
**अपि नाकः पिनाको वा करस्था[5] यत्र तस्थुषाम्।। ७३।।**

1. M. Gr.1 च इति नास्ति। 2. M. Gr.1 अग्रतो निर्दिशन् 3. T. Gr.1 वैदेही नखपाद
4. M. Gr.1 सवेगमन्यतः प्रस्थाप्य पुरतो दर्शयन् 5. M. Gr.1 करस्थो

**प्रद्युम्नः** :- (निपुणं निर्वर्ण्य देवीं प्रति-) महिळामणि! पश्येह महोन्नतेषु प्रासादेषु -

पद्यम्- **क्रीडासङ्गरसम्भ्रमेषु दयितैः क्लेशं भृशं प्रापिताः**
**विस्रब्धं तदुरस्सु केळिविरतौ सुप्ता विदग्धाङ्गनाः।**
**बुध्यन्ते नु निशान्तमन्तिकगतस्वर्लोककल्लोलिनी**
**नाळीकोदरबन्धनिर्यदळिनी झङ्कार[1]शङ्खारवैः।। ७४।।**

**विदूषकः** :- (पुरीं निरीक्ष्य सहासं संस्कृतमाश्रित्य) -
**वाराणसि[2] त्वयि सदैव सरोगभूमा-**
**वारोग्यभूमिरिति काम[3]मळीकवादः।**
**सन्तुस्थुषां[4] भवति यत्र वपुस्स शूलं**
**जन्मान्तरेऽपि जलभारवदुत्तमाङ्गम्।। ७५।।**

*।। सर्वे स्मयन्ते।।*

**मातलिः** :-
(५७) **काश्यामावासस्याकाङ्क्षा यस्यास्ति भवविरक्तस्य।**
**काश्यामावासस्याकाङ्क्षा तस्य हि[5] भवानुरक्तस्य।। ७६।।**

---

५७. भवे = संसारे, विरक्तस्य यस्य = पुंसः, काश्यां = वाराणस्याम्, आवासस्य = निवासस्याकाङ्क्षा इच्छास्ति। तस्य = पुंसः। भवानुरक्तस्येति विधेयविशेषणम्। संसारानुरागवतस्सतः काश्याम् आवासस्या-काङ्क्षा भवति हीति विरोधः। भवविरक्त्या काशीवासाकाङ्क्षावतः पुरुषस्य भवानुरक्त्या तदाकाङ्क्षाया अयुक्तत्वात्।

परिहारस्तु काश्या-मा-वाससि आकाङ्क्षा इति च्छेदः। भवे = रुद्रे, अनुरक्तस्य तस्य। वाससि = वस्त्रे, आकाङ्क्षा, मा काश्या = न प्रकाशनीयेत्यर्थः। काशृ-धातोर्दीप्त्यर्थकादर्हार्थे यत्। मा शब्दो नञर्थकः। अमानोनाः प्रतिषेधे इत्युक्तेः। कृत्यानां कर्तरि वेति षष्ठी। रुद्रस्य दिगम्बरतया तदनुरक्तस्य यथाक्रतुनयेन दिगम्बरत्वप्राप्तेरवश्यं भावित्वाद्वसनविषयकाकाङ्क्षाप्यप्रकाश्येति भावः।

भवविरक्तस्य यस्य काश्यामावासस्याकाङ्क्षेत्यत्र विचित्रा जगतः कृतिर्हरेर्हरिणा वेत्यत्रैव शेषे विभाषेत्यनेन कर्तृकर्मणोरुभयोरपि षष्ठ्यविरुद्धा। तेनात्रोभयप्राप्तौ कर्मणीति नियमेन कर्तरि षष्ठ्यनौचित्यशङ्काया नावकाश इति ध्येयम्।

---

1. T. Gr.1 झुङ्कार 2. M. Gr.1 वारणसि 3. M. Gr.1 वाराग्यभूरिति निकाम
4. M. Gr.1, T. Gr.1 सन्तस्थुषां 5. M. Gr.1 **हि** इति नास्ति।

(पार्श्वतो दर्शयन्नञ्जलिं बद्ध्वा)

**पादाब्जप्रसरन्मरन्दलहरी प्रौढा बलिद्वेषिणो**
**नृत्यन्मृत्युजिदुत्तमाङ्गगळितस्संफुल्लमल्ली सरः।**
**मेदिन्यामकृशो भगीरथयशोराशिर्भवाशी विषक्ष्वेळो-**
**न्माथसुधाझरी भवतु वो भव्या यदि व्यापगा।। ७७।।**

**प्रद्युम्नः** :- (निर्वर्ण्य सश्लाघम्)

(५८) **प्रथितसगरापत्यप्राणप्रतिप्रसवस्सतां**
**सुकृतपदवीमुक्ताहारः क्षितेस्सुरनिम्नगा।**
**दुरितविततेर्लोपस्तापत्रयस्य महौषधं**
**हृदयतमसामित्संज्ञेयं[1] पुनाति धिनोति च।। ७८।।[2]**

(पुनस्स चमत्कारम्)

(५९) **लीनासि[3] स्नानकर्तुश्शिरसि तव भवत्यम्ब! गम्भीरता**
**काक्कातश्शीतक्रमस्ते[4] दृगनलकलुषायत्तव द्रष्टुरेव।**
**पीतं त्वद्वारि कण्ठे गदति[5] तव कथं माधुरी साधुरीतिः[6]**
**कस्माद्च्छासि गङ्गे! भगवति! भसितैर्धूसरस्त्वज्ञलार्द्रः।। ७९।।**

---

५८. केनचित्प्राप्तस्य विधेर्निषेधशास्त्रेण बाधे प्राप्ते, तादृशनिषेधं बाधित्वा, पुनर्विधिप्रापणं प्रति प्रसवः बाधकबाधनेन प्राप्तस्थापनमिति यावत्। पूर्वं स्थितानां कपिलकोपेन भस्मीभूयमृतानामपि पुनर्गङ्गाम्भसा स्वर्गप्रापणादुज्ञीवनमभूदिति भावः। हृदयतमसां पापजन्याज्ञानान्धकाराणाम् इत्संज्ञानिवारिका। इत्संज्ञास्थले संज्ञोद्देश्यस्य **तस्य लोप** इति शास्त्रेण लोपविधानेन निवृत्तेस्तत्सादृश्यात् तमोनिवर्तकत्वेन गङ्गाया इत्संज्ञात्वेन निरूपणं कृतम्।।

५९. हे भगवति! अम्ब! गङ्गे! यस्मात् स्नानकतुश्शिरसि लीना सितस्मादेतादृश्या स्तनगम्भीरता = अगाधता। का = का नाम ? न कापीत्यर्थः। गाम्भीर्यं चेतरैरस्पृश्यतलत्वम्। स्नातृशिरोनिलयनेन कथं तव गाम्भीर्यमित्यर्थः। स्नातुश्शिवसारूप्यं भवतीति हृदयम्। यत् = यस्मात् कारणात्, तव= त्वां, द्रष्टुः = पश्यत एव। कर्तृकर्मणोः कृतीति कर्मणि षष्ठी। दृक् = नयनम्, अनलेनाग्निना, कलुषा = तप्तेति यावत्। अतः = कारणात्, ते = तव, शीतक्रमः, क्व = नैवेत्यर्थः।

---

1. M. Gr.1 हृदयतमसामुत्संज्ञेयं
2. M. Gr.1 उच्छब्दार्थः सूर्यः तस्य संज्ञा।
3. M. Gr.1 लीलानासि
4. M. Gr.1 किं ज्ञातशशीतः क्रमस्ते
5. M. Gr.1 गरति
6. M. Gr.1 साधुरीभिः

अपि च — **भागीरथि! बहुलापा! भगवति! भवती कथं पुनरपापा।**
(६०) **शैवालकप्रहाणेऽप्यधिगतशैवालका भूमौ।। ८०।।**

किञ्च (६१) **प्रादुर्भूय हिरण्यहारिचरणात् प्रभ्रश्य सन्मार्गत-**
**स्संसृष्टा गुरुतल्पगेन शिरसि ब्रह्मोत्तमाङ्गच्छिदः।**
**विख्यातासि सुरापगेति जलराश्या सङ्गिनी सा**
**तथाप्यम्ब! त्वं पतनीयकल्मषजुषः पुंसः पुनीषे पुनः।। ८१।।**

किं बहुना — **पीतस्त्वद्भुवनकणो द्विसप्तधा**
(६२) **तैर्जातोऽन्तर्जठरमथापि रोगहन्त्री।**
**त्वत्पायी बहुमुखवत्सनाभिशाली**
**त्वां गङ्गे! कथममृतात्मिकां वदन्ति।। ८२।।**

---

त्वद्द्रष्टृलोचनस्यैवानलतापे सति क्व तव शीतलिमेति भावः। त्वद्दर्शनेनैव रुद्रसारूप्यं लभ्यत इति हृदयम्। क्वात इत्यत्र ज्ञात इति पाठे तस्माच्छीशक्रमो ज्ञात इत्युपालम्भपरतयाऽर्थो नेयः।

परन्तु किं शब्दाभावप्रयुक्तः प्रक्रमभङ्गो दुष्परिहरः। अत्र पक्षे द्वितीयपादे यच्छब्दस्योत्तरवाक्यस्थत्वेन पूर्ववाक्ये। साधुचन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामतारके इत्यत्रेव तच्छब्दस्सामर्थ्याल्लभ्यते। अन्यपादेषु यत्तच्छब्दयोरुभयोरनुपादानेऽपि ये नाम केचिदिहेत्यत्रेवोभयमपि सामर्थ्याल्लभ्यते। प्रपञ्चितं चैतत् काव्यप्रकाशिकायाम्। यस्मात् त्वद्वारि पीतं सत् कण्ठे गरति = गरमिवाचरति विषं भवतीत्यर्थः। तस्मादीदृश्यास्तव माधुरीसाधुरीतिः कथम्। गङ्गाजलपानाच्छितिकण्ठत्वं लभ्यत इति हृदयम्। यतः त्वज्जलार्द्रः पुरुषः भसितैर्धूसरो भवति। ततः कस्माद्धेतोस्त्वमच्छा निर्मलाऽसि। त्वज्जलाभ्युक्षणमात्रेण भस्मधूसरत्वलाभे कथं तव स्वच्छता स्यादिति भावः। शिवसारूप्यं लभ्यत इति तत्त्वम्।।

६०. बहुला आप = उदकानि यस्यास्सा बहुलापा। ऋक्पूरब्धूरित्यादिना समासान्तोऽप्रत्ययः। अपगता आपो यस्या इत्यपापा अब्रहितेति विरोधः। पापसम्बन्धरहितेति परिहारः। शैवालकप्रहाणेऽपि जलनीलीत्यागेऽपि अधिगतशैवालकाप्राप्तजलनीलीकेति विरोधः। शिवसम्बन्धिनोऽलकस्य त्यागे इत्यर्थः। शिवशिरसोऽवतीर्य भूमौ प्रसरणानन्तरं जलनीलीसम्बन्धं प्राप्तेति भावः।

६१. हिरण्यहारी = स्वर्णस्तेयी। नामैकदेशे नामग्रहणाद्धिरण्यकशिपुसंहारी च। सन्मार्गतः = समीचीनमार्गात्। सतां, नक्षत्राणां मार्गात् = आकाशाच्च। ब्रह्महन्तुश्शिरसि = चतुर्मुखस्य भूतपूर्वपञ्चमशिरश्छेत्तुश्शिवस्य शिरसि, गुरुपत्नीगन्त्रा = बृहस्पतीपत्नी तारा गन्त्रा चन्द्रेण च। संसृष्टा = संसर्गवती। सुरापगा = मद्यनदी देवनदीति च प्रसिद्धाऽसि। जलराशिः = लडयोरभेदाज्जडसमूहः जलनिधिस्समुद्रश्च।

(पुनस्सादरं निर्वर्ण्य देवीं प्रति)

(६३) **प्रियविरहशुचेव पाण्डुरुञ्चै-रनुचलिता यमुनासरस्वतीभ्याम्।**
**अतनुविसरदाशु गेरिता सा, वभिसरति स्वयमादरेण कान्तम्।। ८३।।**

**मायावती** :- (सानुस्मरणाभिलाषम्) अमरभत्तुणो सारहि अय्यउत्तस्स[1] खु वअणेण अमुणा बुद्धिमारोहमाणाए जउणाधुणीए[2] रोहं विब्भमसमएसु भमंतस्स मुउंदस्स मज्झ अय्यस्स[3] चलणणलिणपराअ-परिअअकिदत्थं दट्ठुं उक्कण्ठिदि[4] मे हिअअं।।

*(अमरभर्तुस्सारथे! आर्यपुत्रस्य खलु वचनेनामुना बुद्धिमारोहन्त्या यमुनाधुन्याः रोधः - विभ्रमसमयेषु भ्रमतो मुकुन्दस्य ममार्यस्य चरणनळिनपरागपरिचयकृतार्थं द्रष्टुमुत्कण्ठते मे हृदयम्।[1])*

---

६२. आर्तैः = आमयाविभिः पक्षे सूर्यातपतप्तैः, न तु वक्ष्यमाणफलाभिलाषिभिरिति भावः। त्वद्भुवनकणः = त्वज्ञलवः, पीतस्सन् अन्तर्जठरं द्विसप्तधा = द्विरावृत्तस्सप्त द्विसप्त। सुजर्थे बहूव्रीहिः। तस्मात् संख्याया विधार्थे धा इति प्रकारार्थे धाप्रत्ययः। जातः = चतुर्दशधा परिणत इत्यर्थः। अथापि रोगहन्त्री भवसीत्याश्चर्यम्।

**स्वच्छं लघु च पथ्यं स्याज्ञलं तद्येन जीर्यते। भुक्तमन्नादिकं तत्तु पेयमारोग्यकांक्षिभिः।।**

इति वैद्यामृतोक्तरीत्या त्वज्ञलस्य रोगहन्तृता दुर्घटा। पीतस्य त्वदेककणस्य चतुर्दशधा उदरेऽभिवृद्धत्वादित्येकः। फलान्तराभिसन्धिनापि गङ्गाजलकणमेकं पिबतश्चतुर्दशभुवनान्युदरे भवन्ति। किमुतैदंपर्येण। नारायणसारूप्यं भवतीत्यन्यश्च भावः। भुवनं लोकजलयोरिति यादवः। कणशब्देन विश्वम्भरजठरे चतुर्दशानां भुवनानामपि कणप्रायतयाऽवस्थानमिति व्यज्यते।

हे गङ्गे! त्वां पिबतीति त्वत्पायी = पुरुषः। बहुमुखो = नानाविधो, वत्सनाभिः = विषविशेषः, तेन शालत इति बहुमखवत्सनाभिशाली भवति। ईदृशीं त्वाममृतात्मिकाम् = अमृतस्वरूपां कथं वदन्ति त्वज्ञलं पिबतो वत्सनाभिसंज्ञविषशालित्वे तवामृतात्मकत्वोक्तिरयुक्तेति भावः। बहुमुखश्चतुर्मुखो वत्सो यस्यां सा बहुमुखवत्सा। तादृश्या नाभ्या शालत इति तथोक्तः। अत्रापि पूर्ववद्भगवत्सारूप्यमेव विवक्षितम्। अमृतात्मिकाम् = अमृतस्वरूपां सुधामधुरां जलमयीं वा वदन्तीति तु तत्त्वम्।।

---

1. M. Gr.1, T. Gr.1 अंअउंतंस
2. M. Gr.1 बुंधिं आरोहमाणीए जमुणाधुणीए
3. M. Gr.1 अंझंस, T. Gr.1 अंअंस
4. M. Gr.1 उंकंठइ, T. Gr.1 उंकंठदि

**मातलिः** :- (प्रद्युम्नमवलोकते।)

**प्रद्युम्नः** :- मातले! मामकीनस्य वचनस्य पुरोवादमवधेहि तावदिदं मञ्जुभाषिण्या भाषितम्।

**मातलिः** :- यथाहतुरायुष्मान् देवी च (इति विमानमुपयमुनमुपनीय पुरतो दर्शयन्त्सबहुमानम्[2])

इयं खलु- **कलिन्दकन्या विहरन् मुकुन्दपादाब्जविन्यासविशेषधन्या।**
**चिरं धरण्यां सुमनस्तटिन्या हरत्यनन्या जगतामुदन्याम्।। ८४।।**

अपि च — **पुनाति यमुना सेयमधुना मधुनाशिनः।**
(६४) **पल्लवीभावसाक्षिणीपयसाक्षिणी।। ८५।।**

पुरा खल्विह भवतः पितृचरणाः -

**स्वच्छन्दं पुलिने कलिन्ददुहितुस्सिष्णासया स्थापितं**
**हत्वा मन्दमुपेत्य चेलनिचयं कुन्दं मुकुन्दश्श्रयन्।**
**आदित्सूः प्रतिबिम्बिताम्बरकुलान्यालम्ब्य वन्ध्यैः**
**करैरभ्यम्भस्समवेक्ष्य गोपवनिताः पीताम्बरस्सिष्मिये।। ८६।।**

**प्रद्युम्नः** :- (सहर्षशुश्रूषम्) अथ कीदृशीं दशामानशिरे व्रज सुदृशः।

**मातलिः** :- अथ कथञ्चिदस्यैव धूर्तमूर्धन्यस्य नन्दापत्यस्य कृत्यमिदमित्यवगत्य गत्यन्तरमजानतीनामुन्मीलदूर्मिनिर्मृष्टकुचतटघटितकुङ्कुमक्षोदपङ्किलतया व्यपगतस्वच्छभावेषु सलिलेषु सलज्जमाकण्ठमज्जितगात्रीणां स्तोत्रशतगात्रीणां मानगोपनाभ्यर्थनापिशुनैरञ्जलिपुञ्जैः पिञ्जरकञ्जमुकुळकञ्चुकितां भानुसुतामातन्वतीनां व्रजयुवतीनामदयिष्टवसनान्यदत्त च स्वयमापदि द्रौपदीवसनवर्धनचणविचित्रशक्तिको निरुपाधिककृपाधिकगुणशाली वनमाली।।

---

६३. प्रियविरहदुःखे शरीरपाण्डिमा शरीरकार्श्येन स्वतो गमनाशक्तौ सखीकरावलम्बनं च सम्भावितमिति भावः। अतनोः = मन्मथस्य, विसरद्भिराशुगैः = बाणैः, ईरिता = पतिसमीपगमनं प्रति प्रेरिता। अतनु = अधिकं विसरन्नाशुगो = वायुः, तेनेरितेति चार्थः।

६४. मधुनाशिनः = श्रीकृष्णस्य, **प**ल्लवीनां = गोपाङ्गनानां विषये यः पल्लवीभावः विटत्वाभिनयः तस्य साक्षिणी = साक्षाद्द्रष्ट्री। यमुनातीरवानीरकुञ्जेष्वेव **व**ल्लवीसम्भोगसौभाग्यस्य भगवता लब्धत्वात्। सेयं यमुनापयसा अम्भसा अक्षिणी पश्यतामस्माकं लोचने अधुना पुनातीत्यर्थः।।

---

1. M. Gr.1 दर्शयन् सबहुमानम् 2. M. Gr.1 इयं छाया नास्ति।

**प्रद्युम्नः** :- अहो! महदेतदखिलजगत्स्वामिनस्तावदन्यादृशं शृङ्गारचेष्टितम्।

**मातलिः** :- आस्तामेतत् आकर्ण्यतामन्यदपि-

***।। सर्वे सादरमाकर्णयन्ति।***

**गोपीः क्वापि घने कदम्बकवने केनापि च छद्मना**
**हित्वा हन्त! कळिन्दजा तटवनं गत्वा समं राधया।**
**छन्नेषु स्वपदेषु मारुतचलत्सूनच्छटारेणुभिः**
**मार्गन्तीभिरमूभिरप्यविदितश्चिक्रीड चक्री चिरम्।। ८७।।**

किं बहुना - **निस्त्रुट्यच्छकटासुराणि कुहना निष्पीतदुष्पूतना**
**भूतप्राणमरुन्ति भञ्जिततृणावर्तप्रवृत्तीनि च[1]।**
**केळीक्षाळितदर्पकाळियफणक्ष्वेळ[2]व्यपायोल्लसत्**
**काळिन्दीनि च खेलितानि कुशलं कृष्णस्य पुष्णन्तु वः।। ८८।।**

(पुनस्सानुस्मरणरोमाञ्चम्।)

**उत्कर्णवन्यमृगमुन्मुखधेनुयूथ-**
**मभ्यर्णसम्मिळदुदञ्चलबालवत्सम्[3]।**
**उन्मत्तगोपिकमुदञ्चदहि प्रपञ्चं**
**हृद्यं हरेः किमपि वेणुरुतं पुनातु।। ८९।।**

(पुनर्निध्याय।)

**मरकतखण्डतुल्यमधि[4]मौळिशिखण्डधरं**
**कलमुरळीनिनादतरळीकृतविश्वजनम्।**
**रतिकिलकिञ्चितैकरसिकं व्रज वामदृशां**
**प्रमुषितगोपमस्तु[5] परवस्तु तदस्तु मुदे।। ९०।।**

---

1. M. Gr.1 प्रवर्त्तीनि च। 2. M. Gr.1 फणिक्ष्वेळ
3. M. Gr.1 वालवत्सम्। 4. M. Gr.1 मरकतखण्डकल्पमधि
5. M. Gr.1 प्रमुषितगोपमस्तु इति स्थाने प्रमुषितगो-इति अस्ति।

**मायावती** :- (सानुध्यानं संस्कृतमाश्रित्य)

**करतलप्रमिळन्मुरळीकलस्वरतरङ्गसमाकुलगोकुलम्।**
**मरकतद्युति पातु महः परात्परतरं रतरञ्जित[1]गोपिकम्।। ९१।।**

**प्रद्युम्नः** :- (सभक्तिप्रकर्षमन्तःकरणमुद्दिश्य)

**दुरध्वजनरञ्जनव्यसनदुर्भगोदन्तया**
**विशिष्टकृतनिन्दया विषयचिन्तया किं तया।**
**रमस्व हृदयस्वयं रतिमपास्य दुस्संसृतौ**
**समुल्लसितवल्लवीसरसनर्मणि ब्रह्मणि।। ९२।।**

(पुनस्सानुध्यानमानन्दबाष्पोद्गममभिनीय)

**अप्राकृताद्भुतनिसर्गपवित्रमूर्ते-**
**रस्मद्गुरोर्ध्रुवमवेक्षणयोग्यतायै।**
**सावद्यनैकविषयव्यतिषङ्गदुष्टे**
**सङ्क्षाळयन्ति नयने मम हर्षबाष्पाः।। ९३।।**

**मातलिः** :- आयुष्मन्! स्थाने तवायमतिवेलः तत्तादृशे पितरि भक्तिप्रकर्षः।

**मायावती** :- (अदक्षिणाक्षिस्पन्दमासूच्य)

अम्हो! मादलि! अदिसिग्घं एव्व अय्यूजणं[2] पेक्खिदुकामो वामलोअणो एसो अम्हाणं इत्थं एद्ध विलंबं असहमाणो सअं एव्व पुरदो गच्छिदुं विअ उच्चलदि[3]।।

*(अहो! मातले! अतिशीघ्रमेव आर्याजनं द्रष्टुकामं वामलोचनमेतदस्माकमित्थमत्र विलम्बमसहमानं स्वयमेव पुरतो गन्तुमिवोच्चलति।।)*

1. M. Gr.1 रतिरञ्जित
2. M. Gr.1 माअळि अदिसिंघं एंव अंजूजणं, T. Gr.1 अंआजणं
3. M. Gr.1 उंचलइ

**विदूषकः** :- मादलि![1] मह वि अज्ज चिरविरहिद[2]-तणअ-समाअम-सन्तोसेण ऊसवकत्तुणा अच्चुदेण[3] कादव्वे बम्हण-समाराहणम्मि घिदाणं[4] ऊसारेहिं संपुण्णाहुदि-लाहकोदूहळादो[5] विअ जठलाणलो अच्चत्थं उच्चिट्ठदि[6]।।

*(मातले! ममाप्यद्य चिरविरहिततनयसमागमसन्तोषेण उत्सवकर्त्राऽच्युतेन कर्तव्ये ब्राह्मणसमाराधने घृतानामासारैस्सम्पूर्णाहुतिलाभकौतूहलादिव जठरानलोऽत्यर्थमुत्तिष्ठति।[7])*

***।। सर्वे स्मयन्ते।।***

**प्रद्युम्नः** :- सूत! सपदि प्रवेशय द्वारकामधिकेन रंहसा मानसानपि जवानतिशयानं व्योमयानम्।

**मातलिः** :- निशामयत्वायुष्मान् निमेषमात्रेण यदुपनयामि विमानं यदुपतिपदरजःपवित्रितं द्वारकावकाशम्[8] (इति तथा करोति)। (पुरतश्च निर्दिश्य सानन्दम्।) एषा हि -

**अमरावतीव वियति द्वारवती जयति[9] जलनिधौ नगरी।**
**अनुभवति (६५) हरिरमुष्यां चिरमधुना नन्दनागमामोदम्।। ९४।।**

(निपुणं निर्वर्ण्य)

**द्राघिष्ठवीचीकरदीयमानफेनप्रसूनप्रचयैः पयोधिः।**
**गर्जामिषादुच्चतरं स्तुवानः पुरीं हरेः पूजयतीव भक्त्या।। ९५।।**

६५. हरिः = इन्द्रः नन्दनवनस्थानाम्, अगमानां = वृक्षाणाम्, आमोदं = परिमळम्। हरिः = श्रीकृष्णः नन्दनस्य = सुतस्य, आगमेन = आगमनेन जातमामोदं = सन्तोषमिति चार्थः।

1. M. Gr.1 माअळि
2. M. Gr.1 चिरविरहिअ
3. M. Gr.1 अंचुएण
4. M. Gr.1 घिआणं
5. M. Gr.1 लाहकोऊहळादो
6. M. Gr.1 विअ जढलाणलो अंचंठं उंचिंठइ।
7. M. Gr.1 अहो मातले .... मुत्तिष्ठति इति पर्यन्तच्छायां टिप्पणीकारेण योजिता। मूले नास्ति।
8. M. Gr.1 द्वारकासकाशम्
9. My. Tel. Print., T. Gr. 1 **जयति** इति नास्ति।

**प्रद्युम्नः** :- (समन्ताद्विभाव्य सश्लाघम्)

**प्रायः प्रपातपनतापजुषां घनानां**
**पूर्तं महत्सगरपुण्यकुलोद्भवानाम्।**
**गोत्रारिभीतधरणीधरगुप्तिभूमि-**
**जैवातृकस्य जनिधाम जयत्युदन्वान्।। ९६।।**

**विदूषकः** :- किं वअंस! सलाहसिकुंभ[1]सम्भव पीदुच्छिट्ठं एदं[2] जलरासिम्। *(किं वयस्य! श्लाघसे कुम्भसम्भवपीतोच्छिष्टमेतं जलराशिम्।[3])*

**प्रद्युम्नः** :- (विहस्य सविस्मयम्)

पद्यम् (६६) **जातोन्मेष वृषोग्ररोषचकितैस्सिंहार्तनागैरिव[4]**
**क्ष्माभृद्भिर्महितोऽपि चक्रमिथुनैरप्याश्रितः कर्कटैः।**
**उद्भावत्सेरिदा[5]ळिकाभिरतुलो यो जह्नुकन्यादिभिः**
**क्रुद्धो पान्मकरालयं घटभवोऽप्येनं यमीनः कथम्।। ९७।।**

**मायावती** :- (दूरतो विभाव्य) अय्यउत्त! किं इमानि मअरालयमज्झट्ठिदाइ[6] सेअलाइ वादवेएणं उड्डाविदाइ[7] गअणतलं उवलिंपंति।। *(आर्यपुत्र! किमिमानि मकरालयमध्यस्थितानि शैवलानि वातवेगोत्थापितानि गगनतल-मुपलिपन्ति।[8])*

**प्रद्युम्नः** :- (विहस्य) मुग्धे! नैतानि समुद्रियाणि शैवलानि। वलाहका एवैते पाथेयीकृत-पाथोधिपाथसः तारापथं प्रति प्रतिष्ठन्ते। यद्वा —

---

६६. जातोन्मेषेत्यादिषु प्रकृतार्थपरेषु पदेषु यथाकथञ्चिन्मेषादिद्वादशराशिनामसदृशवर्णामपूर्वीवर्तत इत्येव विशेषः। स तु तेषां पृथगर्थबोधकत्वम्। यमिनाम् इव स्वामी श्रेष्ठ इत्यर्थः।।

---

1. M. Gr.1 सिलाहसिकुंभ
2. M. Gr.1 एअं
3. M. Gr.1 इयं छाया नास्ति।
4. M. Gr.1 सिंहार्तन्नगैरिव
5. M. Gr.1 उद्धापसरिदा
6. M. Gr.1 अंअउंत किं इमाइ अमराळअ मंझंठिआइ, T. Gr.1 मअरालअमंझंठिदाइ
7. M. Gr.1 वादवेएण उंठाविआइ
8. M. Gr.1 इयं छाया नास्ति।

पद्यम् - **और्ववह्निपरितप्तमापिबन्त्यत्र वारिपृथुलं घनाघनाः।**
**हन्त! वातभरसन्निपाततो यान्ति कालपरिचोदिता दिवम्।। ९८।।**

**विदूषकः** :- वअंस! ण एदं एव्वं। किं दु[1]-

पद्यम्- **पिज्जन्ति पाहं सह साअरम्मि पोम्मट्ठिदाहिं महुमक्खिआहिं[2]।**
**घणाघणा तेण खणआदुतारगज्जं जलुग्गारमिमा कुणंदि[3]।। ९९।।**

*(वयस्य! नैतदेवं किन्तु —*

***पिबन्ति पाथस्सह सागरे पद्मस्थिताभिर्मधुमक्षिकाभिः।***
***घनाघनास्तेन क्षणात्तारगर्जं जलोद्गारममी कुर्वन्ति।। ९९।।[4])***

***।। सर्वे हसन्ति।।***

**प्रद्युम्नः** :- (पुरतो निर्वर्ण्य) अये! कोऽयमत्यर्थत्वरमस्मदभिमुखः परापतति।

**मातलिः** :- आयुष्मन्नेष खलु त्वदवलोकनविलम्बासहिष्णुना कृष्णेन भगवता प्रेषितः पुरुषस्स्यात्।।

***।। प्रविश्य पुरुषः।।***

**पुरुषः** :- अम्ह! हे कुमार![5] पज्जुम्म! णारअ-महेसि-णिवेइद-तावअउत्तंतो[6] महाराअ मुउंदो तुमं सवहूअं दंठुं अच्चत्थं उक्कण्ठिदो सिग्घं तुमं आआरेदि[7]।।

*(अहो! कुमार! प्रद्युम्न! नारदमहर्षिनिवेदिततावकवृत्तान्तो महाराज मुकुन्दस्त्वां सवधूकं द्रष्टुमत्यर्थमुत्कण्ठितश्शीघ्रं त्वामाकारयति।)*[8]

**मातलिः** :- क्व महाराजः ?

---

1. M. Gr.1 वअंस एदं ण एवं किं दु, My. Tel. Print. किन्तु
2. M. Gr.1 पेंमंठिआहिं महुमंछिआहिं।
3. M. Gr.1 कुणंति।
4. M. Gr.1 इयं छाया नास्ति।
5. M. Gr.1 हे कुमाळ
6. M. Gr.1 णिवेदिअ-तावअपुंतंतो, तावअपुंतंदो
7. M. Gr.1 सिबं तुमं आकरेइ।
8. M. Gr.1 इयं छाया नास्ति।

**पुरुषः** :- अंदउरप्पासाअमज्झम्मि रुप्पिणीए[1] देवीए समेदो समं एव्व णारअ-प्पमुहेहिं मुणिंदेहिं तुह जेत्ताअमणं पेच्छमाणो कणआसणे चिट्ठदि तुवरह तुम्हे।

अहं उण[2] पुरदो एव्व तुण्णं गदुअ संतोस-उत्तंतोवणि[3]वेअणेन पारितोसिअं पडिवज्जिस्सामि[4]।

*(अन्तःपुरप्रासादमध्ये रुक्मिण्या देव्या समेतस्सममेव नारदप्रमुखैर्मुनीन्द्रैस्तव जैत्रागमनं पश्यन् कनकासने तिष्ठति। त्वरध्वं यूयम्। अहं पुनः पुरत एव तूर्णं गत्वा सन्तोषवृत्तान्तोपनिवेदनेन पारितोषिकं प्रतिपत्स्ये।।[9])*

(इति सत्वरं निष्क्रान्तः।)

**इतरे तु** :- असाम्प्रतमत्र विलम्बं कर्तुमतित्वरया द्वारकापुरद्वारगामिनो भवाम।

***(।। इति नाट्येनावतीर्य निष्क्रान्तास्सर्वे।।)***

**।। इति श्रीवेङ्कटाचार्ययज्वना विरचिते**
**प्रद्युम्नानन्दनाम्नि नाटके**
**पञ्चमोऽङ्कः।।[5]**

1. M. Gr.1 अंतेउरंपासाद-मंझंमि रुंमिणीए, T. Gr.1 अंदे-उरं-पासाअमंझंमि रुंपिणीए
2. M. Gr.1 अहं पुण
3. M. Gr.1 पुंतंतोवणि
4. M. Gr.1 पडिपंजिंसामि।
5. M. Gr.1*। इति पञ्चमोऽङ्कः।। इति अस्ति।

# षष्ठोऽङ्कः

*।। ततः प्रविशति यथानिर्दिष्टः कृष्णो देवी रुक्मिणी यथोचितासनोपविष्टा नारदादयो मुनीन्द्राश्च।।*

**नारदः** :- (कृष्णमुद्दिश्य सविस्मयानन्दम्) वासुदेव! तवेयं भाग्यवत्ता वाङ्मनसयोर्वर्तनीमतिवर्तमाना नितरामस्मान् विस्मापयति। तथा हि-

पद्यम्- **अग्रे जाग्रत एव ते तनुभुवो यो जातमात्रो हृतो**
**मध्ये वार्धि निपातितः कबळितो मत्स्येन दुष्टात्मना।**
**सोऽयं सम्प्रति शम्बरं रणमुखे जित्वा सदारः**
**पुनःप्राप्तस्तावकमङ्कभागमिति नश्चित्तं मुहुर्नृत्यति।। १।।**

**कृष्णः** :- (सविनयम्) भगवन्! भवदीयचरणोदकपरिपालन[1]कृतार्थात्मनामस्मादृशानि खलु सुलभानि शुभानि।

**नारदः** :- (विहस्य) महात्मन्! कारणमानुषाकृते निखिलजगत्पते! मुधा नो मैवं[2] वोचथाः। अथवा निसर्ग एवायमुन्नतानाम्।

पद्यम्- **मन्दानप्याश्रितानुच्चैर्महान्तो बहुमन्वते।**
**शृङ्गिणस्तृणगुल्मादींश्शिरसा[3]नवहन्ति किम्।। २।।**

अपि च- सौलभ्यमीदृशं महत्तायाः खल्वतिशयाधायि। तथा हि-

पद्यम्- **पाण्डित्यं प्रथितान्ववायजनुषः प्रायः क्षमां योगिनो**
**दाक्षिण्यं धरणीपतेश्च नियतं दातुः प्रियं भाषणम्।**
**विद्यापारदृशो जनस्य विनयं वित्तोन्नतस्यामदं**
**सौलभ्यं महतश्च हेमसुमनस्सौरभ्यमाचक्षते।। ३।।**

1. M. Gr.1 परिपान 2. M. Gr.1 मुधा मैवं 3. M. Gr.1 गुल्मादीन् शिरसा

**कृष्णः** :- भगवन्! भावत्कपरिग्रहतदभावौ हि तन्त्रमुच्छ्रयतद्विपर्ययोः।

**नारदः** :- वासुदेवकं प्रत्येषा वञ्चना। वयमपि किञ्चिद्विद्म एव। परन्तु -

पद्यम्- **अग्रे कृत्स्नमजीजनो जगदिदं स्वामिन्नसच्छब्दितं**
**पश्चाद्व्याचकृषे प्रविश्य विशदं तन्नामरूपे अपि।**
**भूयस्त्राय स एव भेत्स्यसि पुनस्त्वामीदृशं नेशते**
**बोद्धुं नित्यमदोषमौपनिषदं ब्रह्मेति दुर्मेधसः।। ४।।**

किञ्च - **यद्गच्छति त्रियुग तिष्ठति वा यदन्यत्**
**तत्ते शरीरमिति नित्यवचोऽभिधत्ते।**
**तत्सम्भवास्त्वयि विभो! तदनु प्रविष्टेऽ-**
**प्यापस्सरोज इव न[1] प्रसजन्ति दोषाः।। ५।।**

अपि च - **निदिध्यासन्ति त्वां नियमितहृषीकाश्शमधना-**
**स्तरीतुं संसारं कतिचन तपस्साहससहाः।**
**निरस्तान्योपाया नियतमनुतिष्ठन्ति कतिचित्**
**प्रपत्तिं पञ्चाङ्गां प्रकृतिपुरुषेशस्थितिविदः।। ६।।**

किं बहुना - **यद्वातः परितो हरित्सु भगवन्नेकान्ततस्पन्दते**
**यच्चन्द्रावरुणौ भयात् समुदितौ भीतौ च चन्द्रारुणौ।[2]**
**यद्भावाषडपि प्रयान्ति विकृतीर्यच्च[3] प्रतीचां गण-**
**स्तत्तत्पिण्डसमन्वयं व्रजति तत्सर्वं तवैवेच्छया[4]।। ७।।**

ततश्च तत्तादृशनिरवधिकमहिमनीरनिधेरप्रतिहतसङ्कल्पस्य तवैव गर्भमप्युपाश्रितवति भगवति प्रद्युम्ने शिशावप्यसुरग्रहणपारावारपातनशफरनिगरणादयः किं कुर्युरापदः ? तेन नास्माकमिह विस्मयो युक्तः।।

---

1. M. Gr.1 इव नो
2. My. Tel. Print., T. Gr. 1 यच्चेन्द्रावरुणाशयोस्समुदितो वीतश्च चन्द्रारुणौ।
3. M. Gr.1 विकृतिर्यच्च
4. M. Gr.1 तवैवाज्ञया

पद्यम्- **महदाश्रयशालिनः प्रभो! न कदाऽप्यस्ति विपक्षतः क्षतिः।**
**सुमहत्तुहिनं हिनस्ति किं रविहस्तोज्ज्वलकेळिपङ्कजम्।। ८।।**

**रुक्मिणी :-** अज्जउत्त! अहिलं वि एअं अळिअ[1]-वअणं मह सुदविरहसोअ-दहणदड्ढाए[2] आसासणत्थंति भाइ। जं एत्ताहे वि पुत्तस्स मुहपुण्णअन्दो[3] ण मे लोअणं अलंकरेइ।

*(आर्यपुत्राखिलमप्येतदळीकवचनं मम सुतविरहशोकदहनदग्धया आश्वासनार्थमिति भाति। यदिदानीमपि पुत्रस्य मुखपूर्णचन्द्रः न मे लोचनमलङ्करोति।)*

**कृष्णः** :- नन्दन! वत्सले! "न मिथ्या ऋषिभाषितमि"ति न किं शृणोषि ? मानिनीमणि! निपुणमनालोच्य मास्म तावदेनं विदूदुषः।

***।। प्रविश्य हर्षसम्भ्रान्तः कञ्चुकी।।***

**कञ्चुकी** :- (साञ्जलिबन्धम्) देव! परिष्करोति तव द्वारदेशमेव सम्प्रति कुमारः प्रद्युम्नः।

**कृष्णः** :- सहर्षत्वरं परिष्करोतु लोचनदेशमेव झडिति[4] प्रवेश्यताम्।। २।।

**कञ्चुकी** :- यदाज्ञापयति देवः (इति निष्क्रान्तः)।

***।। ततः प्रविशति सपरिजनस्सह देव्या हर्षोत्फुल्ललोचनः प्रद्युम्नः।।***

**प्रद्युम्नः** :- (सानन्दम्)

पद्यम्- **पुण्यानि सम्प्रति फलन्ति पुराकृतानि**
**मन्ये ग्रहा युगपदेव मयि प्रसन्नाः।**
**लुब्धश्चिरादिह हतो मम लोचनाळी-**
**र्मोदेन विन्दति मुकुन्दपदारविन्दम्।। ९।।**

**मायावती** :- (अपवार्य) अय्यउत्त![5] को एद्ध अय्यो[6] ? *(आर्यपुत्र! कोऽत्रार्यः ?)*

**प्रद्युम्नः** :- (जनान्तिकम्) मुग्धे![7] किं न तर्कयसि प्रसिद्धैश्चिह्नैः। अथवा अनुमतिसिद्धेष्व-प्याप्तोपदेशमेव प्रमाणयन्त्यागमरसिकाः। शृणु सुश्रोणि! -

---

1. M. Gr.1 एदं अळीअ
2. M. Gr.1 दहणदंथाए
3. M. Gr.1 समुह पुण्णछंदो
4. M. Gr.1, T. Gr. 1 झटिति
5. M. Gr.1 अंअउंत
6. M. Gr.1 अंओ
7. M. Gr.1 प्रमुग्धे

पद्यम् - **शुभश्रीवत्साङ्कं शुचिरुचिरमुक्तामणिसरं**
**स्फुरद्बिभ्रद्वक्षस्तरळवनमालासुरभिळम्।**
**वधूजुष्टं पार्श्वे वलभिदुपलश्यामलमहो!**
**तदेवेदं तत्त्वं श्रुतिरपि यदुच्चैर्मृगयते।। १०।।**

अपि च- **आकीटादाचवाचः कमितुरनुपधिर्यः प्रतीचान्नियन्ता**
**धर्माद्युल्लेखि निर्यस्फुटमखिलधियश्चोदयत्यन्वहं नः।**
**आनन्दात्मानमन्तर्दहरमहरहर्यं विचिन्वन्ति युक्ता**
**भाग्याद्भूमानमेनं श्रुतिभिरभिहितं चक्षुषा लक्षयामः।। ११।।**

(इति सहर्षत्वरमुपसृत्य पितुश्चरणावुपसंजिघृक्षति।)

**कृष्णः** :- (प्रतिषिध्य) वत्स! वन्दस्व जगद्गुरुं नारदं भगवन्तमितरांश्च[1] महानुभावान् मुनीन्द्रान्।

**प्रद्युम्नः** :- यदाज्ञापयति तत्र भवांस्तातचरण! (इति सप्रश्रयं परिक्रम्य)

पद्यम्- **भगवन्नारदमुने! प्राचार्यं पाद्मसम्भविम्।**
**कार्ष्णिः प्रद्युम्नवर्माहं[2] भवन्तमभिवादये।। १२।।**

(इति नारदस्य चरणावुपसंगृह्णाति।)

**नारदः** :- (सादरं परिरभ्य) वत्स! प्रद्युम्न!

पद्यम्- (१) **प्रकाशयंत्सतां[3] मार्गं पुष्णन् कुवलयश्रियम्।**
**भूयसीश्शरदो भूयाः पूर्वपक्षहिमांशुवत्।। १३।।**

**प्रद्युम्नः** :- (भक्तिनम्रमूर्तिरितरानपि मुनीन्द्रान् वन्दते।)

**मुनयः[4]** :- भवत्ववितथमेव भाषितं भगवतो नारदस्य।।

**नारदः** :- वत्स! वन्दस्व पितुःपादारविन्दम्।

---

१. सतां = नक्षत्राणां साधूनां च। कुवलयानां = नीलोत्पलानां भूमण्डलस्य च।

---

1. M. Gr.1 मितरान् श्च
2. T. Gr.1 प्रद्युम्नशर्माऽहं
3. M. Gr.1 प्रकाशयन् सतां
4. M. Gr.1 मुनीन्द्राः

**प्रद्युम्नः** :- (सप्रश्रयानन्दम्)

पद्यम्- **(२) चिरविरहदुर्दिनार्तस्सरसिजसुहृदाकरेण चक्रभृतः।**
**सवितुः पादग्रहणाद्विन्देमन्देतरानन्दम्।।१४।।**

**मायावती** :- (अनुवन्दते।)

**रुक्मिणी** :- (वात्सल्यानन्दसान्द्राभ्यां नयनाभ्यां तनयं निर्वर्ण्य, स्वगतम्)

अम्हो! अच्छत्थ-सारिच्छंए एसं[1] पिआपुत्ताणम्। तह हि[2] - सुच्छाअ-तामरसगुच्छाण-हच्छइसरिच्छा खु तेव्व[3] णअणा वड्ढन्त कन्तिमणचन्दाकइ-व्वसण-सन्दाइतच्चिअ मुहं। कालुम्मि[4] सन्तणवणीळु प्पलाळिजअसीलुज्झलाणइ तणू एआ मुउंदस सहाआ[5]-सुअस्स मह वाआवि ताचिअ[6] वणे।।

*(अहो! अत्यर्थसादृश्यमेतयोः पितृपुत्रयोः। तथा हि - सुच्छायतामरसगुच्छानघच्छविसदृक्षे खलु ते एव नयने वर्धमानकान्तिमच्छं द्राकृतिव्यसनसन्दायि तदेव मुखम्। कालोन्मिषन्नव-नीलोत्पलाळि-जयशीलोज्ज्वलैव तनुः एता मुकुन्दससहायास्सुतस्य मम वाचोऽपि ता एव वणे**(३)**।)*

**कृष्णः** :- पूर्णमनोरथौ भूयास्तामिति प्रणमन्तं पुत्रमुत्थाप्य गाढं परिष्वजमानो मूर्धन्युपजिघ्रन्नङ्कमारोप्य[7] सानन्दम्।

२. सरसिजानां = कमलानां, सुहृदा सदृशेन, करेण = हस्तेन। सुहृदा = समुल्लासकेण, करेण = किरणेन, चक्रभृतः = सुदर्शनधारिणः, चक्रवाकपोषकस्य। सवितुः = जनयितुः कृष्णस्य सूर्यस्य च पादश्चरणः। किरणश्च।

३. वणे निश्चय इत्यर्थः।

1. M. Gr.1 सारिसंएसिं, T. Gr.1 अम्हे! अंछंथ-सारिंसए एसं
2. M. Gr.1 तथा हि
3. M. Gr.1 तें च
4. M. Gr.1 -ह-दंतमणचंदकजंव सणसं दाइतं चिअहं कालंमि
5. M. Gr.1 तणा णेआ मुहुंदवसहाआ
6. M. Gr.1 तांचिअ
7. M. Gr.1 मूर्धन्यवजिघ्रन् अङ्कमारोप्य

पद्यम्- **न सुखयति शरीरं सान्द्रचन्द्रातपो मे**
**न खलु भवति चित्तानन्दनं चन्दनं च।**
**अविरळमिह सूनोरङ्गसंश्लेष एष**
**प्रशमयति हि तापं बाह्यमाभ्यन्तरञ्च।। १५।।**

**मुनयः** :- नयनानन्द-नन्द-नन्दन!

पद्यम्- **इन्दीवरप्रणयिकान्तिमिमं कुमार-**
**मङ्कस्थितं तव सुधाकिरणाङ्कभासः।**
**चक्षुष्यशातमखनीलसुधामयाद्रे[8]-**
**रुत्सङ्गसङ्गजुषमम्बुदमुल्लिखामः।। १६।।**

**कृष्णः** :- वत्स! चिरविरहशोकपावकक्लान्तायाः प्रणिपत मातुश्चरणयोः।

**प्रद्युम्नः** :- यदाज्ञापयति तात! (इति सादरमुत्थाय[9] तथा करोति।)

**रुक्मिणी :-** (सवात्सल्यम्।) वच्छ! आऊणं संपआणं वि अइसएण ताअचलणं ताव[1] अणुकरेहि। *(वत्सायुषां सम्पदामप्यतिशयेन तातचरणं तावदनुकुरु।)*

(इति मूर्धन्युपाघ्राय[2], मुहूर्तमितिकर्तव्यता मुग्धचित्ता तिष्ठति।)

**नारदः** :- (पर्वतं प्रति जनान्तिकम्।) सखे! शतगुणमुत्कृष्यते जनकादपि जनन्याः पुत्रवात्सल्यम्। किञ्च मातुरतिशये निरूप्यमाणे कियान्नाम पुत्रस्य पिता स्यात्। तथा हि-

पद्यम्- **घनाया सा मासान् दश वहति गर्भं पुनरसा-**
**वहो सूतौ दुःखान्यनितरविषह्याणि सहते।**
**विधत्ते शिश्वर्थे विविधमयकर्मव्यसनिनी**
**निवर्तन्ते वाचस्स्वयमतिशयान्मातुरतुलात्।। १७।।**

1. M. Gr.1 नीलशिलामयाद्रे    2. M. Gr.1 सादरत्वरमुत्थाय

3. M. Gr.1 वंछ आयूणं संपदाणं विअदिसएण तादचलणं दाव

4. M. Gr.1 मूर्धन्यवघ्राय

**रुक्मिणी** :- (साशङ्कम्) अज्जउत्त[1] ! एदं किंति ण जाणामि।

पद्यम्- **किमेषा संविअ[2] किं वा सिविणो अं भमो वणे (४)।**
**णाणेहिं तो विते हिंतो अण्णं विण्णाणमेव्व किं।। १८।।**

*(आर्यपुत्रैतत् किमिति न जानामि।*
***किमेषा संवित् किं वा स्वप्नोऽयं भ्रमो वा वणे।***
***ज्ञानेभ्योऽपि तेभ्यः अन्यद्विज्ञानमेव किम्।। १८।।)***

**कृष्णः** :- (विहस्य) उद्वेलमात्मजवात्सल्यमेव केवलमेवं भवतीमान्दोळयति। अत्र पुनरर्थक्रियैव देवि! तव विचिकित्सामुत्सारयिष्यति। अथवा युक्ता एव तवैते विकल्पाः।

पद्यम्- **षष्ठे दिने[3] बत हतोऽपि सुरद्विषाऽ-**
**सौ जित्वा तमेव जितशत्रुरुदूढजानिः।**
**सूनुर्विभाति पुनरङ्कगतस्तवेति**
**सम्भावनामपि किमर्हति सोऽयमर्थः।। १९।।**

**रुक्मिणी :-** अय्यउत्त[4] ! **उदूढजानि**रिति तुह वअणेन जिण्णासंदावणी अम्मि[5]। किं वच्छस्स दुइओविआं समोसंपुत्तो। *(आर्यपुत्र! उदूढजानिरिति तव वचनेन जिज्ञासां तावन्नीताऽस्मि। किं वत्सस्य द्वितीयोऽप्याश्रमस्संवृत्तः ?)*

**कृष्णः** :- (साङ्गुलिनिर्देशम्) इतः पश्य पार्श्वतः प्रणमन्तीम् इमां[6] भवत्यास्स्नुषाम्।

**रुक्मिणी** :- (सस्नेहं निर्वर्ण्य) वच्छे! भद्दं होउ[7] दे सवल्लहाए। *(वत्से! भद्रं भवतु ते सवल्लभायाः।)* (पुनस्सजिज्ञासं परिवृत्यावलोक्य) अज्जउत्त! जुत्तं एव्व एएसिं रमणिज्जं[8] दंपइत्तणं। किंदु[9] कुदोए अं समागअंति[10] पुच्छामि। *(आर्यपुत्र! युक्तमेवैतयो रमणीयं दम्पतित्वम्। किन्तु कुत एतत् समागतमिति पृच्छामि।)*

---

४. वणे इति विकल्पे।

---

1. M. Gr.1 अंअउंत!
2. M. Gr.1 किमेसा संविआ
3. M. Gr.1 षष्ठे शिशुः
4. M. Gr.1 अंअउंत!
5. M. Gr.1 दम्ही
6. M. Gr.1 होदु
7. T. Gr.1 इमाम् इति नास्ति।
8. M. Gr.1 जंमणिजं च
9. M. Gr.1 किं तु
10. M. Gr.1 दं समागदंति

**मायावती** :- (आत्मगतम्) अम्हो ! अज्जूए वि कहं एव्वं मइसं[1] कासं जादा। अहवअज्जएव्व सअळगुरुअणसमक्खंदं पदित्तणं[2]अम्हाणं ठिरं होज्झा संकासमाहाणेहिं।

*(अहो ! आर्याया अपि कथमेवं मयि शङ्का सञ्जाता। अथवाऽद्यैव सकलगुरुजनसमक्षं दम्पतित्वमावयो स्थिरं भविष्यति शङ्का समाधानाभ्याम्।)*

**कृष्णः** :- (सस्मितम्) प्रियतमे ! पृच्छ भगवन्तं सकलजगदुदन्तसाक्षिणं वैणिकमुनिम्।

**सभ्याः** :- अवदध्महे।

**नारदः** :- एष किल ! वासुदेववल्लभाया गर्भादुद्भूतमात्रस्सद्य एव प्रावृडम्बुद इव (५) शम्बरग्रहणपर्याकुलितः सत्कविरिव (६) सारस्वतहृदयावगाही (७) चञ्चरीक इव जलजन्तूपगतः (८) तदनु रसिकजनस्येव सुधीवरजालाकृष्टस्य तं प्रत्येवोपायिनीकृतस्य मायावतीमभितो नीतस्य कस्यापि पाठीनस्य जठराददद्भुतमुद्भूतः समभ्युपगतमदीयहितोपदेशया तया कथमपि संरक्षितः (९) सुधाकर इव सूर्याकलन[3]लब्धकलाभ्युदयः (१०) सरस्वतीप्रवाह इव पीततीर्थविशेषः कमलाकमन इव (११) समुपजातहृदयाह्लादकरमारतानुसन्धानः[4] वियोगोपनतपरिभ्रमणश्च पश्चादभिनव तुहिनवत् (१२) अपहृतमहाशाम्बरप्रकाशः। सौमित्रिरिव (१३) प्रसन्नरामाकलनलब्ध-

५. शम्बरस्य = जलस्य ग्रहणं कर्मणि षष्ठी। शम्बरासुरस्य ग्रहणमिति कर्तरि षष्ठी च।।

६. सरस्वतस्समुद्रस्येदं सरस्वत्या = वाण्या इदमिति चार्थः।

७. जलजन्तुं = मीनमुपगतः। जलजं = कमलं तु प्राप्त इति चार्थः।।

८. सुधीवराणां = विद्वच्छ्रेष्ठानां, जालेन = समूहेन। सुष्ठु धीवरस्य = कैवर्तस्य जालेन आनायेनेति चार्थः।

९. सूर्यसम्बन्धप्राप्तकलावृद्धिश्चन्द्रः। सूरीणां = विदुषाम्, आकलनेन सान्निध्यादिना प्राप्तचतुष्षष्टिकलावृद्धिरिति चार्थः।

१०. सरस्वती नदी प्रवाहस्य गुप्तगामित्वात् पीततीर्थविशेषत्वम्। जन्मान्तरसंस्कारोद्बोधकं मज्जदुज्जीवनाभिधानसरस्तीर्थमनेन पीतमिति चार्थः।

११. हृदयाह्लादकं रमायाः रतस्य = क्रीडाया अनुसन्धानम्। हृदयाह्लादकरं मा रतायाः मन्मथस्यानुसन्धानं स्मरणमिति चार्थः। पक्षारोहणप्राप्तसञ्चारः। विरहप्राप्तमोह इति चार्थः।

१२. अपहृतः महान् आशानां दिशामम्बरस्याकाशस्य च प्रकाशः। महान् शम्बरसम्बन्धी प्रकाशश्चेत्यर्थः।

१३. प्रसन्नो रामो दाशरथिः प्रसन्ना रामा मायावतीति चार्थः।

1. M. Gr.1 मइआसं    2. M. Gr.1 पइंतणं

3. M. Gr.1 सूर्यालोकन    4. M. Gr.1 सन्धानो

हर्षसमृद्धिः तपोधन इव (१४) प्रसन्नेन हरिणा प्रापितसुमनोरथः[1] (१५) धनायाकुलित इव बहुप्रदेशदर्शनमेदुरामोदः[2] विटजन इव (१६) श्रीमद्द्वारकान्ताकलनपरिपूर्णानन्दः **प्रद्युम्ननामा** भगवतः पीताम्बरस्य जीवातुर्मातुरुत्सङ्गं सम्प्रति पुनरलङ्करोति।

**सभ्याः** :- (सशिरःकम्पम्। देवीमुद्दिश्य।)

पद्यम्- **शृङ्गारसौरभवदुल्बणवीरगर्भ-**
**सन्दर्भमद्भुतसमुद्भवमुद्धरं च।**
**चारित्रमत्र तव देवि! शिशोर्विशोध्य**
**विस्मेरमुल्लसति मानसमस्मदीयम्।। २०।।**

**रुक्मिणी** :- (नारदं प्रति) भगवं[3] मइ ण तुज्झ दआ। जं एव्वं सअलं वि वच्छवुत्तंत[4]ञ्जाणंतेणं एव्व तुए सुदविरह-सोअ-दड्ढाए[5] मज्झ ण किं विभणिदम्।

*(भगवन्! मयि न तव दया। यदेवं सकलमपि वत्सवृत्तान्तं जानतैव त्वया सुतविरहशोकदग्धायै मह्यं न किमपि भणितम्।)*

**नारदः** :- (विहस्य) सत्यमित्थं देवि! शङ्कनीयैव[6] मयि तावदागस्विता। तथापि खलु-

पद्यम्- **यदि परमभणिष्यं यादवेन्द्रस्तदानीं**
**सपदि समहरिष्यच्छम्बरं स्वात्मजारिम्।**
**(१७) हरिहरिदिभयं तीमन्यदाशाः करीन्द्रा-**
**नधिमहिनसमज्ञामात्मजस्ते गमिष्यत्।। २१।।**

१४. विष्णुप्रापितसमीचीनेष्टार्थः इन्द्रप्रापितदेवयान इत्यर्थः।

१५. धनाया धनतृष्णा धनगर्ध इति यावत्। अशनायोदन्यधनाया बुभुक्षा-पिपासा-गर्धेष्विति निपातनात् साधुः। बहुप्रदो = वदान्यः, ईशः = प्रभुः, बहवः प्रदेशाः स्थलविशेषाश्च।

१६. श्रीमती सौन्दर्यवती वारकान्ता वेश्या। श्रीमत्याः द्वारकाया अन्तस्समीप इति चार्थः।

१७. हरेरिन्द्रिस्य हरितिदिशि। इभ = ऐरावतः तमिव कुर्वतीमित्यर्थः। तत्करोतीति ण्यन्ताच्छतरि ङीप्। अन्याश्च ता आशाश्चेति विग्रहे अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशेत्यादि सूत्रेण दुगागमः। अधि महि मह्यम्। विभक्त्यर्थेऽव्ययीभावः। अभणिष्यमित्यादिषु लिङ्निमित्ते लृङित्यादिना हेतुहेतुमद्भावे लृङ्।

1. M. Gr.1 मनोरथो 2. M. Gr.1 रावमोदो 3. M. Gr.1 भअवं
4. M. Gr.1 वंछपुंतंत 5. M. Gr.1 अदथाए 6. M. Gr.1 शङ्कनीयैव देवि!

**सभ्याः** :- यदुपतिसुदतिसूनृतमेव प्रणिगदति वैणिकमुनिः। पश्य ताव(१८)द्भवदर्भकस्य प्रतिपक्षप्रतिक्षेपसन्धुक्षितमप्रतिहतसंसर्पणपरिशोधिता शाकाशान्तरं कमपि यशः प्रकाशम्।

तथा हि - **गीर्वाणस्त्रैणपीनस्तनकनकघटानल्पकर्पूरपूराः[1]**
**श्रीमद्वैधात्रसौधाङ्कणतुहिननगोत्सङ्गगङ्गातरङ्गाः।**
**भारश्रान्ता हि भूभृद्वदनदशशतीपारणक्षीरधारा**
**जाग्रत्यस्योग्रतेजः किसलयसुमनस्फूर्तयः कीर्तयस्ताः।। २२।।**

किञ्च- **अखिलमनपचेयः[2] कीर्तिभूमादसीयः**
**क्षिपति मलिनिमानं चान्द्रमङ्कं[3] विहाय।**
**अपि कबळितविश्वामृद्धिमभ्यद्रुवानो**
**न खलु जगति भूष्णुर्निह्नुते राजचिह्नम्।। २३।।**

अपि च- **पदं हि विष्णोश्शुचिभावयोगात्**
**प्रपद्य मुक्ताकृतिमाददाने।**
**युक्तो विदोषेऽस्य यशश्शशाङ्के**
**सर्वेषु लोकेषु च कामचारः।। २४।।**

**रुक्मिणी** :- सव्वं वि सुहं एअं[4] खु तुम्हाणं अणुग्गहाओ[5] एव्व।

*(सर्वमपि सुखमेतत् खलु युष्माकमनुग्रहात्[6]।*

**नारदः** :- कृतं वत्से![7] विलम्बेन। जागर्तु भवती समनन्तरकरणीये।।

***।। नेपथ्ये दुन्दुभिध्वनिः।।***

**रुक्मिणी** :- जं आणवेइ भअवंतो।[8] *(यदाज्ञापयति भगवान्।)*

(इति सहर्षत्वरमुत्थाय वधूवरौ संयोज्यकनकासने निवेशयति।)

---

१८. भवत्या अर्भक इति विग्रहे सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः।।

---

1. M. Gr.1 कल्पूरपूराः 2. M. Gr.1 किमखिलनपचायः 3. M. Gr.1 चान्द्रमेकं
4. M. Gr.1 एदं 5. M. Gr.1 अणुंगहादो 6. T. Gr.1 मनुग्रहादेव।
7. M. Gr.1 वत्से! कृतं 8. M. Gr.1 जं आणवेदि भअवं

**मायावती** :- (व्रीळया चरण[1]नखदत्तनयना निश्चलमास्ते।)

**प्रद्युम्नः** :- (सानुरागमात्मगतम्)

पद्यम्- **व्रीडाभीतिव्यतिकरविनम्रवदना विलासिनी सेयम्।**
**कामकरकर्षणनता कार्मुकवल्लीव कबलयति चेतः।। २५।।**

(किं चेयमिदानीम्।)

**स्पृशन्ती मां स्विन्नैः पुळकिभिरकम्पैरवयवै-**
**र्मुखं व्रीडानम्रं दरहसितमुग्धं च दधती।**
**निवाते निष्कम्पानिबिडसुमनोभारविनता**
**मधुस्निग्धामोदं मदन-वनवल्लीव तनुते।। २६।।**

(पुनस्सलज्जं पुलकोच्छेदं[2] विभाव्य)

**प्रथमानमपि प्रियानुरागं**
**गुरुभीत्या हृदि गोपितं प्रयत्नात्।**
**विशदं पुलका विवृण्वतेऽमी (१९)**
**पिशुनत्वं सहजं हि कण्टकानाम्।। २७।।**

**कृष्णः** :- (सादरं निर्वर्ण्य रुक्मिणीं प्रति)

**इतरेतरस्य नितरामनुरूपं**
**मिथुनं तदेतदभिनन्दति चेतः।**
**श्रुतिजाड्यवाच्यमपमार्ष्टि मनोज्ञा**
**चतुराननस्य चतुराकृतिरेषा।। २८।।**

---

१९. कण्टकानां = परोपद्रवकारिणां, पिशुनत्वं = परदोषाविष्करणं, सहजं = स्वभावसिद्धम्। रोमहर्षे च कण्टक इत्यमरोक्त्या कण्टकानां = पुलकानामिति प्रकृतार्थः।

---

1. M. Gr.1 व्रीडया चरणचरण     2. M. Gr.1 पुलकोद्भेदं

**रुक्मिणी** :- अज्जउत्त![1] एव्वं एव्व एअं[2]। *(आर्यपुत्र एवमेवैतत्।)*

**कृष्णः** :- (प्राञ्जलिस्सभ्यान् प्रति) अस्य वत्सस्य तावदाशिषमारचयन्त्वादरादत्र भवन्तः।

**सभ्याः** :- (विहस्य) देव! किमेवमुच्यते।

**त्राताऽनेन त्रिलोकी त्रिदशरिपुकुलोत्तंसकध्वंसनेन**
(२०) **श्लोकः पुण्यश्च लब्धः परिहसितपयस्सिन्धुडिण्डीरखण्डः।**
**प्राप्ता त्वद्[3]बाहुगुप्ता त्रिदिवविजयिनी-द्वारकाऽप्यूर्जितश्री-**
**रस्माभिस्तादृशेऽस्मिंस्तव तनुभुवि कातन्यता (२१) मन्यदाशीः।।२९।।**

तथाऽपि **सुधर्माभिरतावेतौ सुरसेन[4]कृतादरौ।**
(२२) **भूयास्तां प्राप्तसन्तानौ शचीशतमखाविव।। ३०।।**

इत्यक्षतान् समर्पयन्ति[5]। दम्पती प्रणिपत्य शिरसा धारयतः। आकाशे दिव्यदुन्दुभिनिर्घोषः[6]। (२३) पुष्पवर्षश्च।

**कृष्णः** :- (सानन्दम् सभ्यान् प्रति) किं वो भूयः प्रियमुपहरामि।

---

२०. **श्लोकः।।** यशः। पद्ये यशसि च श्लोक इत्यमरः।

२१. अन्या च सा आशीश्चेति विग्रहः। अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीरित्यादिना अन्यशब्दस्य दुगागमः।

२२. सुधर्मायां = देवसभायां सुष्ठु धर्मे चाभिरतौ। सुराणां सेना सुरसेनम्। विभाषा सेना सुरेत्यादिना वैकल्पिकनपुंसकत्वम् तस्मिन् कृतादरौ। सुष्ठु रसेनानुरागेण परस्परविश्वासादरशालिनौ च। सन्तानः कल्पवृक्षविशेषः वंशश्च।

२३. पुष्पाणां वर्षो = वृष्टिः। वर्षं क्लीबे पुमान् मेघे इत्यमरशेषोक्तेः। पुन्नपुंसकयोर्वर्षं जम्बूद्वीपाब्धिवृष्टिष्विति रुद्रोक्तेश्च वर्षशब्दस्य पुल्लिङ्गत्वमप्यस्ति।

---

1. M. Gr.1 अंअउंत 2. M. Gr.1 एदं 3. M. Gr.1 तद्
4. M. Gr.1 सीरसेन 5. M. Gr.1 समर्पन्ति। 6. M. Gr.1 दुन्दुभिघोषः

**सभ्याः** **:-** देवकीनन्दन! न ह्यतःपरं नः प्रियमस्ति।

पद्यम् (२४) **सतो भृशमतोषयस्समुदमीमिषस्त्वं**
**वृषं परं वसुमतीभरं घनकृपाकरोपाकरोः।**
**अकण्टकमचीकरः करुणया महीमण्डलं**
**प्रचण्डनिजतेजसाऽतुलितभानुना सूनुना।। ३१।।**

**तथापीदमस्तु भरतवाक्यम् :-**

**काले शैलेन्द्रकन्याकमनगळरुचिः (२५) काळिकाऽसौ तु**
**वृष्टिं भूयादायातु भूभृन्नगरहिमनगं भूरियं भूरि सस्या।**
**नित्यं नीत्या धरित्रीमवतु नरपतिर्निर्मिमाणस्स्वधर्मान्**
**स्वाहाकाराः प्रथन्तामनुपरममिह स्वस्ति गोब्राह्मणेभ्यः।। ३२।।**

किञ्च- **धन्या मान्यगुणा वदान्यमणयो दीर्घायुषो जाग्रतु**
**स्थैर्यं विन्दतु मन्दिरेषु विदुषां विष्णूरसीवेन्दिरा।**
**एतन्नाटककर्तृसन्ततिगुरोरत्रेरिव (२६) प्रेयसी भूयात्**
**पण्डितमण्डलीकविवचोगुम्भेऽनसूया[1] सदा।। ३३।।**

---

२४. सूनुना = प्रयोज्यकर्त्रा प्रयोजककर्तात्वं साधून् सन्तोषितवान्। वृषं = श्रेयः, समुदमीमिषः = उन्मेषवन्तमकारयः। वसुमतीभरं = भूभारम्, अपाकरोः = पर्यहार्षीः।।

२५. मेघजाले च काळिकेत्यमरः। सौतु = प्रसूताम्। षु-प्रसवैश्वर्ययोरिति धातोर्लोट्।

२६. अत्रेः प्रेयसी अनसूया तन्नाम्नी। पण्डितमण्डली चासूयाभाववतीत्यर्थः।

---

1. M. Gr.1 गुम्भेनुसूया

अपि च - **तुण्डीरादिषु मण्डलेषु किल माभूदेव भूदेवता**
**द्रोहिभ्यः (२७) कलिकृत्तुरुष्कयवनादिभ्यो रिपुभ्यो भयम्।**
**विज्ञानं निगमान्तजन्यमिह मा विप्लावि[1] चाल्पश्रुतैः**
**शेषाद्रेश्शिखरे चिरेण रमया चक्री स च क्रीडतु।। ३४।।**

*।। निष्क्रान्तास्सर्वे।।*

*।। इति श्रीवाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवदप्पयाचार्यतनूभवस्य*
*श्लेषयमकचक्रवर्तिनो रघुनाथाचार्ययज्वनस्तनयेन*
*श्रीनिवासकृपातिशयसुविदितनयेन*
*काञ्चीनगरवास्तव्येन सीताम्बागर्भसम्भवेन वेङ्कटाचार्ययज्वना*
*विरचिते प्रद्युम्नानन्दनाम्नि नाटके*
*षष्ठोऽङ्कः।।*

**नवसन्दर्भ(२८)मात्रेयो नाटकं *वेङ्कटाध्वरी*।**
**प्रजोत्पत्तौ प्रौष्ठपद्यां[2] पूर्णिमायामपूरयत्[3]।। ३५।।**

।। श्रीकृष्णपरमात्मने नमः।।

।। श्रियै नमः।।[4]

२७. कलिः कलहः पापं च। २८. अत्रेर्गोत्रापत्यं पुमानात्रेयः।।

1. M. Gr.1 विप्लाव
2. M. Gr.1 पोष्ठपद्यां
3. M. Gr.1 पौर्णिमायामपूरयत्।।
4. M. Gr.1* **। हरिः ओम्।।,।। शुभमस्तु।।,।। श्रीमते हयग्रीवाय नमः।।**

**एकेन लेखकेन योजितः ग्रन्थः** (तिरुपतिमातृका (ORI) T. G.1)

।। हरिः ओम्।।

।। श्रीमदस्मद्विद्यागुरुभ्यो नमः।।

**मुनिनिधिविध्यब्धिमिते मन्मथवर्षे कुलीरगे भानौ।**
**अलिखद्यज्ञवराहो नाटकमेतद्धि कृष्णसप्तम्याम्।।**

**।। ओम्।।**

**अपरेण लेखकेन योजितः ग्रन्थः** (माद्रस्मातृका (GOML) M. G.1)

**श्रीमल्लक्ष्मणयोगिपुंगवमताकूपारराकाविधो-**
**रुर्वीमण्डलमण्डनस्य करुणाम्भोधेः पदाम्भोरुहम्।**
**ध्यात्वा योऽण्णयदेशिकस्य सततं हर्षाम्बुधौ मज्जनं**
**कुर्वन् तिष्ठति राघवेण लिखितं तेन प्रियं नाटकम्।।**

**श्रीमदण्णयसूरीन्द्रं श्रितवात्सल्यभूषितम्।**
**कलये मम सर्वस्वं करुणावरुणालयम्।।**

**पराभवसंवत्सरम् आपुणिमासं २२० उउंते दिशति।**
**ककश्चिमै पौर्णमि यिन्द दिनत्तिर्व प्रद्युम्नानन्दीयं मुहिजुदु।**

**श्रीमदण्णयसूरीन्द्रपदपङ्कजतल्लजौ।**
**भक्तसंसारदावाग्निवारिदौ शरणं भजे।।**

।। श्रीमते श्रीनिवासराघवार्यमहागुरवे नमः।।

।। हरिः ओम्।।

।। शुभमस्तु।।

**वत्सकुलाम्बुधिपूर्णसुधांसुः श्रीपतिराघवदेशिकपुत्रः।**
**राघव एष इहाण्णयसूरेर्दास इमं व्यलिखत् स्वयमेव।।**

।। श्रीमदन्नयार्यमहादेशिकाय नमः।।

**प्रद्युम्नानन्दीयम्**

**।। श्रीमद्श्रीनिवासाय महागुरवे नमः।।**

## अनुबन्धः - १

# नाटकमूलकथा

## श्रीमद्भागवतदशमस्कन्धः - उत्तरार्धः

अथ पञ्चपञ्चाशोऽध्यायः

### प्रद्युम्नजनन-शम्बरवधादिवृत्तान्तः

श्रीशुक उवाच :-

**कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना ।**
**देहोपपत्तये भूयस्तमेव प्रत्यपद्यत।। १ ।।**

**स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ।**
**प्रद्युम्न इति विख्यातस्सर्वतोऽनवमः पितुः।।२ ।।**

**तं शम्बरः कामरूपी हत्वा तोकमनिर्दशम् ।**
**स विदित्वाऽऽत्मनश्शत्रुं प्रास्योदन्वत्यगाद्गृहम्।। ३ ।।**

**तं निर्जगार बलवान् मीनस्सोऽप्यपरैस्सह ।**
**वृतो जालेन महता गृहीतो मत्स्यजीविभिः ।। ४ ।।**

**तं शम्बराय कैवर्ता उपाजहुरुपायनम् ।**
**सूदा महानसं नीत्वाऽवध्यन् स्वधितिनाऽद्भुतम्।।५।।**

**दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् ।**
**नारदोऽकथयत् सर्वं तस्याश्शङ्कितचेतसः ।।**
**बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनम् ।। ६ ।।**

**सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ।**
**पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ।। ७ ।।**

**निरूपिता शम्बरेण सा सूदौदनसाधने ।**
**कामदेवं शिशुं मत्वा चक्रे स्नेहं तदाऽर्भके ।। ८ ।।**

**नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः ।**
**जनयामास नारीणां वीक्षन्तीनां च विभ्रमम् ।। ९ ।।**

**सा तं पतिं पद्मदळायतेक्षणं**
**प्रलम्बबाहुं नरलोकसुन्दरम् ।**
**सव्रीळहासोत्तभितभ्रुवेक्षती**
**प्रीत्योपतस्थे रतिरङ्गसौरतैः ।। १० ।।**

**तामह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा ।**
**मातृभावमतिक्रम्य वर्तसे कामिनी यथा ।। ११ ।।**

रतिरुवाच -

**भवान्नारायणसुतश्शम्बरेणाहृतो गृहात् ।**
**अहं ते दयिता पत्नी रतिः कामो भवान् प्रभो!।।१२।।**

**एष त्वाऽनिर्दशं सिन्धौ प्राक्षिपच्छम्बरोऽसुरः ।**
**मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान् प्रभो ।। १३ ।।**

**तमिमं जहि दुर्धर्षं दुर्जयं शत्रुमात्मनः ।**
**मायाशतविदं त्वं च मायाभिर्मोहनादिभिः ।। १४ ।।**

**परिशोचति ते माता कुरङ्गीव हतप्रजा ।**
**पुत्रस्नेहाकुला दीना विवत्सा गौर्यथाऽऽतुरा ।। १५ ।।**

**प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने ।**
**मायावती महामायां सर्वमायाविनाशनीम् ।। १६ ।।**

**स च शम्बरमभ्येत्य संयुगाय समाह्वयत् ।**
**अविषह्यैस्तमाक्षेपैः क्षिपन् सञ्जनयन् कलिम्।। १७ ।।**

**सोऽधीक्षिप्तो दुर्वचोभिः पादाहत इवोरगः ।**
**निष्टाक्राम गदापाणिरमर्षात्ताम्रलोचनः ।। १८ ।।**

**गदामाविध्य तरसा प्रद्युम्नाय महात्मने ।**
**प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरम् ।। १९ ।।**

**तामापतन्तीं गदया प्रद्युम्नस्तरसा गदाम् ।**
**अपास्य शत्रवे क्रुद्धः प्राहिणोत् स्वगदामं नदन्।।२०।।**

**स च मायां समाश्रित्य दैतेयीं मयदर्शिताम् ।**
**मुमुचेऽश्ममयं वर्षं कार्ष्णौ वै हायसोऽसुरः ।। २१ ।।**

बाध्यमानोऽश्मवर्षेण रौक्मिणेयो महाबलः ।
सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीम् ।। २२ ।।

ततो गौह्यकगान्धर्वपैशाचोरगराक्षसीः ।
प्रयुङ्क्त शतशो दैत्यः कार्ष्णिर्व्यधमयत् स्म ताः ।। २३ ।।

निशातमपि मुद्यम्य सकिरीटं सकुण्डलम् ।
शम्बरस्य शिरः कायात्ताम्रश्मश्रोर्जहार तत् ।। २४ ।।

आकीर्यमाणो विबुधैः स्तुवद्भिः कुसुमोत्करैः ।
भार्ययाऽम्बरचारिण्या पुरीं नीतो विहायसा ।। २५ ।।

अन्तःपुरवरं राजन् ललनारत्नसङ्कुलम् ।
विवेश पत्न्याः गगनाद्विद्युतेव बलाहकः ।। २६ ।।

तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससम् ।
प्रलम्बबाहुं ताम्राक्षं सुस्मितं रुचिराननम् ।। २७ ।।

अलङ्कृतमुखाम्बोजं नीलवक्रालकालिभिः ।
कृष्णं मत्वा स्त्रियो हीता निलिल्युस्तत्र तत्र ह ।। २८ ।।

अवधार्य शनैरीषद् वैलक्षण्येन योषितः ।
उपजग्मुः प्रमुदितास्सस्त्रीरत्नं शुचिस्मिताः ।। २९ ।।

अथ तत्रासितापाङ्गी वैदर्भी वल्गुभाषिणी ।
अस्मरत् स्वसुतं नष्टं स्नेहात् स्नुतपयोधरा ।। ३० ।।

कोऽन्वयं नरवैदूर्यः कस्य वा कमलेक्षणः ।
धृतः कया वा जठरे क्वेयं लब्धा त्वनेन वा ।। ३१ ।।

ममासावात्मजो नष्टो नीतो यस्सूतिकालयात् ।
एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ।। ३२ ।।

कथं त्वनेन सम्प्राप्तं सारूप्यं शार्ङ्गधन्वनः ।
आकृत्याऽवयवैर्गत्या स्वरहासावलोकनैः ।। ३३ ।।

स एव भगवान् नूनं यो मे गर्भगतोऽर्भकः ।
अमुष्मिन् प्रीतिरधिका वामस्फुरति मे भुजः ।। ३४ ।।

एवं मीमांसमानाया वैदर्भ्या देवकीसुतः ।
देवक्यानकदुन्दुभ्यामुत्तमश्लोक आगमत् ।। ३५ ।।

विज्ञातार्थोऽपि भगवांस्तूष्णीमास जनार्दनः ।
नारदोऽकथयत् सर्वं शम्बराहरणादिकम् ।। ३६ ।।

तच्छ्रुत्वा महदाश्चर्यं कृष्णान्तःपुरयोषितः ।
अभ्यनन्दन् बहूनब्दान् नष्टं पुनरिवागतम् ।। ३७ ।।

देवकी-वसुदेवश्च कृष्णरामौ तथा स्त्रियः ।
दम्पती तौ परिष्वज्य रुक्मिणी च ययुर्मुदम् ।। ३८ ।।

नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः ।
अहो मृत इहायातो बलो दिष्ट्येति चाब्रुवन् ।। ३९ ।।

यं वै मुहुः पितृसरूपनिजेशभावा-
स्तन्मातरो यदभजन् रह ऊढभावाः ।
चित्रं न तत् खलु रमास्पदबिम्बबिम्बे
कामे स्मरेऽक्षिविषये किमुतान्यनार्यः ।। ४० ।।

।। इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे पञ्चपञ्चाशोऽध्यायः ।।

## एकषष्ठितमोऽध्यायः

**श्रीमद्भागवते महापुराणे एकषष्ठितमे अध्याये प्रोक्तभगवतः श्रीकृष्णस्य**
**सन्तानपट्टिका**

श्रीकृष्णस्य षोडशसहस्रपत्न्यः आसन् । एकैकास्ताः दश पुत्राः अजीजनन् । तत्र अष्टौ महिष्यः तेषां प्रद्युम्नादिपुत्राणां नामानि च कथ्यन्ते -

**तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदिता ।**
**अष्टो महिष्यस्तत्पुत्रान् प्रद्युम्नादीन् गृणामि ते ।।** (भागवतम्, ६१ अध्यायः, श्लो. ७)

**१. श्रीकृष्णात् - रुक्मिण्याम्**

| | | | | |
|---|---|---|---|---|
| १. प्रद्युम्नः | २. चारुदेष्णः | ३. सुदेष्णः | ४. चारुदेहः | ५. सुचारुः |
| ६. चारुगुप्तः | ७. भद्रचारुः | ८. चारुचन्द्रः | ९. विचारुः | १०. चारुः |

**२. श्रीकृष्णात् - सत्यभामायाम्**

| | | | | |
|---|---|---|---|---|
| १. भानुः | २. सुभानुः | ३. स्वर्भानुः | ४. प्रभानुः | ५. भानुमान् |
| ६. चन्द्रभानुः | ७. बृहद्भानुः | ८. अतिभानुः | ९. श्रीभानुः | १०. प्रतिभानुः |

**३. श्रीकृष्णात् - जाम्बवत्याम्**

| | | | | |
|---|---|---|---|---|
| १. साम्बः | २. सुमित्रः | ३. पुरुजित् | ४. शतजित् | ५. सहस्रजित् |
| ६. विजयः | ७. चित्रकेतुः | ८. वसुमान् | ९. द्रविडः | १०. क्रतुः |

**४. श्रीकृष्णात् - नाग्नजित्याम्**

| | | | | |
|---|---|---|---|---|
| १. वीरः | २. चन्द्रः | ३. अश्वसेनः | ४. चित्रगुः | ५. वेगवान् |
| ६. वृषः | ७. आमः | ८. शङ्कुः | ९. वसुः | १०. कुन्तिः |

**५. श्रीकृष्णात् - कालिन्द्याम्**

| | | | | |
|---|---|---|---|---|
| १. श्रुतः | २. कविः | ३. वृषः | ४. वीरः | ५. सुबाहुः |
| ६. भद्रः | ७. शान्तिः | ८. दर्शः | ९. पूर्णमासः | १०. सोमकः |

**६. श्रीकृष्णात् - माद्र्याम्**

| | | | | |
|---|---|---|---|---|
| १. प्रघोषः | २. गात्रवान् | ३. सिंहः | ४. बलः | ५. प्रबलः |
| ६. ऊर्ध्वगः | ७. महाशक्ती | ८. सहः | ९. ओजः | १०. अपराजितः |

**७. श्रीकृष्णात् - मित्रविन्दायाम्**

| | | | | |
|---|---|---|---|---|
| १. वृकः | २. हर्षः | ३. अनिलः | ४. गृध्रः | ५. वर्धनः |
| ६. अन्नादः | ७. महांसः | ८. पावनः | ९. वह्निः | १०. क्षुधिः |

**८. श्रीकृष्णात् - भद्रायाम्**

| | | | | |
|---|---|---|---|---|
| १. सङ्ग्रामजित् | २. बृहत्सेनः | ३. शूरः | ४. प्रहरणः | ५. अरिजित् |
| ६. जयः | ७. सुभद्रः | ८. वामः | ९. आयः | १०. सत्यकः |

**९. श्रीकृष्णात् - रोहिण्याम्**

१. दीप्तिमान् २. ताम्रतप्तः - इत्यादयः ।

रुक्मिणः पुत्र्याम् रुक्मवत्याम् **प्रद्युम्नात् -** महाबलः **अनिरुद्धः** सञ्जातः ।

श्रीकृष्णस्य पुत्रेभ्यः कतिचित् सहस्रकोटिपुत्राः पौत्राः च अजायन्त । कृष्णपुत्रेभ्यः षोडशसहस्राधिकमातारः सन्ति ।

## अनुबन्धः - २

# अकारादिक्रमेण श्लोकसूची

## अनुबन्धः - ५
# अनुशीलितग्रन्थसूची
### १. संस्कृतग्रन्थाः

१. **कालिदासग्रन्थावली -** स-रूपान्तरपाठान्तर-संशोधितमूला परिवर्धितं द्वितीयं संस्करणम्, सम्पादयिता - डा. रेवाप्रसादद्विवेदी, साहित्याचार्यः साहित्यविभागस्य अध्यक्षश्च। प्रकाशकः - काशीहिन्दूविश्वविद्यालयः - वाराणसी - १९८६.

२. **चन्द्रालोकः -** श्रीजयदेवकविप्रणीतः (विमला-सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेतः व्याख्याकारः -डा. श्रीकृष्णमणित्रिपाठी, चौखम्बा सुरभारती प्रकाशन, के. ३७/११७, गोपालमन्दिर लेन पो.बा. नं. ११२९, वाराणसी - २२१००१. दूरभाषा : ३३३४३१ पुनर्मुद्रितसंस्करण - २०००.

३. **दशरूपकम् (सावलोकम्) -** श्रीधनञ्जयविरचितम्, चन्द्रकलाहिन्दीव्याख्योपेतम् - डा. भोलाशङ्कर-व्यास, अध्यापकः, काशी हिन्दू विश्वविद्यालयः । चौखम्बा विद्याभवन, चौक् (बनारस स्टेट बैंक भवन के पीछे) वाराणसी पो०बा०नं० १०६९, वाराणसी - २२१००१ दूरभाषः - ३२०४०४ एकादशसंस्करणम् - १९९८.

४. **ध्वन्यालोकः -** आनन्दवर्धनाचार्यः, पं. दुर्गाप्रसादः काशीनाथ पाण्डुरङ्गपरब्, मुन्शीराममनोहरलाल-पब्लिशर्स् (प्रा.लि) ।

५. **नाट्यशास्त्रम् -** भरतमुनिप्रणीतम्, पण्डितकेदारनाथः, भारतीयविद्याप्रकाशन्, नई दिल्ली - २००३

६. **नाट्यशास्त्रम्** (श्रीमदभिनवगुप्ताचार्यविरचितया अभिनवभारती-संस्कृतव्याख्यया समुद्भासितम्) प्रथमो भागः - अध्यायाः १-७ सम्पादकः -डा. रविशंकर नागर संस्कृतविभाग, दिल्ली विश्वविद्यालय, परिमल पब्लिकेशन्स - दिल्ली, १९९८.

७. **प्रतापरुद्रीयम् -** श्रीविद्यानाथप्रणीतम्, श्रीकुमारस्वामिविरचितया रत्नपणाख्यव्याख्यया सहितम् सम्पादकः - डा.वे. राघवन्, मद्रपुरीसंस्कृतविद्यासमितिसचिवैः सत्कैङ्कर्यमणिः श्रीगो. सीतारामार्यैः प्रकाशितम् - तृतीयं संस्करणम् - १९९९. मद्रास् - 600 004. Phone - 49711 01

८. **प्रद्युम्नानन्दनाटकम्** (श्रीमदरिशाणफालवेङ्कटाचार्यविरचितं संस्कृतप्राकृतापूर्वशब्दश्लेष-यमककथा-विशेषविचित्रितम्), तिरुमलताताचार्यसाह्वेन संशोधितः, विद्यातरङ्गिणीमुद्रणशाला - महीशूरपुरी (मैसूर्) - १८८६.

९. **रसगङ्गाधरः** (प्रथमो भागः) - पण्डितराजजगन्नाथविरचितः, महामहोपाध्याय पण्डितनागेशभट्टविरचित-मर्मप्रकाशेन साहित्याचार्य श्रीमधुसूदनशास्त्रिणा विरचितैः प्रौढभूमिका-मधुसूदनी-बालक्रीडा-रसगङ्गाधरालोचनैश्च सहितः । सम्पादकः - साहित्याचार्यश्रीमधुसूदनशास्त्री । प्रकाशकः - काशीहिन्दूविश्वविद्यालयीयसंस्कृतसाहित्यानुसन्धानसमितिः

१०. **लक्ष्मीसहस्रम्,** व्याख्या - रत्नप्रकाशिका व्याख्याकारः - श्रीकृष्णब्रह्मतन्त्रपरकालमुनीन्द्रः परिष्कर्ता - श्री. न.च. रघुनाथाचार्यः प्रकाशकः - सत्सम्प्रदायपरिरक्षणसभा, वरंगल् (आं.प्र.) - २०००.

११. **विश्वगुणादर्शचम्पूः -** महाकविः श्रीवेङ्कटाध्वरिविरचिता, श्रीमन्मधुरसुब्बाशास्त्रिणा विरचितया भावदर्पणाख्यया टीकया सनाथीकृता, मुम्बापुरस्थ**हायकोर्टा**भिधन्यायपर्षद्गतवकीलसंहूतिना विठ्ठलसूनुना श्यामरायशर्मणा मुम्बापुर्यां कर्णाटकमुद्रणालये मुद्रापिता । शालिवाहनशाके १८१०, इसवी सन १८८९.

१२. **विश्वगुणादर्शचम्पूः -** महाकविश्रीमद्वेङ्कटाध्वरिविरचिता, योगीत्युपाभिध-बालकृष्णशास्त्रि-विरचित-पदार्थचन्द्रिकाटीकासहिता बाक्रे इत्युपाह्वगङ्गाधरसूनुना महादेवशर्मणा संशोधिता। (तस्या इयं चतुर्थावृत्तिः) मुम्बाय्यां तुकाराम जावजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये आयसाक्षरैर्मुद्रयित्वा प्रकाशिता । शकाब्दाः - १८३७, ख्रिस्ताब्दाः १९१५.

१३. **श्रीकेदारभट्टविरचितः वृत्तरत्नाकरः** - चन्द्रिका-संस्कृत-हिन्दीव्याख्योपेतः, व्याख्याकारः - आचार्य बलदेव उपाध्याय, भूमिकालेखकः - डा. ब्रह्मानन्द त्रिपाठी, सुरभारती प्रकाशन, वाराणसी - १९९८.

१४. **श्रीमद्भट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी** (मूलमात्रम्), सम्पादकः - श्रीगोपालदत्तपाण्डेयः अवकाशप्राप्त उप-शिक्षानिदेशकः (उत्तरप्रदेशस्थः) तथा नैनीतालस्थ-राजकीयस्नातकोत्तर-महाविद्या-लयस्य भूतपूर्व आचार्यः संस्कृतविभागाध्यक्षश्च। चौखम्बा विद्याभवन, वाराणसी - १९९३.

१५. **श्रीमम्मटभट्टविरचितः काव्यप्रकाशः** - नागोजीभट्टविरचितोद्द्योतयुतगोविन्दठक्कुरविरचितप्रदीपसमेतः, अभ्यंकरोपाह्व वासुदेवशास्त्रिभिः संशोधितम् । चौखम्बा विद्याभवन, वाराणसी - १९९४.

१६. **श्रीविष्णुमहापुराणम्** (क्षेमराजश्रीकृष्णदासेन सम्पादितस्य मुम्बई श्रीवेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्)(दिल्लीविश्वविद्यालयस्य हिन्दूमहाविद्यालयस्य, डा. राजेन्द्रनाथशर्मणा भूमिका-पाठशोधनाभ्यां परिष्कृतम् नागशरणसिंह सम्पादितश्लोकानुक्रमण्या सहितम्) नाग पब्लिशर्स्, ११, एयू.ए. जवाहर नगर, दिल्ली - ११० ००७ (भारत) ।

१७. **श्रीहरिवंशमहापुराणम् (Part - I)** (क्षेमराजश्रीकृष्णदासेन सम्पादितस्य मुम्बई श्रीवेंकटेश्वरस्टीम् मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्) (दिल्लीविश्वविद्यालयस्य हिन्दूमहाविद्यालयस्य, डा. राजेन्द्रनाथशर्मणा भूमिकापाठशोधनाभ्यां परिष्कृतम् नागशरणसिंह सम्पादितश्लोकानुक्रमण्या सहितम्) नाग पब्लिशर्स्, ११, एयू.ए. जवाहर नगर, दिल्ली - ११० ००७ (भारत) ।

१८. **श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी - तत्कृतीनाम् अध्ययनम्,** ग्रन्थकर्ता - डा. जि. स्वामिनाथाचार्युलु यम्.ए., पि.हेच्.डि. (सं.), जून् १९८८.

१९. **श्लेषाङ्कारविमर्शः -** प्रो.श्रीपादसत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति - १९९९.

२०. **संस्कृततृतीयप्रश्नपत्रम् -** (उपकार UGC NET/JRF/SLET), लेखकः - डा. मिथिलेश पाण्डेयः । उपकारप्रकाशन, 2/111 ए, स्वदेशी बीमा नगर (शाह सिनेमा के समाने) आगरा - 282 002. फोन - 2530966, 2531101, 2602930, 2602653. फैक्स : 0562 - 2531940. Email : upkar1@sancharnet.in, Website : www.upkarprakashan.com

२१. **संस्कृतनिबन्धशतकम्** - डा. कपिलदेव द्विवेदी (विद्याभास्करः साहित्यरत्नः) ११० विश्वविद्यालय-स्तरीयाः प्रौढाः प्रबन्धाः), परिवर्द्धितं संस्करणम्, विश्वविद्यालयप्रकाशन, वाराणसी।

२२. **संस्कृतनिबन्धशतकम्** (विश्वविद्यालयस्तरीयाः प्रौढाः प्रबन्धाः) - डा. कपिलदेव द्विवेदी, विश्वविद्यालयप्रकाशन्, वाराणसी - २२१ ००१. ISBN : 81-7124-231-6 दशमसंस्करणम् - २००४. फोन् - ०५४२ - २३५३७४१, २३५३०८२. E-mail : sale@vvpbooks.com, Wedsite : www.vvpbooks.com

२३. **संस्कृतसाहित्येतिहासः,** लेखकः - आचार्य रामचन्द्रमिश्रः, प्रकाशकः - चौखम्बा विद्यभवन (भारतीयसंस्कृति एवं साहित्य के प्रकाशक तथा वितरक) चौक (बनारस स्टेट बैंक भवन के पीछे), पो०बा०नं० १०६९, वाराणसी २२१००१, फोन : ४२०४०४.

२४. **संस्कृतसाहित्येतिहासः** (संस्कृतवाङ्मयस्य समग्रोऽभिलेखः), आचार्य लोकमणि दाहालः, कृष्णदास अकादमी, पो.बा.नं १११८, के. ३७य११८, गोपाल मन्दिर लेन, गोलघर (मैदागिन) के पास, वाराणसी - २२१ ००१ (भारत) फोन - ३३५०२०, वर्षः - १९९९.

## २. तेलुगुलिपिस्थसंस्कृतग्रन्थाः

1. కావ్యాలంకారః - భామహ□రచితః, బాలానన్దివ్యాఖ్యయా ఆంధ్రభాషావ్యాఖ్యయా సమేతః వ్యాఖ్యారచయితా డా. పుల్లెల శ్రీరామచన్ద్రః ముద్రణ - June - 1979. ప్రతులకు -కార్యదర్శి సురభారతీ స□తి ఉస్మానియా యూనివర్శిటి కాంపస్, హైదరాబాద్ - 500 007.

2. **చంద్రాలోకము** (తెలుగు అనువాదము) జయదేవః, డా. బులుసు వెంకట సత్యనారాయణ మూర్తి, రోహిణి పబ్లికేషన్స్, రాజమండ్రి.

3. **చంద్రాలోకసమున్మేషము** స్ఫూర్తిశ్రీ టి. భాస్కరరావు. ఎం. ఏ., లెక్చరర్ (రిటైర్డు), ఏ.సి. కాలేజి, గుంటూరు. ఆరవముద్రణ సెప్టెంబరు 1994 ప్రాప్తిస్థానము : ప్రశాంతి పబ్లిషర్స్, పట్టాభి ☐ధి, గాంధీనగరం, కాకినాడ - 533 004, ముద్రణః ప్రశాంతి ప్రింటర్స్, కాకినాడ.

4. **పూర్వగాథాలహరి,** వేలూరి శ్రీనివాసరావు, వెంకట్రామ అండ్ కో- ఏలూరు. - 2005.

5. **భగవద్గీత (శ్లోకతాత్పర్యములు)** గీతాప్రెస్ - గోరఖ్‌పూర్- 273005, A unit of Govida Bhavan - Karyalaya, Kolkata. Eighteenth Reprint - 2008. ఫోన్ - (0551) 2334721 ఫ్యాక్స్ 0551 - 2336997 Email : booksales@gitapress.org, website : www. gitapress.org, ISBN 81-293-0474-0.

6. **శ్రీమద్భాగవతము -** శ్రీమహర్షి వేదవ్యాసప్రణీతము (దశమస్కంధ ఉత్తరార్ధము) ఎని☐దవ సంపుటము, స్వా☐ తత్త్వ☐దానంద సరస్వతి (బ్రహ్మ☐ద్యాకుటిర్, పాత అల్వాల్, సికింద్రాబాదు) గారిచే రచించబడిన తత్త్వప్రకాశిక అనే తెలుగు టీకతో కూడినది. ప్రచురణ : కార్యనిర్వహణాధికారి, తిరుమల తిరుపతి దేవస్థానములు, తిరుపతి. ప్రథమముద్రణ - 2009.

7. **శ్రీమహాక- కాళీదాస- రచితమ్ అభిజ్ఞానశాకున్తలమ్** (యజమానమూర్తిః), తెలుఁగు అనువాదము - నోరి భోగీశ్వర శర్మ, ముద్రణమ్ - శ్రీ లక్ష్మీ గణపతి ముద్రణాలయము, కొవ్వూరు.

8. **శ్రీవేదవ్యాసమహర్షికృత శ్రీమద్భాగవతము దశమస్కంధము - 3,** తెనుగు అనువాదము - శ్రీ జన్నాభట్ల వాసుదేవశాస్త్రి, ముద్రణమ్ - శ్రీ గౌడీయమఠము, గుంటూరు - 3, 1983.

9. **శ్రీవేదవ్యాసమహర్షిప్రణీతమ్ శ్రీమద్భాగవతమ్** (దశమస్కంధః - పూర్వభాగః) శ్రీ☐రాఘ☐య వ్యాఖ్యోపేతమ్, ప్రకాశకః శ్రీత్రిదణ్డి శ్రీమన్నారాయణరామానుజజీయర్ స్వా☐, ముద్రణమ్ ☐జయ ముద్రణశాలా, చిత్తూర్ - 1976.

10. **సంస్కృత సాహిత్య చరిత్ర** (వైదికవాఙ్మయం - లౌకిక వాఙ్మయం - ☐మర్శనాత్మకం), వేదాలఙ్కార్ డా॥ ముదిగంటి గోపాలరెడ్డి - డా॥ ముదిగంటి సూజాతారెడ్డి, పొట్టి శ్రీరాములు తెలుగు ☐శ్వ☐ద్యాలయము, లలిత కళాక్షేత్రం, హైదరాబాద్ - 500 004, తృతీయ ముద్రణ 2002.

## ३. आङ्ग्लग्रन्थाः

**(Manuscript Catalogues)**


1. **The New Catalogus Catalogorum (NCC),** An Alphabetical Registrar of Sanskrit and Allied works and others, **Volume - Twelve,** पाइयलच्छिनाममाला - प्रध्यान । General Editor - Dr. N. Veezhinathan, Joint Editors - Dr. C.S. Sundaram, Dr.N. Gangadharan. Department of Sanskrit, University of Madras - 1989.

2. An **Alphabetical Index of Sanskrit Manuscripts in the** Government Oriental Manuscripts Library, Madras. By Vidyasagara - Vidyavacaspati P. P. Subrahmanya Sastri, B.A. (Oxon), M.A. (Madras) Curator, Government Oriental Manuscripts Library and Professor of Sanskrit and Comparative Philology, Presidency College, Madras. Prepared under the order of the Government of Madras. Part - I, Madras, Printed by the superintendent Government Press 1940.

3. A **Descriptive Catalogue** of the Sanskrit in the Government Oriental Manuscripts Library, Madras. By S. Kuppu Swami Sastri, M.A., Curator, Government Oriental Manuscripts Library and Professor of Sanskrit and Comparative Philology, Presidency College, Madras. Prepared under the order of the Government of Madras. **Volume - XXI - Kavyas** (Continued).

4. **Descriptive Catalogue of Sanskrit Manuscripts, Volume - VIII,** Padya, Gadya, Kathā, Campū, Nāṭaka, Subhāṣita, Alaṅkāra, Bharata Śāstra, Chandaśśāstra. General Editor - Vidwan Dr. H.P. Malledevaru M.A., Ph.D. Prof. & Head of the Dept. of P.G. Studies in Sanskrit, and Director, Oriental Research Institute, University of Mysore, Mysore. Ptd. in 1982. Jayanti Printers, Pampapati Road, Mysore - 570 014.

5. **Descriptive Catalogue, Volume - I, Part - I, Kāvya & Alaṅkāra**, Editors - Dr. K.S. Ramamurthi and Dr. S.A. Matha, Sri Venkateswara Oriental Research Institute, Sri Venkateswara University - Tirupati.

6. **Alphabetical list of Sanskrit Manuscripts,** N. Subramania Sastri, M.A., Curator, Sri Venkateswara Oriental Institute Library, Tirupati - 1956.

7. Sanskrit Manuscripts in the Adyar Library, **Descriptive Catalogue - Vol. V, Kāvya Nāṭaka and Alaṅkāra.** The Adyar Library Series No. 80, General Editor - Dr. G. Srinivasa Murti B.A., B.L., M.B. & C.M., Vaidyaratna, Director, Adyar Library. By

H.G Narahari, M.A., M.Litt., Under the Supervision of Dr. C. Kunhan Raja - The Adyar Library - 1951.

8. **History of Classical Sanskrit Literature -** Being an elaborate account of all branches of classical sanskrit leterature with full epigraphical and Archaeological notes and references, an introduction dealing with language, Philology and Chronology and Index of Authors & works.

M. Krishnamachariar, Motilal Banarsidass Publishers Private Limited, Delhi. 2004.

9. **20th Century Sanskrit Poets and Their Contribution (Volume - I)** *Author - S. Ranganath* General Editor - Prof. Hare Krishna Satapathy, Editor - Dr. Korada Suryanarayana, Rashtriya Sanskrit Vidyapeetha, Tirupati - 2010.

10. **Purāṇic Encyclopedia** (A Comprehensive Dictionary with Special Reference to the Epic and Purāṇic Literature) Veṭṭaṃ Maṇi, Motilal Banarasidass, Delhi. First Edition in English - Delhi - 1975. ISBN - 08426 0822 2. Motilal Banarasidass, Indological Publishers & Booksellers, Head office, Bangalow Road, Jawahar Nagar, Delhi - 7.

### ४. अनुसन्धानग्रन्थाः

१. **अळशिङ्गभट्टकृतस्य वज्रमुकुटीविलासचम्पूकाव्यस्य पाठसमीक्षात्मकं सम्पादनम् -** मार्गदर्शकः - विरूपाक्ष वि. जड्डीपाल्, अनुसन्धात्री - सुजनि, समर्पणम् - राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः, जनवरी - २००९. (Ph.D.)

२. **कुवलयानन्दाधारेण चन्द्रालोकाश्रितानां व्यङ्ग्यसम्बद्धालङ्काराणामनुशीलनम् -** मार्गदर्शकः - आचार्य सन्निधानं सुदर्शनशर्मा, अनुसन्धाता - पठान् वलि साहेब्, समर्पणम् - राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, मे-मासः - २००७. (M.Phil.)

३. **जातवेदप्रणीतपूर्णपुरुषार्थचन्द्रोदयनाटकस्य सव्याख्यस्य पाठसमीक्षात्मकं सम्पादनम् अध्ययनञ्च -** मार्गदर्शकः - विरूपाक्ष वि. जड्डीपाल्, अनुसन्धाता - देवदर्शि मिश्रः, समर्पणम् - राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः, मे-मासः - २००९. (Ph.D.)

४. **नीलकण्ठीयस्य अभिज्ञानशाकुन्तलव्याख्यानस्य सम्पादनम् -** मार्गदर्शकः - श्रीलक्ष्मीनरसिंहभट्टः, अनुसन्धाता - जि. गोपालरेड्डिः, समर्पणम् - राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः - १९९२. (Ph.D.)